BENARES SANSKRIT SERIES;

A

COLLECTION OF NSKRIT WORKS

EDITF IE

PANDITS OF THE BEN SKRIT COLLEGE,

UNDER THE SU

R. T. H. GI

G. THIBAU

No. 4

श्रीमद्याज्ञवल्क्यादिमहर्षिप्रणीतः शिक्षासङ्ग्रहः ।

क्वचिद्व्याख्यानयुतः ।

श्रीमत्काशिकराजकीयपाठशालयाधीतविद्येन श्रीमन्मिथिलामण्डलाधीशतो लब्धवै-
दुष्यप्रतिष्ठेन काशीस्थसुप्रसिद्धविद्वज्जनसंस्थापितवेदविद्यालयाध्यापके-
न च पाठकोपाह्वश्रीमद्युगलकिशोरव्यासेन निर्म्मिताशिक्षाकीर्त्ति-
प्रकाशाख्यटिप्पण्या समेतः शोधितः प्रकाशितश्च ।

A COLLECTION OF ŚIKSHÁS

BY YÁJÑAVALKYA AND OTHERS,

WITH COMMENTARIES ON SOME OF THEM.

EDITED AND ANNOTATED BY PANDIT YUGALAKIŚORA VYÁSA

LATE SCHOLAR OF THE BENARES SANSKRIT COLLEGE.

Fasciculus II.

BENARES:

PUBLISHED BY MESSRS. BRAJ B. DAS & CO.

PRINTED AT THE BENARES PRINTING PRESS.

1890.

लो न तु नादः कदा च न ॥ ४० ॥ जहि शत्रून् क्षा-
रान् वनस्पतीन् परिधीन् छिणन्ति शत्रूँ २ रनपव्यय-
ति: ॥ अनुरङ्गाः पञ्चैकाद्विमात्रिका भवन्ति ॥ ४१ ॥
रूपा भिन्नो वसुश्चैव अञ्जनाः परिकीर्त्तिताः ॥ एकाद्वि-
मात्रिकां स्थित्वा पञ्चैते आनुनासिकाः ॥ ४२ ॥ पञ्च
रङ्गाः प्रवर्त्तन्ते घातनिर्घातवञ्जिणः ॥ अहिणः प्रहि-
णो ज्ञेयो यथाऽऽईउक्त निदर्शनम् ॥ ४३ ॥ (१) देवाँ
२ ॥ ऽआसादयेति घातः । (२) देवाँ २ ॥ ऽइदेषीति
निर्घातः । (३) देवाँ २ ॥ ऽउपागादिति वञ्जिणः ।
(४) देवाँ २ ॥ ऽऋतुभिरिति अहिणः । (५) अभिनाँ
२ऽ ॥ ओषतादिति प्रहिणः ॥ द्विमात्रो मात्रिको वाऽपि
नासामूलं समाश्रितः ॥ अन्ते प्रयुज्यते रङ्गः पञ्चभिः
र्वनासिकैः ॥ ४४ ॥ बण्महाँ असि बडादित्यो ह्यदा देव म-
हाँ २ ॥ ऽअसि ॥ बट्सूर्यस्य तु सञ्चातो महारङ्गाः प्रकी-
र्त्तिताः ॥ ४५ ॥ घरिते धरिमाग्ने च अष्टधं परिकी-
र्त्तिताः ॥ यस्माद्वयं प्रद्विष्यन्ते अतिरङ्गाः प्रकीर्त्तिताः ।

(१) २२ । १७ ॥
(२) २३ । १६ ॥

४६ ॥ (१) अग्ना३इ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा इति हिः ॥ तिरश्चीनो विततः पृच्छामि त्वा वायुरनि लभिलि सम लुता भवन्ति व्यष्टमो न विद्यते ॥ ४७ ॥ मनो जूतिस्य वायुस्य लुतमेकं द्विधाकृतम् ॥ ओकाराद्याः लुताः सर्वे न विकल्पः ऽ शाचन ॥ ४८ ॥ षडङ्गुलं तु जात्यस्य ह्रस्वस्यानुपथस्य च ॥ चतुर्थभागमात्रं स्याद्भूयसैव वर्त्तते ॥ ४९ ॥ शून्ये गृहे पिशाचोऽपि गर्जेन च दृश्यते ॥ एवं वर्णाः प्रयोक्तव्या (२) उपध्मान्ति सर्जनम् ॥ ५० ॥ स्फुरितं चिबुकोन्मूलं वायुना समापूरितम् ॥ नवडूकस्फुरणं नाम (३) अपाक्पके निदर्शनम् ॥ ५१ ॥ इडँ नक्तऽपिस्वनं कृतस्यते, पाकन्तो, दूर्सनडँ० सुराजन्म् । इडऽएहि ॥ पद्याले तु वाक्ये च तक्षाः पञ्च सरस्वति ॥ अकारो द्वौ मकारश्च रेफश्च कुपरि स्थितः ॥ अशरीरं यमं विद्यात्सञ्जाऽऽऽनीति (४) निदर्शनम् ॥ (५) दूयन्ते, याक्षां, सुवीराम्, सुप्रजाः । प्रजाः । वर्षिष्ठानां सञ्जाय । प-

---

(१) इदं गद्यात्मकं पद्यं केचिन्मतमवलम्ब्याङ्को लिखितः ॥ उदाहरणाङ्काः प्रातिशाख्यतो ज्ञेयाः ॥

(२) १७ । ६ ॥

(३) १२ । ७१ ॥

(४) २ । १४ ॥

(५) मूलस्योदाहरणानि संहितातो ज्ञेयानि बुधैरिति ॥

रो दिवा पृथिव्या इति षट् पृथिव्याः स्वरान्ताः ॥
लोहकारस्तथा, कर्म भस्मसात्कुरुते यदि ॥ ए-
वं वर्णाः प्रयोक्तव्याः संवत्सरो निदर्शनम् ॥ ५३ ॥
आयसं च यथा तप्तं निःक्षिपेदप्सु सत्वरतः ॥ तद्वच्छब्दं
कुरुते प्राज्ञः परिवत्सरो निदर्शनम् ॥ ५४ ॥ जल्हा-
कारं पठेद्यस्तु कूर्मपृष्ठो विधीयते ॥ एवं च
कुरुते प्राज्ञः (१) कलशस्य इति दर्शनम् ॥ ५५ ॥
यथा वीणाविनः पक्षिणाऽ उत्पतन्ति पतन्ति च ॥ एवं
वर्णाः प्रयोक्तव्याः (२) कलशस्य इति दर्शनम् ॥ ५६ ॥
कूर्मपृष्ठं परित्यज्य कर्तव्यमल्पपल्लवम् ॥ एवं हि
कुरुतेऽभिज्ञो (३) देवस्य त्वेति दर्शनम् ॥ ५७ ॥ कुक्कु-
टः कामलुब्धो वा ककारद्वयमुच्चरेत् ॥ एवं वर्णाः प्रयो-
क्तव्याः (४) कुक्कुटोऽसि निदर्शनम् ॥ ५८ ॥ कुक्कुटी
कामलुब्धा च कुक्कुटस्वी पुनः पुनः ॥ तद्वच्छब्दं कु-
रुते प्राज्ञः कुक्कुटोऽसि निदर्शनम् ॥ ५९ ॥ यथा भा-
रभराक्रान्तो निश्वासो लघुचेतसः ॥ एवं वर्णाः प्रयो-
क्तव्याः (५) होता यक्षन्निदर्शनम् ॥ ६० ॥ यथा बा-

(१) १७ । २६ ॥

(२) द्वितीयोदाहरणं 'ख' पुस्तकपाठश्च ॥

(३) १ । १० ॥

लस्य सर्पस्य निश्श्वासो लघुचेतसः ॥ एवः
र्त्तव्यो हकारपरिवर्ज्जितः ॥ ६१ ॥ यथा पुः
ह्याश्चुम्बतीच पुनः पुनः ॥ तन्मुखं कुरुते ः
ज्ञानऽइति दर्शनम् ॥ ६२ ॥ यथा कामातुः
ब्दं करोति यादृशम् ॥ तच्छब्दं कुरुते ॽ
सिऽह्यसि निदर्शनम् ॥ ६३ ॥ यथा ॽ
रोषेण प्रतिधावति ॥ एवं वर्णाः प्रयोक्तव्य
किरीविना, दर्शनम् ॥ ६४ ॥ मूत्रं करोति
निं कुर्वीत यादृशीम् ॥ तन्मुखं कुरुते प्रा
दुन्दुभे निदर्शनम् ॥ ६५ ॥ उकारान्ते उक
ते चोभयोर्यदि ॥ द्विरौष्ठ्यन्तु विजानीया
वः स्वर्न्निदर्शनम् ॥ ६६ ॥ एकयत्नो भवेद
ष्ठ्यन्तदुच्यते ॥ द्विनिभिश्च चतुष्कं च चत
परम् ॥ ६७ ॥ अथ सादृश्यविज्ञेयः सम
योः ॥ न्यूनाधिकानि तान्येव चक्षुषीति वि
६८ ॥ विश्वेदेवास्तमुत्वा च असौ यस्तु व
ये देवा नमस्तेऽस्तु वाजोनः सप्त चक्षुषी ।

(१) ११ । १ ॥

(२) ५ । १० ॥

मानाचरबाधे च सन्ध्येकाचरचचुषी ॥ समानवर्णयोगं च सम्प्रधानैव चचुषी ॥ ७० ॥ मन्नोमित्रस्तथा वातो ऊर्द्ध्वमेनं प्रचते ॥ मानस्तोके तनये तु चचुषी च चतुष्टयम् ॥ ७१ ॥ पूर्वीयां कण्डिकां दृष्ट्वा अपरा सह-सँय्युता ॥ तदेव नामग्रहणं न विकल्पः कदा चन ॥ ७२ ॥ पूर्वी विद्धा पराल्या च कण्डिका यत्र दृश्यते ॥ चपला चैव सा ज्ञेया (१) आच्छन्दो निदर्शनम् ॥ ७३ ॥ तिस्रो ह्यर्द्धा अभित्यं च तिस्रोऽर्द्धा प्रजापतिः ॥ पुनन्तु मेति चत्वारि वायुः पञ्च ततः परम् ॥ ७४ ॥ अनाधृष्टा त्रयश्चैव एषोस्यर्द्धचतुष्टयम् ॥ सँव्वत्सरोऽसि चत्वारि द्यौःशान्तिश्चार्द्धयोर्द्धयोः ॥ ७५ ॥ क्वचित्स्वाहा पृथक्कुर्य्यात्क्वचिद्युक्तां तु कारयेत् ॥ क्वचिच्चादौ विजानीयात्क्वचिच्चान्ते विधीयते ॥ ७६ ॥ वाक्यकालेऽवसाने वा स्वाहान्ते चाहुतिं क्षिपेत् ॥ मन्त्रभागं पृथक्कुर्य्यात्स्वाहाकारं पृथक्पृथक् ॥ ७७ ॥ स्वाहादौ च भवेद्वाक्यं (२) नृमणा नृमणास्तथा ॥ अन्ते चादौ पुनश्चान्ते (३) काय स्वाहेति दर्शनम् ॥ ७८ ॥ अन्तराश्रीतिरेकस्य प्रथमा कण्डिका स्मृता ॥ लक्षणोक्त-

---

(१) २५ । ५ ॥

प्रकारैस्तु (१) द्रुषेत्वेति निदर्शनम् ॥ ७
णि च चत्वारि दश पञ्चाष्टमं स्मृतम्
रं तद्वदुभयोरपि दृश्यते ॥ ८० ॥ सप्त
पुनश्चैकादशाक्षरम् ॥ नवाक्षरं विजानी
दशं स्मृतम् ॥ ८१ ॥ उष्वादुत्तरन्तारि
तरं तथा ॥ एवं वर्णाः प्रयोक्तव्या द्रुषे
नम् ॥ ८२ ॥ मकारादौ भवेद्वाक्यं कद्रा
आविर्मर्य्योऽकारादौ स्वरान्ते प्रपक्ता
कद्रुस्सक्ता भवेद्वाक्यं वेदभक्ता पुनः पु
वानयोः सप्त अन्ते चैव चतुर्दश ॥ ८४
वर्णानि अक्षराणां प्रलापतः ॥ इन्द्राणि
वाक्यं तस्य भवेत्रयम् ॥ ८५ ॥ सुधा
पीडवाध्यक्ता द्वितीयका ॥ अक्षाक्ता
रात्रा वर्णिता स्वराः ॥ ८६ ॥ धिंदंसि, प्र
ख्योऽथ पदा भवेत् ॥ ध्यक्ताऽध्यक्षात
कामिडक्ष्वाक्ष्योः ॥ ८७ ॥ अभिरभिम्न
विधीयते ॥ एकाक्षरं पदं वाक्यं नवा
८८ ॥ मध्ये चैकाक्षरं वाक्यं द्वि द्विऽक्षरः
एवं वर्णाः प्रयोक्तव्या, लोकं ताद्य, प्र
विभक्त्यन्तं विजानीयाद्गुरुतः शास्त्र

(१) १।१॥

पागमविकाराभ्यां वाक्यानामेष निर्णयः ॥९०॥ स्वनेषु-
व्यन्तरिक्षं च, अष्टौ व्यस्तथैव च ॥ (१) नामग्रह-
णकाले तु गुरुरेव न संशयः ॥ ९१॥ धर्म्मे च स्वस्तथा
चित्रऽउपप्रागात्सुहृदः ॥ स्वरितो वाक्यकालेषु उ-
दात्तं नोपपद्यते ॥ ९२ ॥ एष्वूषु शुक्रा जाते च अ-
भित्त्वा गोमदूषुणा ॥ स्वरितो वाक्यकालेषु न चोद्गी-
यते करम् ॥ ९३ ॥ अस्मन्नमीमदन्त च अहरहस्त-
थैव च ॥ वाक्यं च स्वरितं विद्यात्पाठकाले यथा क्र-
मम् ॥ ९४ ॥ जघ्नाघो यत्र दृश्यन्ते ह्यन्तस्थासु तथैव च ॥
गुरुत्वं नैव विज्ञेयऽस्त्ववर्णसह संयुतः ॥९५॥ अन्तस्थपद-
संयोगे विशेषो नोपपद्यते ॥ अशरीरं यमं विद्यादन्तस्थः
पिण्डनायकः ॥ ९६ ॥ सद्यो जातः समुद्राद्रोऽसि प्रथमाथ
व्युच्छ्या ॥ एवं वर्णाः प्रयोक्तव्या गुरवोऽत्र न संशयः ॥
९७ ॥ अभिनीतं निपातं वा जात्यं वा स्वरितं विदुः ॥
पदकाले भवन्त्येवं पाठकाले यथाक्रमम् ॥ ९८ ॥ त-
व श्यावो मह्योऽग्ने व्युत्यन्नेव दृश्यते ॥ प्रथमोऽत्र
लघुर्ज्ञेयो द्वितीयस्तु गुरुर्भवेत् ॥ ९९ ॥ द्वादशैतानि
नामानि देवता च तथैव च ॥ अन्यथा निरयं याति
सम्यक् पाठमजानतः ॥ १०० ॥ (२) छाया च्छिद्रा त-

---

(१) इमान्युदाहरणानि संहितापाठस्थानि बोध्यानि । अन्येषामुदाहरणानामङ्काः शिक्षान्तरादूह्याः ॥

था छन्दस्त्वकारा लघुसञ्ज्ञकाः ॥ ह्रस्वा वा यदि वा दीर्घाः शेषा द्वित्वे प्रतिष्ठिताः ॥ १०१ ॥ दीर्घादग्रे छकारोऽपि ह्रस्वादग्रे तथैव च ॥ द्वित्वाक्षरं विजानीयादिति शास्त्रविधानतः ॥ १०२ ॥ दीर्घादग्रे तु यो दीर्घो गिरिशा वर्मणा तथा ॥ गुरुरेव स मन्तव्यस्तथामि निदर्शनम् ॥ १०३ ॥ मा त्वा यऽत्रांक्तमदाश्चैव सहस्तोमास्तथैव च ॥ पाठमध्ये लघुर्ज्ञेयो पदकाले गुरुर्भवेत् ॥ १०४ ॥ पशुभिर्यजुर्भिराप्यन्ते तस्माहृच ज्ञात्तथैव च ॥ ऋचार्द्धेतु छकारो न त्रिसँय्योगं कदाचन ॥ १०५ ॥ न सँय्योगं न द्विर्भावस्तकारो मृदुरुच्यते ॥ अवसाने गुरुं विद्याच्छौनको वाक्यमब्रवीत् ॥ १०६ ॥ निपातं चाभिनीतं च शेषं नीचतरं क्रमात् ॥ त्रिस्वरं तं विजानीयाद्धोता त्रोजो निदर्शनम् ॥ १०७ ॥ द्वौ ककारौ स्वरौ द्वौ च नैव मात्रा विधीयते ॥ स्वरे प्रतिस्वरं दद्याद्बृशीना त्वा निदर्शनम् ॥ १०८ ॥ चतुर्द्दशाक्षरं चादौ पुनश्चैकादशाक्षरम् ॥ पुनर्द्दशाक्षरं वाक्यमष्टाक्षरमतः परम् ॥ १०९ ॥ लक्षणैर्वा विहीनस्तु भुक्तमव्यञ्जनं यथा ॥ एवं वर्णाः प्रयोक्तव्याः शीघ्रवते च निदर्शनम् ॥ ११० ॥ वसुसङ्ख्याक्षरं वाक्यं त्रिपदी वा चतुष्पदी ॥ सप्तताक्ष्यासन्निह गायत्री अग्निनन्दूतं, सुधी हवम् ॥ १११ ॥ उभौ सप्ताक्षरं वाक्यं पुनश्चैव नवाक्षरम् ॥ अष्टाक्षरं वि-

जानीयाद्यत्पुरुषं च निर्द्दिशेत् ॥११२॥ ऊनाशीति तु वर्णानि अथैतांश्च प्रकीर्त्तिताः ॥ एकाक्षरादिवाक्यानि द्वादशैतानि सङ्ख्यया॥११३॥ द्वादशाक्षरं प्रथमं पञ्चमे पञ्च सप्त वै ॥ षडक्षरं ततो वाक्यं पुनर्द्वादशकं स्मृतम् ॥११४॥ एकादशाक्षरम्प्राहुरन्ते च द्वादशाक्षरम् ॥ एवं वर्णाः प्रयोक्तव्या अथैतानिति दर्शनम् ॥११५॥ अष्टादशाक्षरं वाक्यं नाकपृष्ठे च पञ्चधा ॥ सप्तदशाक्षरं चैव वैश्वदेवी निदर्शनम् ॥ ११६ ॥ रौद्राध्यायोत्तरेणैव कण्डिकाशतकेन तु ॥ ततो वाक्यं प्रकुर्वीत चत्वार्द्धं षोडशाक्षरम् ॥ ११७ ॥ अष्टादशाक्षरं वाक्यं पुनः षोडशकैः शुभैः ॥ एवं वर्णाः प्रयोक्तव्या अश्मन्नूर्ज्जं विनिर्द्दिशेत् ॥ ११८ ॥ पुस्तके (१) प्रत्ययाऽधीतं नाधीतं गुरुसन्निधौ ॥ न भ्राजन्ते सभामध्ये जारगर्भा इव स्त्रियः ॥ ११९ ॥ एकः सर्वं न जानाति सर्वे एकं न विन्दति ॥ एवं मन्त्रा न शुद्ध्यन्ति पण्डिताः शुद्धभाविनः ॥ १२० ॥ (२) श्रुत्वा वेदविनाशं तु सम्यग्ब्रूयान्न वै बुधः ॥ आहूय तं विविक्ते वै तस्य धर्मो न हीयते ॥ १२१ ॥ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमा-

---

(१) प्रत्ययाधीतमिति 'ख' पुस्तकपाठश्च ॥

(२) शुभभाजिनइति 'क' 'ग' पुस्तकयोः पाठः ।

नं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ १२२ ॥ ल-
क्षणं न त्यजेद्धीमान्सम्प्रदायोऽन्यथा भवेत् ॥ लक्षणे-
न विना शिष्यः सम्प्रदायो विनाशवान् ॥ १२३ ॥
नासौ तत्फलमाप्नोति सम्यक्पाठमजानतः ॥ उत्तमो
लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यमः ॥ १२४ ॥
लक्ष्यलक्षणयोर्ज्ञानी तद्धि पात्रं (१) प्रचक्षते ॥
लक्षणेन विना वाणी निर्मलाऽपि न शुद्ध्यति ॥ १२५ ॥
प्रमदा रूपसम्पन्ना दरिद्रस्येव योषिता ॥ स्वरहीना
यथा वाणी वस्त्रहीनास्तु योषितः ॥ १२६ ॥ एवं व-
र्णा न शोभन्ते प्राणहीनाः शरीरिणः ॥ वेदपाठी
सदा सम्यग्विचार्य्यैवं पुनः पठेत् ॥ १२७ ॥ विभ्रष्टा
रूपाण्यवोध्यग्निरेषोऽसीति तथाऽपरः ॥ केतुङ्कृण्व-
न्निति च ते षकारा मूर्द्धजाः स्मृताः ॥१२८॥ अग्नेर-
नीकँ, व्युदवा हि, विश्वे देवा, द्वितीयकम् ॥ उदग्ने
न्वायमुत्तरा, नमो वन्न्याय, हीत्ययम् ॥१२९॥ देव-
र्बर्हिं, र्व्यदापोऽस्ति त्वामद्य, स्वस्ति न स्तथा ॥ मा नो
मित्रो हि वध्यन्ती नकारा ययुतास्तथा ॥ १३० ॥
इत्यमोघानन्दिनी शिक्षा समाप्ता ॥

(१) तद्धि पात्रं प्रशस्यते इति 'क' पुस्तकपाठश्च ॥

अथ लघ्वमोघानन्दिनी शिक्षाऽऽरभ्यते ॥

पादादौ च पदादौ च सँय्योगावग्रहेषु च ॥ जः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥ १ ॥ युक्तेन मनसा तद्वत्त्वा यामि तथाऽपरम् ॥ अनूकाशेन बाह्वं च तुरीयमनुया पदे ॥ २ ॥ पदादावप्यविच्छेदे सँय्योगान्ते च तिष्ठताम् ॥ वर्ज्जयित्वा रहौ याऽनामीषत्स्पृष्टत्वमिष्यते ॥ ३॥ मित्रद्रुही, न्यमित्राँश्च रोचनास्ययथा भवेत् ॥ तथा पार्य्याय सूर्य्यश्च मुह्यन्त्वन्ये समूह्यवत् ॥ ४ ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥ ईषत्स्पृष्टो यथा विद्यात्पदच्छेदात्परो भवेत् ॥ ५ ॥ विभाषया यकारश्च नित्यमाम्रेडितेऽपि च ॥ यत्र यत्रेति मा यज्ञं तथा येति पदादपि ॥ ६ ॥ अथातऽउत्तरो यः स्यात्तथा नेति पदात्परः ॥ भवन्त्यतेऽपि पूर्वञ्च तथा च स पदादपि ॥ ७ ॥ अथा वयमादित्यादावथोयेऽअस्य दृश्यते ॥ न यत्परो यथा च स्यात्स पदे तदुदाहृताः ॥ ८ ॥ वो वां वा वै वि वौ पाठे उपसर्गात्परो लघुः ॥ अथ मा स न शब्देभ्यो विभाषाऽऽम्रेडिते यवौ ॥ ९ ॥ यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ।

यत्र यत्र विशेषः स्यात्तदिदानीं तु कथ्यते ॥ १० ॥ त्वदर्थवाचिनो वो वां, वा वै यदि निपातजौ ॥ आदे- शाश्च विकल्पार्था ईषत्स्पृष्टाश्च ते स्मृताः ॥ ११ ॥ दे वो वः सविता या वां, व्यातो वेति तथा न तत् ॥ तव व्यायष्टतस्यते तानऽ आवेति कीर्तिताः ॥ १२ ॥ य- दुक्तं सूत्रकारेण तद्वत्यात्सम्प्रसारणम् ॥ तज्ज्ञेयं सर्वशाखासु न तु वाजसनेयिनाम् ॥ १३ ॥ लक्षण- स्य विरोधेऽपि पाठैक्यं यदि दृश्यते ॥ तत्तथा प्रतिप- त्तव्यँय्यज्ञायज्ञा वऽइत्यथ ॥ १४ ॥ अनुस्वारो द्विमा- त्रः स्याद्दवर्णव्यञ्जनोदये ॥ ह्रस्वाद्वा यदि वा दीर्घाद्दे- वानाᳪं॰ हृदयेभ्यः ॥ १५ ॥ स ᳪं स्पृष्टा सि ᳪं ह्यसि सँय्योगे ह्रस्व इष्यते ॥ मध्यम ᳪं श्याथेति सँय्योगो न द्विरुच्यते ॥ १६ ॥ ज्ञात्वा वेदविनाशं तु सम्यग् ब्रू- यान्न वै बुधः ॥ आहूय तं विविक्ते वै तस्य धर्मो न हीयते ॥ १७॥(१) इति श्री लघ्वमोघानन्दिनी शिक्षा समाप्ता ॥

(१) इदं पद्यं प्राक् शिक्षायां लिखितं तथाऽपि सम्प्रदायविदोऽत्रापि लिखन्त्यतो मया लिखितम् ॥

अथ माध्यन्दिनमहर्षिप्रणीता शिक्षाऽऽरभ्यते ॥

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ १ ॥ स्वराद्द्वित्वमवाप्नोति व्यञ्जनं व्यञ्जने परे ॥ हरौ न यद्यचः पूर्वौ निमित्तं व्यञ्जनस्य च ॥ २ ॥ रूपं त्वोर्ज्जे त्वा ॥ स्वरपूर्वाः शषसहा अन्तस्थाश्च तथा यदि ॥ निमित्तभूता द्वित्वस्य स्पर्श एव न संशयः ॥३॥ अश्मन् ॥ स्पर्शपूर्वा यरलवाः स्पर्शपूर्वाः शरस्तथा ॥ व्यञ्जनञ्च ततः पूर्वं द्वेधाभावं न चाप्नुयात् ॥ ४ ॥ अयक्ष्माः ॥ विसर्गाच्च परः कादिर्व्यञ्जनात्किल पूर्वगः ॥ कखपूर्वौ नङौ द्वित्वमापद्यते पदान्तगौ ॥ अपि स्वरतरावेव श्लिष्टौ भवति नान्यथा ॥ ५ ॥ विष्णोः क्रमः ॥ दध्यङ्ङृषिः ॥ अश्मन्नूर्जम् ॥ अत्र येन निमित्तेन द्वित्वं व्यञ्जनमश्नुते ॥ द्वितीयस्य च प्रथमस्तुरीयस्य तृतीयकः ॥ ६ ॥ वाङ्ङ्भ्याम् ॥ स्ववर्गे च परे नैवापञ्चमे परतः स्थिते ॥ सवर्णे च यमे चैव ऋवर्णे न तथा शलि ॥ ७ ॥ तद्देवानाम् । ऋद्धिः । तन्नः । अग्निः । पितॄणाम् ॥

अत्र कवर्गीयखकारा निर्दिश्यन्ते ॥ आखरेष्ट्ठा:
आखुस्ते । २ । मयूखैः । ३ । धाम्ना लेखी: ।
ततः खनेम । ५ । उखाङ्कृणोतु । ६ । उखाम्परि
मि । ७ । खनत्ववट । ८ । दृघतूखे । ९
मित्त्रैताल्लऽउखाम् । १० । लङ्खाद् । ११
सुखादितान् । १२ । अभाक्खा । १३ । गन्ध
अखनन् । १४ । आखिदते । १५ । प्रखिदते । १
विशिखाऽइव । १७ । श्रियै शिखा । १८ ।
स्याऽआखून् । १९ । ऋतूनामाखुः । २० । ख
वैश्वदेवः । २१ । नखेषु । २२ । मोरवा अ
न्तौ । २३ । उखायाः सदने खे । २४ । मधु श्र
। २५ । स्त्रीषखम् । २६ । शङ्खधमम् । २७ । म
शिरोऽसि । २८ । मखाय त्वा । २९ । अथ ग
तर्चानां निर्णयः ॥ इषे त्वा एदम् । अश्वस्तूपरः । समि
अञ्जन् । सहस्रशीर्षा पुरुषः । तदेव । स्वाहा प्र
स्मैष्वध्यायेषु न गलिता ऋचः ॥ १ ॥ द्वितीयेऽ
ये अग्ने व्रतपते इति प्रविष्टास्त्रयस्त्रिंशत् । २ ।
तीयेऽयमग्निः पुरीष्यऽइति प्रविष्टा द्वाषष्टिः ।
पञ्चमेऽग्ने व्रतपाऽ उरु विष्णोऽइति प्रविष्टे
कचत्वारिंशत् । ५ । षष्ठे प्रथमा ऋग्गलिता रेवती
ध्वमित्यतः परा देवस्य त्वान्तः पञ्चविंशत् । ६ । स्व

स्पतये त्वाङ्कृतोऽसि आत्मने मे अग्ने नयाय न्नो लुप्ते चतुश्चत्वारिंशत् । ७ । आदित्येभ्यस्त्वेत्यत्र कदाचन सँव्वर्चसा देवा गातुविद ऽ उदुत्यमवभृथ निचुम्पुण मिलिता अष्टपञ्चाशत् । ८ । देव सवितरित्यत्र देवस्याहं एकोनचत्वारिंशत् । ९ । अपो देवा इत्यत्र सोमस्य त्विषिरिमं देवा इति लुप्ते द्वात्रिंशत् । १० । युञ्जानः प्रथममित्यत्र युञ्जते देव सवितः पृथिव्याः सधस्थादसवस्त्वाच्छन्दन्तु मिलिताऽअष्टसप्ततिः । ११ । दृशानो रुक्मऽ इत्यत्र हꣳसः शुचिषदक्रन्ददग्निर्दृशानो रुक्मः समिधाग्निं सहरय्या पुनरूर्जाऽ अयन्ते भवतन्नऽअष्टोत्तरशतम् ॥ १२ ॥ मयि गृह्णामीत्यत्राग्निर्मूर्द्धाऽपाम्पृष्ठमसि द्यौर्विष्णोः कर्म्माणि चित्रं देवानां त्रिपञ्चाशत् ॥ १३ ॥ ध्रुवक्षितिरित्यत्र शुक्रश्च विश्वकर्म्मा त्वा द्वे नभश्चेषश्चेति पञ्चविंशतिः ॥ १४ ॥ अग्ने जातानित्यत्राग्नेर्मूर्द्धा त्वामग्ने पुष्कराद्ध्रुवो यज्ञस्यायमिहायन्ते लोकं पृण ताऽअस्येन्द्रँव्विश्वा नवैता लुप्यन्ते परमेष्ठी त्वा द्वे मिलिते चतुःपञ्चाशत् ॥ १५ ॥ नमस्ते इत्यत्र नीलग्रीवा द्वितीया नमोऽस्तु द्वे मिलितास्त्रयस्त्रिषष्टिः ॥ १६ ॥ अश्मन्नूर्ज्जमित्यत्र हिमस्य त्वा-

व्वाजस्य नु देवस्य त्वा यास्ते याव्ऽउद्बुध्यस्व येन व्व
सि व्विनस्त्वँय्यविष्ठेत्यष्टमिलिता एकोनसप्ततिः । १८
स्वाहीन्त्वेत्यत्र व्वायो: पूतः कुविदङ्गेति द्वे त्रिनवतिः ।१८
त्वत्रस्य योनिरित्यत्र समुद्रे ते उताप: पुत्रमिव पितर
निषसाद यदि जाग्रद्यदापो यदि दिवेति यद्ग्रामे
मिन्द्रियाणो यत् सुरामं नवैकाशीतिः ॥ २० ॥ इमं
इत्यत्र तत्त्वा यन्नो व्वाजेवाजेऽवत होतायक्षदिन्द्रम्
षभस्य सरस्वतीमपस्येति प्रविष्टा: सप्तपञ्चाशत् ॥२१
तेजोऽसीत्यत्र तत्सवितुर्व्विश्वो देवस्य पृथिव्यै स्वाहा म
भवे स्वाहा व्वाजाय स्वाहाऽसवे स्वाहेति प्रविष्टाऽएक
विंशतिः ॥२२॥ हिरण्यगर्भऽइत्यत्र कः स्विदसूर्य्यऽएका
की का स्विद्द्यौरासीत्प्रजापते न सप्तपञ्चाशत् ॥२३
मादन्त्विरित्यत्र हिरण्यगर्भ: सँय्य: प्राणतोऽग्ने
त्वं चतुश्चत्वारिंशत् ॥ २५ ॥ अग्निश्चेत्यत्र वैश्वा
नरो नः पञ्चविंशत् ॥ २६ ॥ समास्त्वेत्यत्र
इयं चतुश्चत्वारिंशत् ॥ २७ ॥ होता यक्षदित्यत्र दे
वा दैव्या होतारा शुचिमुष्णिहानन्तरं सर्वं लुप्त
अन्तस्त्रिपञ्चाशत् ॥ २८ ॥ देव सवितरित्यत्र तत्सवि
तुर्विंशत् ॥ ३० ॥ अस्माजरासऽइत्यत्र युद्वा हि त्वय
मिह मूर्द्धानन्दिवऽउदुत्यं विश्वेऽअदेन्द्रवायूऽइमे युञ्जे
देवानां गावऽउप दैव्यावध्वर्य्यूऽअदब्धेभि: सवित: सप्त

शीतिः । ३३ । यज्जाग्रतऽइत्यत्नाकृष्णेन सप्तपञ्चाशत् । ३४ । अपेतऽइत्यत्नाश्वत्थे वः सुमित्रिया नऽउद्वयमग्नऽआयूꣳषीत्यष्टादश । ३५ । ऋचँवाचमित्यत्र भूर्भुवः कया नः कस्त्वा स्योना पृथिव्यापोहिष्ठेति त्रिर्नमस्ते हरसे सुमित्रिया नोऽभीषुणो दृते दृꣳहमेति त्रयोदश । ३६ । देवस्य त्वेत्यत्र देवी द्यावापृथिवीन्द्रस्यौजोऽश्वस्य त्वेयत्यग्रे हृदे त्वा युञ्जते मनः प्रैतु मखस्य शिरस्त्रयोदश । ३७ । द्वितीयदेवस्य त्वेत्यत्र सुमित्रिया नऽउद्वयमेधोऽसीडऽएह्यदित्यै रास्नासीन्द्राण्यत्वा षड्द्वाविंशतिः । ३८ । ईशा वास्यमित्यत्नान्धन्तमोऽन्यदेवासम्भूतिमित्नितास्त्रयोऽग्नेनय त्रयोदश । ४० । एवं चतुष्षष्ट्युत्तरशतं लोपाः । एकादशोत्तरमष्टादशशतैः सहेति ॥ इति प्रथमा माध्यन्दिनीयशिक्षा समाप्ता ॥

अथ द्वितीया लघुमाध्यन्दिनं शिक्षा प्रारभ्यते ॥

अथ शिक्षां प्रवक्ष्यामि माध्यन्दिनमतं यथा
कारस्य खकारः स्यात्टुकयोगे तु नो भवेत् ॥
षे लक्ष्यं कृष्णाऽउष्णा समुद्रः प्रत्युदाहृतिः ॥
विद्यमानस्य ह्यसँयुक्तस्य यस्य च ॥ २ ॥ आदेः
जकारः स्यादुक्तः सन्हरणेन तु ॥ यज्ञेन यज्ञं
मयूरे प्रत्युदाहृतिः ॥ ३ तस्माद्यज्ञात्सर्व्वहुत
मस्माद्यज्ञात्तथैव च ॥ रेफेणाथ हकारेण युक्तस्य
या भवेत् ॥ ४ ॥ सूर्य्यां बाह्यन्तु वै लक्ष्यं आढ्य
त्युदाहृतिः ॥ यकारकारयुक्तस्य जकारः सर्वथा
तृ ॥ ५ ॥ सहय्या तथा व्यूह्या चोपसर्गपरः
उपयज्ञम्मानुषाणामपि यन्तीत्युदाहृतिः ॥ ६ ॥
वकारो विज्ञेयः पदादौ पठितो भवेत् ॥ व्वि
दाहृतिर्ज्ञेया सवितान्वृषुः स्मृतः ॥ ७ ॥
वै लघुतरस्तत्र व्याघृततरम्मते ॥ उपसर्गपरो यर
कारो लघुर्मतः ॥ ८ ॥ वो वां वा वै मन्त्रपाठे
गुरवः पदे ॥ प्रवायुमच्छा बृहती व्वातो वेति ।
नम् ॥ ९ ॥ रेफो रेकत्त्वमाप्नोति शषहेषु परे

ददर्शं वर्षौ ऽअर्हीश्च सँय्योगे नैव कारयेत् ॥ १० ॥
व्यम्र्मन्वर्ष्यायान्लह्नं दा तत्र तावदुदाहृतिः ॥ लकारो
ऽपि च सावर्ण्याद्दृकारसदृशो भवेत् ॥ ११ ॥ शतवल्शा-
च वल्हा च तत्र तावदुदाहृतिः ॥ अनुस्वारो यत्र कुत्र
ठं०कारो भवति ध्रुवम् ॥ १२ ॥ ह्रस्वो दीर्घो गुरुश्चेति
त्रिविधः परिकीर्त्तितः ॥ ह्रस्वात्परो भवेद्दीर्घो ह्रठं०स
ऽइति दर्शनम् ॥ १३ ॥ दीर्घात्परो भवेद्ध्रस्वो मा ꣳ स-
थ्यऽइति दर्शनम् ॥ गुरौ परे अनुस्वारो गुरुरेव हि स
स्मृतः ॥ १४ ॥ सि ꣳ ह्यसीति तत्र तावद्दकारे दी-
र्घऽएव सः ॥ देवाना ꣳ हृदये तद्वत्स्वराणां तथा
सूक्ते ॥ १५ ॥ अथायोगवाहानाह ॥ अवर्णाच्च ऋका-
राच्च विसर्गः कण्ठ्य एव सः ॥ इवर्णाच्च तथोवर्णात्तथा
चैकारपूर्वकः ॥ १६ ॥ औकारपूर्वकश्चैव तालव्यो भवति-
ध्रुवम् ॥ एकाराच्च कण्ठतालुर्विसर्गो भवति ध्रुव-
म् ॥ १७ ॥ कण्ठोष्ठ्यस्तु तथौकाराद्विसर्गो भवति ध्रु-
वम् ॥ देवो वः सविता चात्र हकारसदृशो भवेत् ॥
१८ ॥ देवीस्तिस्रो विसर्गस्तु हिकारसदृशो भवेत् ॥
आयुस्ते पशुरित्यादौ हुकारसदृशो भवेत् ॥ १९ ॥
विसर्गस्याग्नेरित्यादौ हेकारसदृशो भवेत् ॥ विसर्गो
वायोरित्यादौ होकारसदृशो भवेत् ॥ २० ॥ अथ
खैर्हंत्वैरित्यादौ हिकारसदृशो भवेत् ॥ विसर्गो द्यौ-

कथं व्वदेत् ॥ ९ ॥ अथ प्रथमतो वर्णसञ्ज्ञाऽभिक्रियते मया ॥ यया विना न सिद्ध्यन्ति व्यवहारा नृणामिह ॥ १० ॥ एकविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः ॥ द्विगुणानि व्यञ्जनानि ह्येतावान्वर्णसङ्ग्रहः ॥ ११ ॥ ऋटपर्य्यन्ताः स्वरास्तेषां ऌकारो ह्रस्वएव च ॥ सन्ध्यचराण्यह्रस्वानि ते चैवमेकविंशतिः ॥ १२ ॥ ककारादिमकारान्ताः स्पर्शाः स्युः पञ्चविंशतिः ॥ चतस्रो यादयोऽन्तस्था ऊष्माणः शषसाः (१) सहाः ॥ १३ स्पर्शानां पञ्चमैर्य्योगे चत्वारश्च यमाः स्मृताः ॥ अनुस्वारो विसर्गश्च जिह्वामूलीयऽएव च ॥ १४ ॥ उपध्मानीइति च द्विस्पृष्टश्च तथाऽपरः ॥ द्विस्पृष्टता च विज्ञेया डढयोः स्वरमध्ययोः ॥ १५ ॥ पदकाले वियुज्येत द्विस्पृष्टो न भवेत्तदा ॥ सव्यञ्जनः सानुस्वारः शुद्धो वाऽपि स्वरोऽक्षरम् ॥ १६ ॥ चतुर्णां पञ्चमैर्य्योगे उत्पद्यन्ते यमाश्च ये ॥ कुँ खुँ गुँ घुँ इति च ते चत्वारो नात्र पञ्चमः ॥ १७ ॥ वर्गाणां प्रथमौ द्वौ द्वावूष्माणश्च हवर्जिताः ॥ जित्सञ्ज्ञा भवन्त्येते शेषा धिसञ्ज्ञकाः स्मृताः ॥ १८ ॥ शषसा मुत्समाख्याता अवर्णः कण्ठ्यसञ्ज्ञकः ॥ सिस्सञ्ज्ञका ऋटपर्य्यन्ता भावी स्यात्काराद्यवर्ज्जितः ॥ १९ ॥ अन्त्याद्वर्णाद्भवेद्वर्णः पूर्वः स उ-

पद्माभिधः ॥ एताः सञ्ज्ञा बुधैर्ज्ञेया व्यवहारप्रसिद्धये ॥ २० ॥ ळळ्हजिह्वामूलभवोपध्मानीयस्तथैव च ॥ नासिक्याश्च तथा चास्मिन्वर्णा वर्ज्याः सदैव हि ॥ २१ ॥ एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ॥ त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रिकम् ॥ २२ ॥ तदर्द्धमणु तस्यार्द्धं परमाण्वभिधीयते ॥ वर्णग्रहे सवर्णोऽपि सङ्ख्या स्पर्शेषु कीर्त्तिता ॥ २३ ॥ अथ वर्णसमाम्नाये स्थानं करणसँय्युतम् ॥ आत्मशक्त्या प्रवक्ष्येऽहं तल्लक्ष्यमघं बुधैः ॥ २४ ॥ अष्टौ स्थानानि वर्णानामुरः कण्ठशिरस्तथा ॥ जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ २५ ॥ हकारः पञ्चमैर्य्युक्तो योऽन्तस्थाभिरथाऽपि वा ॥ औरस्यं तं विदुः प्राज्ञाः कण्ठ्यं शुद्धं प्रचक्षते ॥ २६ ॥ ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव च ॥ जिह्वामूले भवन्त्येषां जिह्वामूलं च कारणम् ॥ २७ ॥ इवर्णोऽथ चवर्गश्च एऐकारौ यशैः सह ॥ तालुस्थाना भवन्त्येषां जिह्वामध्यं तु कारणम् ॥ २८ ॥ षकारोऽथ टवर्गश्च मूर्द्धन्याः परिकीर्त्तिताः ॥ जिह्वायाः प्रतिवेष्ट्याग्रमेतेषां कारणं स्मृतम् ॥ २९ ॥ ऌलसिताः स्मृता दन्त्या जिह्वाग्रकरणा हि ते ॥ रेफस्य दन्तमूलोत्थो जिह्वाग्रेण विधीयते ॥ ३० ॥ उवर्णो-

स्मृता वर्णा उपध्मानीय एव च ॥ ३१ ॥ समान
करणा नासिक्यौष्ठ्याः प्रकीर्त्तिताः ॥ वकार ओ
तो दन्ताग्रकरणः स्मृतः ॥ ३२ ॥ अवर्णश्च
हकारश्चापि केवलः ॥ कण्ठ्या वर्णाः स्मृता ह्ये
नुमध्यं तु कारणम् ॥ ३३ ॥ यमानुस्वारनासिक
सामूलभवा दृशा ॥ मुखनासिकाकरणोऽनुना
ति स्मृतः ॥ ३४ ॥ पूर्वा मात्रा तु कण्ठ्यस्य एका
रयोर्भवेत् ॥ तालव्यस्य तथौष्ठ्यस्य परा प्रोक्ता य
मम् ॥ ३५ ॥ ऐकारौकारयोश्चैवं तत्त्वं ज्ञेयं
णैः ॥ एऐ तु कण्ठ्यतालव्यौ ओऔ कण्ठोष्ठजौ
३६ ॥ एतद्वर्णसमाम्नायस्थानं करणसंयुतम् ॥
व्यं तन्मया प्रोक्तं शास्त्रतत्त्वार्थदर्शनम् ॥ ३७ ॥
द्यस्य भवेत्स्थानं करणं वा विशेषणम् ॥ सवर्णं
ङ्ग्राह्य आस्ययत्नस्तु भिद्यते ॥ ३८ ॥ संवृतं
तद्वदस्पृष्टं स्पृष्टमेव च ॥ ईषत्स्पृष्टं चार्द्धस्पृष्टमा
स्तु षड्विधः ॥ ३९ ॥ अकारः संवृतो ज्ञेयो वि
तरे स्वराः ॥ अस्पृष्टाख्यप्रयत्नाश्च स्वराः सर्वे
हि ॥ ४० ॥ स्पृष्टाः स्पर्शास्तु विज्ञेया अन्तस्था
त्स्पृशः ॥ अर्द्धस्पृष्टाश्च विज्ञेया ऊष्माणो वर्णा वे
४१ ॥ ऋलोर्मध्ये भवत्यर्द्धमात्रा रेफलकारयो

मात्रस्यैकमात्रस्य सँवृतादिप्रयत्नतः ॥ भिन्नस्याप्यस्तु सावर्ण्यं तदर्थमिदमुच्यते ॥ ४३ ॥ अथातोऽवरतो वच्मि चर्चां पूर्वपराङ्गयोः ॥ सारप्रयोजना चासौ वेदितव्या विचक्षणैः ॥ ४४ ॥ सँय्योगस्यादिभूतो यः स पूर्वाङ्गं भवेद्यथा ॥ अश्वः शश्वसँय्योगे शः पूर्वाङ्गः शवोऽन्यतः ॥ ४५ ॥ यमश्च पूर्वस्याङ्गं स्याद्यकारात्पूर्वसंय्युतः ॥ रुक्मः पूर्वस्य कयमावुत्तरस्य तु मः स्मृतः ॥४६॥ सँय्योगादिपरद्वित्वे पूर्वाङ्गं क्रमजं यथा ॥ पार्श्वं रशौ तु पूर्वस्य परस्य शवयात्मकम् ॥ ४७ ॥ क्रमजाच्चोत्तरं स्पर्शं परे पूर्वाङ्गकँय्यथा ॥ पाष्ण्यां पूर्वस्य रषणाः परस्याङ्गं णयात्मकम् ॥ ४८ ॥ यद्व्यञ्जनं च यस्याङ्गं तत्तेन सस्वरं भवेत् ॥ एतदर्थमिदं प्रोक्तं सारसन्देहभेदकम् ॥ ४९ ॥ अनुस्वारो विसर्गश्च नासिक्योऽथ यमास्तथा ॥ जिह्वामूलमुपध्मा च नवैते स्युः पराश्रयाः ॥ ५० सँय्योगबाह्या एवैते निजस्वरविवर्जिताः ॥ पूर्वस्याङ्गं भवन्त्येते स्वर एतेषु पूर्ववत् ॥ ५१ ॥ स्वरभक्तिश्च पूर्वाङ्गं देवबर्हिरुदाहृतिः ॥ ऋकारे च तथोकारे तां यत्नेन विवर्जयेत् ॥ ५२ ॥ रेफो वाऽथ लकारो वा यत्रोष्मणि स्वरोदये ॥ स्वरभक्तिर्भवेत्तत्र पूर्वमाक्रम्य पठ्यते ॥ ५३ ॥ ऊष्मणामुपरिस्थस्तु रेफो याति रेवर्णताम् ॥ रेफत्वं पुनरायाति यद्यूष्माणोऽन्य-

सँय्युताः ॥ ५४ ॥ ऊष्मणां स्वरभक्तिस्तु द्विर्भावं बाधते यथा ॥ व्वर्षो व्वर्षीयसि ह्वार्षोऽकृतवल्शोऽपि सिध्यति ॥ ५५ अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव च लक्षणम् ॥ जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टस्तदनन्तरम् ॥ ५६ ॥ तैरोव्यञ्जनऽएवाथ तैरोविराम एव च ॥ पादवृत्तस्तत्तद्वत्ताथाभाव्यस्तथाऽष्टमः ॥ ५७ ॥ एकपदे निपूर्वस्तु सयवो जात्यदृष्यते ॥ अपूर्व्वोऽपि परस्तद्वद्धान्यं कन्या स्वरित्यपि ॥ ५८ ॥ सप्तोदात्तादयो ज्ञेया परेऽभिनिहितादयः ॥ यथो नीचपरास्तत्र प्रश्लिष्टान्तं निदर्शनम् ॥ ५९ ॥ एओ आभ्यामुदात्ताभ्यामकारो नीच एव च ॥ लुप्यते सन्धिकार्य्ये यत्तं चाभिनिहितं विदुः ॥ ६० ॥ तेऽन्सरसां च तेऽवन्तु व्वेदोऽसीति तथोऽस्यपि ॥ इउ वर्णावुदात्तौ चेदनुदात्तस्वरोदयौ ॥ ६१ ॥ यवाभ्यां चैव सँयुक्तौ तदा क्षैप्रः स्वरो भवेत् ॥ व्वाज्यर्व्वंस्त्र्यम्बकँय्यद्दद्भ्नो योजान्विन्द्रेति च ॥ ६२ ॥ उच्चः पूर्व्वः परो नीच इकारोऽन्योऽन्यसङ्गतः ॥ प्रश्लिष्टः स स्वरो ज्ञेयः स्रुचीवाभीन्धतांय्यथा ॥ ६३ ॥ उदात्तपूर्व्वो यत्र स्यान्नीचो व्यञ्जनसँय्युतः ॥ स तैरोव्यञ्जनइति स्वरो भवति तद्यथा ॥ ६४ ॥ इडे रन्ते हव्ये काम्ये चन्द्रे ज्योते निदर्शनम् ॥ उदात्तावग्रहो यत्र स तु तैरोविरामकः ॥ ६५ ॥ स्वरो ज्ञेयः पदेऽन्यत्र तैरोव्य-

ज्ञनएव तु ॥ यथा गोपताविति गोपतौ यज्ञपतिस्त-
था ॥ ६६ ॥ स्वरयोरन्तरे यत्र विवृत्तिर्यदि दृश्यते ॥
सा पादवृत्त इत्याख्यः काङ्क्षमरे निदर्शनम् ॥ ६७ ॥ उ-
दात्तादिष्वदात्तान्तो नीचोऽवग्रह एव च ॥ ताथाभा-
व्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् ॥ ६८ ॥ माध्यन्दि-
नविरोधी स्यात्ताथाभाव्यस्तु यः स्वरः ॥ भिन्नो यतो-
ऽत्र दृश्येते तावुदात्तानुदात्तकौ ॥ ६९ ॥ तस्मान्माध्य-
न्दिनीयानां पदे कम्पो विधीयते ॥ तथोक्तमौञ्जिहा-
यनकैर्माध्यन्दिनानुसारिभिः ७० ॥ अवग्रहो यदा नी-
चप्रोच्चयोर्मध्यतः क्वचित् ॥ तथाभाव्यो भवेत्कम्पस्तनू-
नप्त्रे निदर्शनम् ॥ ७१ ॥ जात्याभिनिहितक्षैप्रप्रश्लिष्टाः
स्वरिता इमे ॥ नीचपूर्वा यदा त्वेते तिर्य्यक्स्वारस्तदा
भवेत् ॥ ७२ ॥ जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च च-
तुर्थकः ॥ एते स्वराः प्रकम्पन्ते दृष्ट्वोदात्तं पुरः स्थित-
म् ॥ ७३ ॥ यथा व्यक्ताः पस्त्या स्वा युञ्ज्योऽस्माकम्न्त-
थाऽपरम् ॥ परमेष्ठ्यभिधीतोऽभीममित्यादि निदर्श-
नम् ॥ ७४ ॥ नीचपूर्वोदात्तपरः स्वरोऽसौ प्रणिहन्यते ॥
अन्यथा नीचएव स्यात्स्वर्गो घर्म्मादिकँय्यथा ॥ ७५ ॥
स्वरितादनुदात्तं यत्तत्सर्वं प्रचयाह्वयम् ॥ स्यादुदात्त-
मयं चैव त्वामद्येत्यादिकँय्यथा ॥ ७६ ॥ तिर्य्यक्स्थान-
गते ह्रस्वेऽनुदात्तो दृश्यतेऽपरः ॥ प्रचितं तँव्विजानी-
यादुदात्तं स्वरमाप्नुयात् ॥ ७७ ॥ जात्यं कृत्वा ततः

पश्चात्प्रचितो दृश्यते यदि ॥ तन्तु तत्रैव निवर्त्य पश्चाद्धस्तं प्रचालयेत् ॥ ७८ ॥ नोदात्तस्वरितात्पूर्वं प्रचितं स्यादुदात्तवत् ॥ कृत्वानुदात्तमथ तमुदात्तस्वरमाचरेत् ॥ ७९ ॥ यथा स्यात्स्वरितात्स्वारो व्याजे वाजेऽवतेति च ॥ स्वरितोदये सेनानी ग्रामण्यौ, सहस्राय च॥ ८० ॥ तैरोव्यञ्जनवज्ज्ञेयो जात्योऽभिनिहितः प्रचः ॥ यथा धान्यं कन्या इव व्येदोऽसीति तथोऽस्यपि ॥ ८१ ॥ व्यसरोऽसि भवेत्तद्वद्वाज्यर्व्वंश्च स्रुचीव च ॥ उदात्तस्वरितपरप्रचितस्यापि नित्यशः ॥ ८२ ॥ भवेन्नीचतरादेशो वैयाकरणसम्मतः ॥ स्वरिताद्वाऽनुदात्ताद्वा उदात्तो दृश्यते यदि ॥ ८३॥ शून्यं प्रचालयेद्धस्तं स्वरितात्स्वरितेऽपि च ॥ शून्यं प्रचालयेद्धस्तं यदुक्तं केन चित्क्वचित् ॥ ८४ ॥ तत्सातीयविरोधी स्यात्सम्प्रदायविरोधकृत् ॥ उक्तं च याज्ञवल्क्येन मन्त्रे वाजसनेयके ॥ ८५ ॥ स्वरउच्चः स्वरो नीचः स्वरः स्वरित एव च ॥ स्वरप्रधाने त्रैस्वर्य्यँ व्यञ्जनं तेन सस्वरम् ॥ ८६ ॥ मणिवद्व्यञ्जनान्याहुः सूत्रवत्स्वर इष्यते ॥ व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति सस्वरः ॥ ८७ ॥ वर्णेषूच्चार्य्यमाणेषु विकाराः स्युस्त्रयस्तनोः ॥ आयाममार्द्दवौ चोभौ तृतीयश्चाभिघातकः ॥ ८८ ॥ गात्रस्योच्चमधस्तिर्य्यग्गमनं स्यादतः क्रमात् ॥ तत्रोदात्तेऽनुदात्ते च

स्वरिते च प्रकीर्त्तितम् ॥ ८९ ॥ उभयवांश्च स्वरित एकीभावेऽन्ययोर्भवेत् ॥ यथा पत्येव चक्षीव ब्रह्माऽसृज्यत स्त्यवे ॥ ९० ॥ अथोदात्तोऽनुदात्तस्य स्वरितस्यापि सङ्क्रमे ॥ उदात्त एकी भवति षट् प्रकारः स नान्यथा ॥ ९१ ॥ द्वयोस्तु स्वरयोस्सन्धावेकीभावो यदा भवेत् ॥ तदा नीचोऽप्युदात्तस्य वशं गच्छति सान्वयः ॥ ९२ ॥ उदात्तयोरथैकत्वे भवेदुदात्तएव च ॥ स पुरस्तात्परस्ताद्वा यथा स्वात्मा प्यर्यत्विति ॥ ९३ ॥ एमे तन्नैजति परं व्विभ्वाभ्यस्त्वा पुनस्तथा ॥ नाभिरूपस्याथ मेऽङ्गानि जयन्तन्त्वां तथैव च ॥ ९४ ॥ पाप्मनोऽति देवाऽगात्पूर्वाऽगाद्बर्हिराऽसदत् ॥ आऽरुहा माऽदधुराख्याद्विद्यादेवं निदर्शनम् ॥ ९५ ॥ अस्यापवादरूपं यदुदाहरणमुच्यते ॥ आख्यातानां प्रयोगेषु पूर्वं पदमुपस्थितम् ॥ ९६ ॥ षोडशाक्षरपर्यन्तं तद्योगि स्वरमुद्धरेत् ॥ यां २ ॥ ऽ आऽवहो यदावध्न्यो नः पिता तथाऽपरम् ॥ ९७ ॥ यत्पुरुषं व्यदधुश्च विद्यादेवं निदर्शनम् ॥ जात्यपूर्वोदात्तपरो ह्युत्तो भवति नित्यशः ॥ ९८ ॥ यथाऽदूरयेऽवसेऽपि स्यात् ज्ञातव्यं स्वरवेदिभिः ॥ स्वर्ग्योऽत्र स्वरितपरोदात्तपूर्वो यथा भवेत् ॥ ९९ ॥ स्वरितोदात्तयोः सन्धावुदात्तो बलवान्स्मृतः ॥ हित्वाऽभिनिहितक्षैप्रप्रश्लिष्टांस्त्रीनिमान्स्वरा-

त् ॥ १०० ॥ वीइध्रश्चानुदात्तपूर्वोदात्तपरो यथा भ-
वेत् ॥ स्कन्धीय स्वरितपरोदात्तपूर्व्वः पदे यथा ॥
१०१ ॥ सर्वतोच्चो ऽभिनिहितः प्रश्लिष्टस्तदनन्तरम् ॥
ततो मृदुतरौ स्वारौ जात्यक्षैप्रावुभौ स्मृतौ ॥ १०२ ॥
ततो मृदुतरः स्वारस्तैरोव्यञ्जन उच्यते ॥ पादवृत्तो
मृदुतरस्त्वेतत्स्वारबलाबलम् ॥ १०३॥ द्वयोस्तु स्वरयो-
र्मध्ये स्वरितः स्यात्परो यदि ॥ उदात्तश्चान्त्योभावे
प्रोच्यते त्र्यम्बकं यथा ॥ १०४ ॥ योऽजान्विन्द्र वीडु
कोऽग्नः सप्तिंस्तथाऽपरः॥ नियमः स्वरसन्धेस्तु समासो
विदुषां प्रियः॥१०५॥अथाऽतः संस्कारविधिः कथ्यते यो
मयाऽधुना ॥ लोपागमौ विकारश्च प्रकृत्या भवनं त-
था ॥ १०६ ॥ ज्ञातव्यो निपुणैरेवं संस्कारोऽसौ चतु-
र्विधः ॥ स्वरयोर्वा हलोर्वाऽपि स्वरव्यञ्जनयोरत ॥१०७॥
ते नोऽवन्त्वव देवासऽएदमापोऽअपान्नपात् ॥ देवान-
ऽआयुः प्र ऽइन्दु सोमस्तन्नश्चिकित्वान्वयथा ॥ १०८ ॥
प्रथमात्तु हकारोऽयं तच्चतुर्थत्वमाप्नुयात् ॥ उद्धर्षयावा-
द्धुढव्यानि तत्रैवं निदर्शनम् ॥ १०९ ॥ आद्यः स्व-
रे तृतीयत्वं घोषवत्सु त्वपञ्चमः ॥ अघोषे प्रथमत्वं वा
उद्देनं युञ्जामि अपि ॥ ११० ॥ पदान्ताः प्रथमा वर्णाः
परतोः स्वरघोषिणोः ॥ भजन्ते स्वतृतीयत्वं स्वोत्तमत्वं
यथोत्तमे ॥ १११ ॥ आद्योत्तमाः पदान्तीयास्त्ववर्गे प-

नम् ॥ ११२ ॥ कखयोः परयोर्नित्यं पफयोः परयोर-
पि ॥ विसर्गस्य यदुक्तन्तल्लक्षणान्नात्र सिद्ध्यति ॥ ११३ ॥
मयि वः कामधरणं ततः खनेम चाऽप्यथ ॥ अग्निः
पशुर्य्याः फलिनीर्विद्यादेवं निदर्शनम् ॥ ११४ ॥ अ-
ग्नेनिष्पारसमरोर्द्यौष्पिता च वसुष्कविः ॥ आविष्कृ-
णुष्वेत्र तथा परो वो व्यसतिष्कृता ॥ ११५ ॥ एव मा-
दौ विसर्गस्य षत्वमिच्छन्ति सूरयः ॥ पूर्वोक्तस्यापवा-
दोऽयं ज्ञातव्यः कृतबुद्धिभिः ॥ ११६ ॥ कण्ठ्योपधः स-
कारः स्याद्भाव्युधः ष एव च ॥ अघोषे घोषवति तु लो-
पो रेफो यथाक्रमम् ॥ ११७ ॥ इडस्पदेडायास्पदं
ज्योतिष्कृद्दिष्कृतिस्तथा ॥ तत्र ऽइन्द्रोऽग्रत्मा मा
हविर्हीतन्निदर्शनम् ॥ ११८ ॥ भाव्युपः षत्वमेति व-
र्जयित्वा कृपीस्कृधिम् ॥ प्रत्ययस्य सवर्णत्वं यातीति
शाकटायनः ॥ ११९ ॥ अविकारं च शाकल्यो मन्यते
शषसेषु च ॥ आशुः शिशानो वृषभो देवो वः सवि-
ता तथा ॥ १२० ॥ अदितिः षोडशेत्यादिर्विज्ञेयोदा-
हृतिर्विदा ॥ पदान्ताः प्रथमा वर्णाः शषसेषु परेषु
तान् ॥ १२१ ॥ शौनको द्वितीयानिच्छेत्प्रकृत्या शा-
कटायनः ॥ असमानस्थलस्यास्मेच्छौनकोऽपि वदेत्तदा ॥
१२२ ॥ सप्तकृत्त्ववन्ती वट्सृव्यनुष्टुप्शारद्यापरम् ॥

तत्सवितुश्च तत्सत्यन्द्वितीयं नात्र कर्हिचित् ॥ १२३ ॥
असस्थानस्थितत्त्वाच्च तैत्ताणां तु न तन्मतम् ॥ पदान्तस्य
तवर्गस्य चवर्गे परतः स्थिते ॥ १२४ ॥ चवर्गः स्यात्त-
कारस्य चछयोः शागमः स्मृतः ॥ शकारश्छत्वमाप्नोति
तवर्गात्स्पर्शवर्ज्जितः ॥ १२५ ॥ तस्यचतुर्जिह्वानाश्च
तच्छ्रेयमतः परम् ॥ वृहच्छोचा यविष्ठ्यं तिवाजाञ्च-
यत्त्वगापरन् ॥ १२६ ॥ तकारस्य पदान्तस्य शकारे
परतः स्थिते ॥ चवर्गपञ्चमत्वं स्यान्नच्छादेशे तु शाग-
मः ॥ १२७ ॥ स्वधावाञ्छुक्रः पिशङ्गाञ्छिशिरायेति
वै तथा ॥ आदित्याञ्छ्मश्रुभिन्नीन छत्वं स्यात्स्पर्शभ-
ङ्गया ॥ १२८ ॥ दधन्वान्स्वनान्यश्चारे न कारो लो-
पमाप्नुयात् ॥ पीवोऽन्नान् रयिदृधे परे वाऽपि तथा
पुनः ॥ १२९ ॥ स्वराणामानुनासिक्यं प्रतिजानन्ति
सर्वतः ॥ वर्ज्जयित्वा तमाकारं(१) मकारो यत्र लुप्यते ॥
१३० ॥ उपधारञ्जनं कुर्यात्स्वरे विकरणे सति ॥ लो-
पे प्रकृतिभावे च नोपधारञ्जनं भवेत् ॥ १३१ ॥ प-
दान्तस्थो नकारो यः सोऽनुनासिकपूर्वकः ॥ लकारे
लत्वमाप्नोति शसत्वं चतकारयोः ॥ १३२ ॥ यथाऽ-
स्मिँल्लोके चीँल्लोकान्हीँश्च सर्वानच्युत ॥ गवयाँस्त्वष्टे प-
शूँस्ताँश्चक्रे चैव निदर्शनम् ॥ १३३ ॥ स्पर्शे परे नका-

(१) यत्र लोपो विधीयते । इति 'ग' पुस्तकपाठः ॥

रस्य विकारो नोपलभ्यते ॥ चतौ विहाय तत्राऽपि प्र-
कृत्या भवनं क्वचित् ॥ १३४॥ यथाऽस्मिन्गोष्ठेऽक्कन्क-
र्म्मं देवान्दिवमथापरम् ॥ पशून्नपाहीति जानीयान्न-
कारस्यैकरूपताम् ॥ १३५ ॥ धामन्ते पतयिष्णवन्वन्
ग्रन्त्वाढि तथाऽपरम् ॥ मिन्न मह्वशिक्षिकित्वान्वम्पूपन्तव
व्रते तथा ॥ १३६ ॥ मदिन्तमानां च मधुन्तमानां
तद्विते तमे ॥ निर्ज्जगन्वान्तमसि च न विकारो भवे-
दिह ॥ १३७ ॥ एते निपातसिद्धत्वान्न विकारमवा-
प्नुयुः ॥ नृन्पकारे विसर्गत्वमुपधारञ्जनं लभेत् ॥
१३८॥ ग्रन्त्वन्क्रतून्वनस्पतीन्परिधीँश्च चतुर्थकम् ॥ स्व-
रे रेफत्वमाप्नोति नासिक्यं चोपधा तथा ॥ १३९॥ अ-
नुस्वारश्च रोष्मसु मकारस्येति यो विधिः ॥ पदयो-
रन्तरे सः स्यात्पदमध्ये तु नस्य च ॥ १४० ॥ यथाऽपा-
ऴ् रसं चैव त्वाऴ् ग्रभ्णन्तऽएव च ॥ यजूऴ्षि तपूऴ्षि-
ऊर्ठ्ं॰हीति निदर्शनम् ॥ १४१ ॥ पदान्तीयमकारस्य
त्वन्तस्थाः परतो यदि ॥ नासिक्यमुपधापूर्वं सोऽन्त-
स्थात्वमवाप्नुयात् ॥ १४२ ॥ सँय्यौमि संव्वपामीति तँ-
ल्लोकं च यथा भवेत् ॥ अपदान्तस्य रेफे न यद्रम्णोऽ-
ऽतिसर्प्पति ॥ १४३ ॥ एकमात्रो द्विमात्रः स्यात्त्रिमा-
त्रान्मात्रिको यथा ॥ त्वर्ठ्ं॰ सोम ह्वीऴ्षि सऴ्स्रष्टा
न संय्युजि ॥ १४४ ॥ अनुस्वारो द्विमात्रः स्याद्दवर्णो

व्यञ्जनोदयः ॥ ह्रस्वाद्वा यदि वा दीर्घाद्देवानाठं० हृदये यथा ॥ १४५ ॥ मकारः प्रत्यये स्पर्शभवेत्तद्व-र्गपञ्चमः ॥ व्रजङ्गच्छ व्रतञ्चरिष्यामि षाण्डस्तथा पुनः ॥ १४६ ॥ एतन्नेदम्मित्थव्यस्य यच्छन्नाम्पञ्च वै यथा ॥ संय्योगादिः स्वराद्द्वित्वं प्राप्नोतीति विदुर्बुधाः ॥ १४७ ॥ तत्पदान्तपदाद्योर्वा पदमध्येऽपि सर्व्वतः ॥ सम्यक्स्रवन्ति सरितः सन्धौ तु पदयोर्य्यथा ॥ १४८॥ अनुष्टुप्शारदी तद्वत्प्रथमस्तु द्विकल्पिजः ॥ मध्येऽश्व-स्तूपरो यद्वदश्वस्य त्वा तथाऽपरम् ॥ १४९ ॥ अस्वरा-न्न भवत्येतत् अधि श्रुत्कर्सीवद्यथा ॥ परं रेफहका-राभ्यां व्यञ्जनं तूष्मवर्ज्जितम् ॥ १५० ॥ द्वित्वमाप-द्यते रेफहकारौ तु न कुत्र चित् ॥ यथा सूर्य्योऽथ सर्व्वेभ्यो बाह्योर्गृह्णामि चैव हि ॥ १५१ ॥ ऊष्माणो रेफसङ्क्रान्ता न द्विः स्युस्तत्स्वरोदयाः ॥ यथाऽर्शसदुप-चितां वर्षो वर्षीयसीति च ॥ १५२ ॥ सहस्रशीर्षा पुरुषो देवबर्हिर्य्यथा स्मृतम् ॥ अन्तस्थाभिर्य्यदा युक्ता ऊष्माणो रेफपूर्व्वकाः ॥ १५३ ॥ वर्ष्यीय चान्तः पा-र्श्वयञ्च रेफाद्द्वित्वं भजन्ति ते ॥ ऊष्मान्तस्थापरः स्पर्शो द्वित्वमापद्यते यथा ॥ १५४ ॥ अश्मन्नूर्जं सस्नितमं धिष्ण्या राष्ट्रं च गृह्णते ॥ यकारात्स्पर्श-संय्योगो नोपलभ्येत कुत्र चित् ॥ १५५ ॥ प्रत्यक्षि-

स्य दधिक्राव्णाः पुरुराव्णास्तथैव च ॥ यदि चाक्षरपूर्व्वाः स्युरूष्मान्तस्था न तत्परः ॥ १५६ ॥ स्पर्शो द्वित्वमवाप्नोति स्थालीभिर्द्दिवः क्रुम्मनीः ॥ यत्र चोभयतः स्पर्शैः संयुक्ताः प्रथमाः सदा ॥ १५७ ॥ तत्र नाद्यः क्रमो ज्ञेयो नापरो बोधितो बुधैः ॥ पञ्चमाणि वाऽथ सुज्ञा च विश्वप्स्न्या च तथा पुनः ॥ १५८ ॥ नेदृशेषु द्विरुक्तिः स्यादिति प्राज्ञैर्म्मनीषिणः ॥ जिह्वामूलीयतः स्पर्श उपध्मानीयतस्तथा ॥ १५९ ॥ सऽद्भुवानो व्वसुष्क विर्द्दौष्पतेत्यादिकँव्यथा ॥ विसर्ज्जनीयाच्च परो यः स्पर्शो व्यञ्जनोदयः ॥ १६० ॥ सोऽपि द्वित्त्वमवाप्नोति युञ्जानः प्रथमँव्यथा ॥ सकारस्य द्विरुक्तिर्य्या सा द्वयोरेव नान्यतः ॥ १६१ ॥ आ च प्रास्वा च रास्वेयत्सकारोऽत्र द्विरुक्तितः ॥ ह्रस्वपूर्व्वा ङनौ स्यातां पदान्तौ द्विः स्वरोदयौ ॥ १६२ ॥ युङ्ङसीति तथा चाप्सन्नूर्ज्जमित्यादिकँव्यथा ॥ प्रथमैस्तु स्ववर्ग्गीयैर्द्वितीया द्विर्भवन्ति हि ॥ १६३ ॥ तृतीयैस्तु चतुर्थास्तु व्विकल्पायाजिघ्रकँव्यथा ॥ उख्यं सख्यं च मुख्यं च वर्जयित्वा पदत्रयम् ॥ १६४ ॥ ख्याधातोः खययोः स्यातां कग्गौ गार्ग्यमते यथा ॥ व्विकख्याऽऽकशातमित्येतन्माध्यन्दिनविरोधकृत् ॥ १६५ ॥ व्विकख्याय कखया युक्तास्तकया

यसँय्युतम् ॥ १६६ ॥ विष्फुरन्ती च षप
श्चैवं चतुर्थका: ॥ आजिघ्रगधरायुक्ता
उढ्‌ढ्वास्तथा ॥ १६७ ॥ अह्नो दधवाश्चैवं
ङ्भरसँय्युतम् ॥ ऋवर्णे न द्विरुक्तिः स्यात्
विहाय च ॥ १६८ ॥ लृवर्णेऽपि तथैव स्य
चानिष्टतँय्यथा ॥ अवसानस्थितं चापि व्यञ्ज
रुच्यते ॥ १६९ ॥ ऊर्क् सूनृता पदे एवं सं
वार्य्यते ॥ स्वरात्परश्छकारस्तु सर्वत्र द्वित्वम
१७० ॥ यस्यातिहाय सहेति पदत्रयपरं वि
रुक्तिं वर्ज्जयेन्नित्यं यमेऽपि परतः स्थिते ॥ १
कथ्ना देदिश्यते नारी ककारोऽनेकऽएव नि
परे निषेधस्तु पुनर्द्वित्वनिवारकः ॥ १७२ ॥
पाणिमप्रभृतिप्राज्ञस्तेषां मनीषिणाम् ॥ सँ
पूर्वाङ्गं यमस्येति विरोधकृत् ॥ १७३ ॥
तत्साधु नत्वन्यत्कल्पनाक्षमम् ॥ अपञ्चमात
पञ्चमेषु परेषु च ॥ १७४ ॥ यमोत्पत्तिर्भ
क्कमः पाप्मा निदर्शनम् ॥ स्वरात्संय्योगपूर्व्व
ज्जातो द्वितीयकः ॥ १७५ ॥ तस्यैव
स्यात्पञ्चमैरन्वितो यदि ॥ स्पर्शानां पञ्चमैर्य्यो
रोये यमाः स्मृताः ॥ १७६ ॥ अयस्मिखण्डेन
घनबन्धाः प्रकीर्त्तिताः ॥ यमास्तदा निवर्त

मध्ये भवेद्यदि ॥ १७७ ॥ ऊर्णापिण्डेन ते तुल्याः पाशैस्तन्न्यानिदर्शनम् ॥ स्पर्शोऽअपञ्चमा ये च अन्तस्थाभिश्च सँय्युताः ॥ १७८ ॥ दारुपिण्डेन ते तुल्याः सुयबन्धाः प्रकीर्त्तिताः ॥ अपञ्चमे स्ववर्गीये न प्राग्वर्णो द्विरुक्तिभाक् ॥ १७९ ॥ तद्देवानां च यद्देवाऽअन्तरिक्षम्पुरीतता ॥ इद्ध्रवाद्धीनसावेतावुद्ध्राणापि तथैव च ॥ १८० ॥ चरद्द्रव्यस्य वचनो द्वित्वं नैवात्र विद्यते ॥ तत्रट्टनस्तथा श्वित्र चित्र सत्र तथैव च ॥१८१॥ यत्र तत्र पदेष्वेषु व्यञ्जनं न द्विरुच्यते ॥ उपोत्थित-मुत्तम्भनमुत्तभानोत्थिताय च ॥ १८२ ॥ उत्थाय बृहती चैषु त्रयः स्पर्शा भवन्ति हि ॥ वर्णो द्विवर्णसँय्योगे-एकवर्णवदुच्यते ॥ १८३ ॥ स्वरमध्ये सजातीये विजातीये द्वयोः श्रुतिः ॥ कुक्कुटोऽसि तथा तन्नऽआज्यं भुज्युः श्रुतिर्द्वयोः ॥ १८४ ॥ स्पर्शात्परककारस्य स्फोटनं दोषकृन्न वा ॥ अलाचार्याशयाद्द्वित्वं स्फोटनं द्वित्वनाशनम् ॥ १८५ ॥ अयस्पिण्डेन तत्तुल्यं तस्मादुच्चारणं तथा ॥ काण्डात्काण्डादृषट्कतं यक्ष्मोमादिकँय्यथा ॥१८६॥ स्ववर्गीयैस्तु सँय्योगः स्पर्शानां सम्भवेद्यदि ॥ तत्पूर्वस्य श्रुतिर्नास्ति विरामव्यञ्जनस्य च ॥ १८७ ॥ द्वितीयाश्च चतुर्थाश्च वर्णाः सो-

मुखात् ॥ १८८ ॥ तं धारयेत्प्रयत्नेन घनबन्धं समुच्च-
रेत् ॥ सक्थ्ना दद्मस्तथा दद्ध्मा अघ्न्या इति निद-
र्शनम् ॥ १८९ ॥ स्वराः सँय्योगपूर्व्वा ये व्यञ्जनान्ता-
स्तथान्तगाः ॥ एषां कालो द्विमात्रः स्यान्न तु दीर्घा
हि ते स्मृताः ॥ १९० ॥ यथाऽग्निर्नद्धूर्य्यथा विष्णुः
प्रत्यङ् दध्याङ् ऋविस्तुतम् ॥ याहि पाहि रत्न मधु
विद्यादेवं निदर्शनम् ॥ १९१ ॥ व्यञ्जनान्तस्य मोक्षः
स्यात्करणस्थानतः पदे ॥ अन्यदन्यप्रयत्नेन पदमारभ्य-
ते बुधैः ॥ १९२ ॥ अन्यथा तु पदादौ च द्वित्वमाप-
द्यते ध्रुवम् ॥ सँय्यामि सँव्यपामीति इमम्मेति निदर्श-
नम् ॥ १९३ ॥ अर्द्धर्चादेः समाप्तौ च मोक्षणं तु वि-
धीयते ॥ पादच्छन्दोऽनुरोधेन एकद्वित्रिचतुष्पदः ॥
१९४ ॥ अप्यनेकपदैः क्वाऽपि दृश्यते पादपूरणम् ॥
हृदि स्पृशं यथैकस्मिन्पदे स्यात्पादपूरणम् ॥ १९५ ॥
क्रतोर्भद्रस्य द्विपदं क्रतुन्न भद्रमित्यतः ॥ अग्ने
त्वन्नोऽअन्तमस्य विद्यात्पादचतुर्विधम् ॥ १९६ ॥ त्रि-
धूमसग्नेऽनेकपदमेवमादिनिदर्शनम् ॥ ङनकारौ प-
दान्तीयौ सकारे परतः स्थिते ॥ १९७ ॥ कताभ्यां
व्यवधीयेते प्राङ्ङ्क्सोमश्च यथा तथा ॥ प्रत्यङ्क्सोम-
स्तीन्त्समुद्रानस्मान्त्सीते निदर्शनम् ॥१९८॥ "ऋकारे
प्रत्यये कश्चः पाठे ह्रस्वत्वमाप्नुयात् ॥ स्वाह्यऽऋषभमि-

न्द्रोऽथ विश्वकर्म्मऽऋषिस्तथा ॥ १९९ ॥ येनऽऋषय-
ऽइत्यत्र यत्रऽऋषयऽइत्यपि ॥ ह्रस्वे ह्रस्वविधानँय्यत्त-
त्सन्धिविनिवर्त्तकम् ॥ २०० ॥ एओ ऐऔ तु चत्वा-
रः क्रमादेव स्वरे परे ॥ अथवायावतां यान्ति इडऽ-
एहि कृष्णानुवत् ॥२०१॥ सरस्वत्या ऽअग्ग्रजिह्वं ताऽउ-
भौ च यथा क्रमम् ॥ यवयोरत्र लोपः स्यात्स्वरमध्ये
पदान्तयोः ॥ २०२ ॥ अथादौ यवयोर्ल्लोपे न पुनः
सन्धिरिष्यते ॥ असस्थाने वकारस्य लोपन्नेच्छन्ति
सूरयः ॥ २०३ ॥ पादादौ च पदादौ च सँय्योगावग्र-
हेषु च ॥ यः शब्दइति विज्ञेयो योऽन्यः स य इति
स्मृतः ॥ २०४ ॥ युक्तेन मनसा यद्दत्त्वा यामि तथाऽ-
परम् ॥ अनूकाशेन बाह्यञ्च योगे योगे निदर्शनम् ॥
२०५ ॥ उपसर्गपरो यः स पदादिरपि दृश्यते ॥ ई-
षत्स्पृष्टो यथा वि यत्पदच्छेदे परो भवेत् ॥ २०६ ॥
यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ॥ यत्र यत्र
विशेषः स्यादिदानीं स तु कथ्यते ॥ २०७ ॥ वकार-
स्त्रिविधः प्रोक्तो गुरुर्ल्लघुर्लघूतरः ॥ आदौ गुरुर्ल्लघु-
र्म्मध्ये पदस्यान्ते लघूतरः ॥ २०८ ॥ उपसर्गपरौ यत्र
यवकारौ पदादिगौ ॥ ईषत्स्पृष्टौ ततो ज्ञेयावभि यु-
ज्ञ उपा यथा ॥ २०९ ॥ परि वाजपतिः कविः प्रवो-
चं च निदर्शनम् ॥ अनु योजान्विन्द्रते तु उप युञ्ज-

ब्विना तथा ॥ २१० ॥ त्वदर्थ्यंवाचिनौ वो वाँन्वा वै य-
दि निपातजौ ॥ आदेशाश्च विकल्पास्युरीषत्स्पृष्ट
ह्वि ते स्मृताः ॥ २११ ॥ देवो वः सविता या वाँन्वातो
वाऽथ तथा न वै ॥ तव त्वायश्वतस्पतेऽस्ति वान्वा निद-
र्शनम् ॥ २१२ ॥ ह्वयीभावे समुत्पन्ने लक्षणान्निर्ण-
यो भवेत् ॥ लक्षणंवाऽविनाऽपि स्यात्सम्प्रदायोऽविना-
भवान् ॥ २१३ ॥ प्रमाणानुगतं वाक्यं यो मोहाद्वातु
मिच्छति ॥ प्रतिवातं स मूढात्मा पांसुं प्रक्षिपति स्व-
यम् ॥ २१४ ॥ कण्ठ्या वर्णाऽग्निदैवत्यास्तालव्याः
सोमदेवताः ॥ जिह्वामूलीया नैर्ऋत्या रौद्रा दन्त्याः
प्रकीर्त्तिताः ॥ २१५ ॥ ओष्ठ्याश्चैवाश्विना ज्ञेया वाय-
व्या मूर्द्धसम्भवाः ॥ शेषास्तु वैश्वदेवाः स्युरिति कात्या-
यनोऽब्रवीत् ॥ २१६ ॥ क्रियावाचकमाख्यातमुपसर्गो
विशेषकृत् ॥ सत्त्वाभिधायकं नाम निपातः पादपूर-
णः ॥ २१७ ॥ भारद्वाजकमाख्यातं भार्गवं नाम भाष्य-
ते ॥ वासिष्ठ उपसर्गस्तु निपातः काश्यपः स्मृतः ॥
२१८ ॥ सर्व्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते ॥
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥ २१९ ॥
स्वरास्तु ब्रह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ॥ द्विती-
याश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः ॥ २२० ॥ उदात्तं
ब्राह्मणं विद्याद्भारद्वाज ऋषिस्ततः ॥ गायत्रं च भवेच्छु-

न्दो नियोगो ब्रह्मसाधने ॥ २२१ ॥ नीचं तु ध्वनि-
थं प्राहुर्गौतमोऽस्य च देवता ॥ छन्दस्त्रैष्टुभमेवास्य
विनियोगोऽधनाशने ॥ २२२ ॥ स्वरितं वैश्यमेवाङ्ग-
मुनिर्गार्ग्योऽस्यकीर्त्तितम् ॥ जागतं तु भवेच्छन्दो नि-
योगः शत्रुनाशने ॥ २२३ ॥ एषा मन्त्ररहस्यस्य मञ्जूषो-
द्घाटिता मया ॥ एतत्सर्व्वं विदित्वा तु ब्रह्मलोके महीं-
यते ॥ २२४ ॥ अनेन विधिना वेदं योऽधीते श्रद्धया
द्विजः ॥ सोऽश्वमेधसहस्रस्य फलं प्राप्नोति पुष्कलम् ॥
२२५ ॥ रहस्यं यो न जानाति लक्षणं चार्षकादिक-
म् ॥ सोऽध्यापने न योग्यः स्याज्जपहोमादिकर्मसु ॥
२२६ ॥ अमरेशकृतामेतां शिक्षां यो धारयेत्सुधीः ॥
विद्वज्जनसभामध्ये जयं स लभते ध्रुवम् ॥ २२७ ॥ इ-
त्यमरेशकृता वर्णरत्नप्रदीपिकाशिक्षा समाप्ता ॥

अथ केशवदैवज्ञविरचिता ना
त्मिका व्याख्यानोदाहरण
ऽऽरभ्यते ॥ अथातः केशवी
क्षां व्याख्यास्यामः ॥

नत्वा गणपतिं देवं परिभाषाङ्कसूत्रकम्
च्यते केशवेनेदं वेदाध्यायिसुखाप्तये ॥ १ ॥
माध्यन्दिनीयपरिभाषा ॥ अङ्कानां नवानां
णां मध्ये येन सूत्रेण पदादिमध्यान्तवर्णेषु सञ्
यते तद्विना पदादिवर्णेष्वेव सञ्ज्ञा न जायते
च्यते ॥

पदादौ पूर्वाद्हल्वोर्द्व्योश्चार
मपूर्वयोश्छन्दसि ॥१ ॥

माध्यन्दिनीये पदादौ आद्यहल्विहीनयोर्व
कारयोः सम्पूर्वयोश्चाप्यनयोः क्रमाद्द्वित्ववका
रोच्चारः स्याच्छन्दसि ॥ हल् इति व्यञ्जनम् । अस्
रणानि संहितायाः प्रथमाध्याये प्रथमकि
वायवस्थ्यऽइत्यत्र व्वायवइत्युच्चारः । तथैव द्विती

कायां वसोः पवित्रमित्यत्र व्वसोः पवित्रमित्युच्चारः । प्रथमर्चि यजमानस्येत्यत्र य़जमानस्येत्युच्चारः। द्वितीयर्चि यज्ञपतिरित्यत्र य़ज्ज्ञपतिरित्युच्चारः । कस्त्वा युनक्तीत्यत्र य़ुनक्तीत्युच्चारः । सम्पूर्वकस्योदाहरणानि संहितायाम्प्रथमाध्याये देवस्य त्वेत्यृङ्मध्ये संवपामीत्यत्र सँव्वपामीत्युच्चारः। संवर्चसेत्यत्र सँव्वर्चसेत्युच्चारः । जनयत्यै त्वा संय्यौमीत्यत्र सँय्य़ौमीत्युच्चारः । संयज्ञपतिरित्यत्र सँय्य़ज्ज्ञपतिरित्युच्चारः । इत्यादिषु पदादित्वात्सम्पूर्वत्वाच्च यवयोर्द्वित्ववकारयकारौस्तः । न वयकारौ इत्यादि सर्वत्र ज्ञेयम् । पदादाविति किम् । आद्यकण्डिकायां प्रजावतीरनमीवाः । प्राप्प्यायतु श्रेष्ठतमायेत्यादिषु वकारमकारयोः पदादित्वाभावान्न द्वित्ववकारयकारौ स्त इति । आद्यहलविहीनयोरिति किम् । द्वितीयाध्याये 'अग्ने व्वाजजिद्वाजन्त्वा । तृतीयाध्याये अव रुद्रमित्यृङ्मध्ये श्रेयसस्करद्यथा न इत्यनयोर्वकारयकारयोः पदादित्वमस्त्यतो द्वित्वजकारोच्चारः । अनयोरुदाहरणयोस्तु आद्यदकारहल्युतत्वान्न द्वित्वजकारोच्चारो न द्वित्ववकारोच्चारश्चेति प्रथमसूत्रव्याख्या जकारोच्चारणार्थमन्यत्सूत्रं च प्रदर्श्यते ॥

पदान्तमध्यगहरेफयुग्यस्य यश्च ॥ २ ॥

पदान्तमध्ये ऋकारहकाररेफैश्च युक्तस्य यस्य ह
च्चारणं छन्दसि माध्यन्दिनीये । उदाहरणानि
विंशतितमेऽध्याये प्रथमा द्वितीयैरित्येकादशकण्डिका
सामान्यृग्भिः । द्वितीयाध्याये यज्ञपरिधिमित्यृङ्म
पणिभिर्गुह्यमानइत्यत्र हकारजकारयुक्तोच्चारः ।
दोऽसि येनेतिकण्डिकायां सह्यांवेदो भूयाः । घृ
चीस्थो युय्यौ । तृतीयाध्याये उपत्वेत्यृङ्मध्ये घृ
चीय्यंन्तु ह्यंत इत्यादिषु ऋकारहकाररेफयुक्ता
ज्जकारोच्चारो न यकारः । ऋहरेफयुक्तस्येति कि
अभिषिञ्चन्त्युत्सिञ्चन्ति । अत्र न जकारोच्चारः ।
तः ऋहरेफयुक्तत्वाभावात् । एवमन्यत्रापि बोध्य
इति द्वितीयसूत्रव्याख्या । सूत्रद्वयार्थे कारिकाऽ
पूर्वोक्तयोः पदादौ च वेदे सम्पूर्वयोर्द्विजौ ॥ यक
रेफयुक्तस्य जः पदाद्यन्तमध्यके ॥

षः खष्टुमृते च ॥ २ ॥

पदान्तमध्ये षकारस्य खकारोच्चारस्स्याट्टवर्गं
णा छन्दसि माध्यन्दिनीये । उदाहरणानि । इषे
र्ज्जेत्वेत्यत्र खकारोच्चारो न षकारः । एवं
ह्मणेऽपि "इयं पृथिवी सर्वेषां भूतानामित्यत्र क
यखकारसदृशोच्चारो न मूर्द्धन्यषकारइति । टवर्ग
नेति किम् । आद्ये ऋचि "श्रेष्ठतमाय कर्म्मणे" इ

टवर्गयुक्तत्वात्षकारोच्चारएव न खकारोच्चारइत्यादि सर्वत्र ज्ञेयम् ॥ इति तृतीयसूत्रं व्याख्यातम् ॥

अहल्शल्पूर्ध्वरेफस्य सैकारः प्राक्च ॥ ४ ॥

पदान्तमध्ये हलिवर्जितशल्पूर्ध्वरेफस्य सैकारः प्रागुच्चारश्छन्दसि माध्यन्दिनीये ॥ शलिति शषसहा ज्ञेयाः। उदाहरणानि यथा। अष्टत्रिंशदध्याये सप्तदशकण्डिकायां अभीमं महिमा दिवमित्यत्र दर्शतमित्यूर्ध्वरेफस्य प्रागेव सैकारोच्चारः। दरेशतमिति न तु सोर्ध्वरेफोच्चारः। एकोनचत्वारिंशदध्याये अग्निर्ट० हृदयेनाग्निमित्यङ्मध्ये पर्शव्येनेत्यत्र परेशव्येनेत्युच्चारः॥ पञ्चमाध्याये "द्याम्मा" इति कण्डिकायां शतवल्शो व्विरोह सहस्रवल्शा इत्यत्रापि रलयोः सावर्ण्याल्लस्यापि प्राक्सैकारोच्चारः, शतवलेशो व्विरोह सहस्रवलेशा इति न लकारयुक्तोच्चारः। व्वसोः पवित्रमसीति कण्डिकायां ह्वार्षीत् अत्रापि प्राक्सैकारोच्चारः ह्वारेषीत्। षकारस्योदाहरणमेव सकारस्य तत्कथं "आदेशप्रत्यययोः"। इण्कवर्गाभ्यां परस्य मूर्द्धन्यादेशइति कृत्वा रेफस्तु इणमध्ये वर्त्तते तर्हि रेफात्परो यः सकारः स मूर्द्धन्यएवेति कृत्वा षकारसकार-

योरेकमेवोदाहरणम् । आर्ष्यां संहितायां तृतीयाध्याये प्रथमर्चि बर्हिषे त्वा बर्हिरसीत्यनयोर्बरेहिषे त्वा बरेहिरसीत्येवमेवोच्चारो न तु सोर्ध्वरेफोच्चारः । त्रयोविंशत्यध्याये "केष्वन्त इत्यङ्मध्ये "एतद्ब्रह्मन्नुपवल्हामसीत्यत्र वलेहामसीत्युच्चारो रलयोः सावर्ण्यात् एवमादीनि ज्ञेयानि । हलिवहीनेति किम् । वसोः पवित्रमसीति कण्डिकायां "यज्ञपतिर्ह्वार्षीत् ॥ एकत्रिंशदध्याये नाभ्या ऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौरित्यत्र हकारषकारयोर्वकारणकारहल्युक्तत्वादूर्ध्वरेफयुक्तएवोच्चारो न प्राक्सैकारोच्चारइति । शलीति किम् । इषे त्वोर्ज्जे त्वा प्रार्प्पयतु इत्यत्र शलिवहीनत्वात्सोर्ध्वरेफोच्चारो न प्राक्सैकारोच्चारइत्यादि सर्वत्र ज्ञेयम् । इति चतुर्थसूत्रव्याख्या । एतदर्थे कारिकाऽपि । षस्योच्चारः खकारः स्याट्टुं विना छन्दसि स्वके ॥ विह्लशल्यूर्ध्वरेफो यः सैकारः प्राक्समुच्चरेत् ॥ ४ ॥

अनुस्वारस्य ꣳ शलि रेफे च परे ह्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः सँय्योगे गुरुश्च ॥ ५ ॥

पदान्तमध्ये शलि रेफे च परे अनुस्वारस्य ꣳ स्याद्ध्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः संयोगे च परे गुरुः स्याच्छ-

न्दसि माध्यन्दिनीये। उदाहरणानि यथा । त्रिꣳ॰श-द्धामेति । ब्राह्मणोऽपि सर्वꣳ॰ षडिति । द्वितीयाध्याये अग्ने गृहपतऽइति कण्डिकायां भूयासꣳ॰ सुगृहपतिः । तस्यामेव शतꣳ॰ हिमाः । तृतीयाध्याये सन्त्वमग्नऽइति कण्डिकायां सम्प्रजया सꣳ॰ रायस्पोषेणेति । प्रथमाध्याये पृथिवि देवयजन्योषद्ध्यास्तऽइत्यृङ्मध्ये पृथिव्याꣳ॰ शतेन पाशैः । द्वादशाध्याये सुपर्णोसीति कण्डिकायां यजूꣳ॰षि नाम । द्वितीयाध्याये एषा तऽइत्यृङ्मध्ये ससृवाꣳ॰सँव्वाजजितम् । सम्बर्हिरङ्क्ताꣳ॰ हविषा । तृतीयाध्याये उभा वामिति कण्डिकायां इषाꣳ॰ रयीणाम् । एकविंशत्यध्याये होता यक्षत्सुरेतसमृषभमित्यृङ्मध्ये सुरया भेषजꣳ॰ श्रिया न मासरम् । अष्टादशाध्याये आयुर्यज्ञेनेत्यृङ्मध्ये कल्पताꣳ॰ श्रोत्रँय्यज्ञेन कल्पताम् । एकादशाध्याये दꣳ॰ष्ट्राभ्याम्मलिम्लून । एकोनविंशतिमेऽध्याये पुरोडाशैर्हवीꣳ॰ष्या । तृतीयाध्याये सोमानꣳ॰ स्वरणम् । सन्त्वमग्नऽइत्यृङ्मध्ये सम्हषीणाꣳ॰ स्तुतेन । पञ्चमाध्याये सिꣳ॰ह्यसि । एवं रेफसँय्योगे परे ज्ञेयम् । इत्यादिषु क्रमेण दीर्घह्रस्वगुरूस्वाराः कर्त्तव्या न व्यस्ताइति । शलि रेफे च परे किम् । इन्द्राय भागं प्रजावतीरित्यनयोरनुस्वारस्याग्रे शल्रेफाभावादनुस्वार ए-

व न ठं॰कारइति पञ्चमसूत्रं व्याख्यातम्। सूत्रार्थे कारिकाऽपि। अनुस्वारस्य ठं॰ वेदे शलि रेफे परे भवेत्॥
ह्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः सँय्योगे च परे गुरुः॥ ५॥

शर्पूर्व्वाणामृद्धीनकादिपञ्चवर्गाणां द्वित्वं विसर्गाद्रेफयुक्तानाम्॥ ६॥

पदान्तमध्ये शर्पूर्व्वाणां ऋकारहीनकादिपञ्चवर्गाणां विसर्गात्परेषां रेफयुक्तानामेषां च द्वित्वं स्याच्छन्दसि माध्यन्दिनीये॥ शर् इति शषसा ज्ञेयाः। उदाहरणानि यथा। द्वितीयाध्याये अस्कन्नमद्य देवेभ्यः। आधत्तेति मध्ये पुष्क्करस्रजम्। समिदसीत्यङ्मध्ये कस्याश्चिदभिशस्त्यै। कृष्णोऽस्याखरेष्ठः। सूर्य्यस्त्वा पुरस्तात्पातु। उपहूतो द्यौष्पितोपमाम्। मयीदमित्यङ्मध्ये दधाम्यस्मान् इत्यादिषु कादिपञ्चवर्गाणामेव द्वित्वं शर्युतत्वान्न शषसानां विसर्गाद्रेफयुक्तानामुदाहरणानि यम्परिधिमित्यस्यामृचि मध्ये अग्नेः प्रियमस्या अग्निमकण्डिकायां बृहन्नः प्रस्तरेष्ठाः। तृतीयाध्याये आ नऽएतु मनः पुनः क्रत्वे दक्षाय जीवसे। ऋकारहीनत्वादिति किम्। तृतीयाध्यायेऽष्टादशकण्डिकायां व्ययस्कृतं सहस्कृतम्। चतु-

विंशत्यध्याये द्वितीयकण्डिकायां बार्हस्पत्यः पृषती-ति द्वितीयाध्याये द्वितीयर्चि ऊर्मं मन्द्रसन्वा स्वाभी त्यत्र ककारपकारतकाराणां ऋकारयुक्तत्वान्न द्वित्वमित्यादि ज्ञेयम्। एतदर्थं कारिकापि। ऋकादयः पञ्चवर्गाः अपूर्वा गुरवश्च ते॥ विसर्गाश्च परे तद्वद्-युक्ताश्छन्दसि स्मृताः॥ ६॥ अरादिज्ञापनार्थं प्रत्याहारसूत्राणि लिख्यन्ते। तथा च। अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति माहेश्वराणि सूत्राण्यणादिसञ्ज्ञार्थानि। एषामन्त्या इतः। हलन्त्यम्। उपदेशेऽन्त्यं हलित्स्यात्। आदिरन्त्येन सहेता। अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च सञ्ज्ञा स्यात्। यथाऽणिति अइउवर्णानां सञ्ज्ञा। एवमच् हल् अलित्यादयः प्रत्याहारा ज्ञेयाः। कस्य वर्णस्य पुनः किं स्थानमित्यपेक्षायामाह। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्द्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु।

इति जिह्वामूलीयः । ᳲ पइत्युपध्मानीयः । अं इत्यनुस्वारः । अः इति विसर्जनीयः इति ज्ञेयम् । पाणिनीयसूत्रे अपि द्वित्वविधायके भवतः । तथाहि । अनचि च । अचः परस्य यरो द्वे वा स्तो न त्वचि । अचो रहाभ्यां द्वे ॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वास्तः । पाणिनीयद्वित्वसूत्रद्वयोदाहरणानि प्रथमाध्याये द्वितीयर्चि पृथिव्यसि मातरिश्वनो घर्म्मोऽसि विश्वधाऽअसि । हर्ठ० हस्व माह्वाम्मी ते इत्यादि सर्वत्र ज्ञेयम् । इति षष्ठसूत्रव्याख्यानम् । एतदर्थं कारिकाद्वयमपि । पाणिनीयस्य सूत्राभ्यां द्वित्वं सर्वत्र कीर्त्तितम् । नटं विना कादयः पञ्च यपूर्व्वा द्वित्वमाप्नुयुः ॥ ७ ॥ विसर्गाच्च परे ते रेफयुक्ताच्छन्दसि स्मृताः ॥ पाणिनीयप्रातिशाख्यसूत्रैर्द्वित्वं प्रकीर्त्तितम् ॥ ८ ॥

न सोऽयोऽश्च ॥ ७ ॥

पदान्तमध्ये वकारयकारयोः परयोः सकारस्य द्वित्वं न स्याच्छन्दसि माध्यन्दिनीये । उदाहरणानि यथा । द्वितीयाध्याये द्वितीयर्चि स्तृणामि स्वासस्थाम्भुवपतये स्वाहा । प्रथमाध्याये धर्म्मास्यवधूतर्ठ० रक्षः । धृष्टिरस्यपाग्ने इत्यादिषु सकारस्य यवयोः परयोर्न द्वित्वम् एवं सर्वत्र ज्ञेयम् । इति सप्तमसूत्र

व्याख्येयमिदम् ॥

हल्युतायुतस्योः सैकारश्च ॥ ८ ॥

पदान्तमध्ये हल्युतायुतस्य ऋकारस्य ऋवर्णस्य सैकारइवोच्चारः स्याच्छन्दसि माध्यन्दिनीये । उदाहरणानि यथा द्वितीयेऽध्याये कृष्णोऽसीत्यत्र क्रिष्णोऽसीत्युच्चारो न ऋकारः । अग्नये इत्यृङ्मध्ये पितृमते इत्यत्र पित्रे मते स्वाहेत्युच्चारः । तृतीयाध्याये अयन्ते योनिर्ऋत्वियइत्यृङ्मध्ये रेत्वियइत्युच्चारइत्यादि सर्वत्र ज्ञेयम् । इत्यष्टमसूत्रव्याख्या सूत्रार्थे कारिकाऽपि । यवयोः परयोः सस्य द्वित्वं न स्यात्तु छन्दसि ॥ ऋकारो हल्विसर्गयुग्वा सैकारश्छन्दसि स्मृतः ॥ ८ ॥

ह्रस्वं किञ्चिद्दीर्घं हल्युताकारे हलि विसर्गयुग्वर्णे च न संहितायाम् ॥ ९ ॥

पदान्तमध्ये च ह्रस्वत्वस्य किञ्चिद्दीर्घोच्चारः स्याद्धल्युतायुत आकारे परे हल्विसर्गयुग्वर्णे च परे न स्याद्वाजसनेयसंहितायाम् । अस्योदाहरणानि यथा संहितायां प्रथमाध्याये प्रथमर्चि इषे त्वोर्जे त्वा वायवस्थ देवो वइत्यादिषु इकारयकारस्याकारा ह-

स्वाः । अत एषां किञ्चिद्दीर्घोच्चारो न तु ह्रस्वता । सविताऽत्र तकारहल्युत आकारोऽग्रे तिष्ठति । अतः सकारविकारयोर्ह्रस्वतैव । इडं॰ हस्व मा ह्वाम्मोते । प्राप्यंयतु । अत्र पकारयकारयोः किंचिद्दीर्घता । श्रेष्ठतमाय अत्र मकारयुतआकारो ऽग्रेस्ति । अतः टकारतकारयोर्ह्रस्वतैव । अत्र यकारस्य किञ्चिद्दीर्घता । कर्मण ऽआप्या । अत्र मकारणकारयोर्हल्युताकारोऽग्रेऽस्ति । अतो ह्रस्वावेव । यद्धमग्दन्या अत्र ध्वस्य कीञ्चिद्दीर्घता । इन्द्राय भागं प्रजावतीः अत्र यकारमकारयोरग्रे हल्युत आकारोऽग्रेऽस्ति अतो ह्रस्वावेव । वस्य किञ्चिद्दीर्घता । रनमीवाऽअयक्ष्मा मा वस्तेनऽईशत इत्यादिषु रेफनकाराकाराणां किञ्चिद्दीर्घोच्चारः । ईशत मा” अत्र हल्युत्तरआकारोऽग्रेऽस्ति । अतः शतयोर्ह्रस्वतैव ॥ माऽघशंॅ॰ सो ध्रुवा ऽअस्मिन्गोपतौ स्यात बह्वीः । अत्र घकारपकारतकाराणां किञ्चिद्दीर्घता । यजमानस्येत्यत्र मयुतआकारोऽग्रेऽस्ति । अतो ह्रस्वतैव यजयोः स्यस्य च किञ्चिद्दीर्घता पशून्पाहि । अत्र पकारह्निकारयोः किञ्चिद्दीर्घोच्चारः । द्वितीयाध्याये मित्रावरुणौ त्वोत्तरतइत्यत्र वकारणकारयोः किञ्चिद्दीर्घता । तकाररेफयोर्हल्निसंयुक्तवर्णोऽग्रेऽस्ति । अतो ह्रस्वतैव न दीर्घोच्चारः ।

प्रतिज्ञासूत्रे "ईषद्दीर्घता च भवति" । एकमात्राकालापेक्षया किञ्चिदधिककालमुच्चारणीयः सार्द्धैकमात्रिकः कालइत्यर्थः । अतएवार्ष्यां संहितायां दीर्घपाठेऽमुकोऽध्यायइति लिखितमाचार्य्यैः । इत्यादि सर्वं न ज्ञेयम् ॥ सूत्रार्थं कारिकाऽपि । ह्रस्वं दीर्घं भवेत्किञ्चित्संहितायां परो न चेत् ॥ हल्संयुतायुताकारश्चावर्णी ह्विवसर्गयुक् ॥ १० ॥ नवानामपि सूत्राणां परिमताः कारिकास्त्विमाः ॥ केशवेन कृतास्ताः स्युर्वेदाध्ययनबोधिकाः ॥ ११ ॥ परिभाषाख्यसूत्रं च याजुर्वेदं सकारिकम् ॥ दैवज्ञकेशवेनेदं कृतं ह्रस्वस्वरान्वितम् ॥ १२ ॥ ह्रस्वोदात्तादिभिर्भेदैः सह्रस्वस्वरलक्षणम् ॥ शिक्षादिभिः षडङ्गैश्च विज्ञेयं वेदपाठकैः ॥ १३ ॥ इति श्रीदैवज्ञकेशवकृता प्रतिज्ञासूत्रानुसारिणी केशवीशिक्षा समाप्ता ॥

अथ तत्कृता पद्यात्मिका शिक्षा

अनुदात्तादुदात्ताश्चेत्स्वरितोत्तर एव च ॥ हृच्छि
कर्णमूलेषु न्यसेदक्षमसंशयम् ॥ १ ॥ अनुदात्तादुद
श्चेदनुदात्तपरस्तथा ॥ अनुदात्तं हृदि न्यस्योदात्तं व
भ्रुवि न्यसेत् ॥ २ ॥ पुनर्हृदि न्यसेन्नीचमिति शास्त्र
वस्थितिः ॥ प्रचितोच्चारणे न्यासो हस्तस्य नासि
गतः ॥ ३ ॥ जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टो व्य
नस्वरः ॥ तैरोविरामः पादवृत्तस्ताथाभाव्यस्त
ष्टमः ॥ ४ ॥ एतेषां लक्षणान्याहुः कात्यायनमुनी
राः ॥ तत्र जात्यादिसञ्ज्ञानां चतुर्णां दर्शने कर व
५ ॥ तिर्यङ्न्यङ्नमयेद्धीमान्विपद्दानवदेव हि ॥ म
दानमिव चेदुदात्तः प्रत्ययः स्वरः ॥ ६ ॥ आद्यान्त
स्य जोच्चारः पदादौ पठितस्य च ॥ उपसर्गपरो
यस्य छन्दसि नेष्यते ॥ ७ ॥ पदस्याद्यन्तमध्ये स्या
है: सँय्युतस्य च ॥ द्विभावे ऽप्येवमेव स्यादिति का
यनश्रुतिः ॥ ८ ॥ अन्तस्थानां द्वितीयस्य सेकारो न
रणं भवेत् ॥ अयुक्तहलिभः शषसैर्ङ्कारेण यु
च ॥ ६ ॥ एवमेव तृतीयस्य शषसैः सँय्युतस्य च ॥
कारोच्चारणं कुर्यादिति शास्त्रव्यवस्थितिः ॥ १

ऋकारस्य च सँय्युक्तासँय्युक्तस्यापि सर्वतः ॥ सैकारो-
च्चारणं कुर्य्याल्लृकारस्य तथा भवेत् ॥ ११ ॥ अथ
चान्तस्यान्तस्त्रिविधं गुरुमध्यमलघुत्वयोच्चारः ॥ वा-
क्यस्यादिममध्यान्त्यस्य प्रादिकपरस्य लघ्वेव स्यात् ॥
१२ ॥ वो वां वा वै मन्त्रे लघवो गुरवः पदे च विज्ञे-
याः ॥ देवो वः सविताऽऽदौ त्रय्यमुदाहरणमन्येषा-
म् ॥ १३ ॥ असँय्युक्तस्य मूर्द्धन्योष्मणः खोच्चारणं म-
तम् ॥ दृश्यते सँय्युक्तस्यापि कस्य योगे ष एव हि ॥१४॥
छन्दसीत्येव खोच्चारो लोके प्रकृतिरिष्यते ॥ अनु-
स्वारस्य ॐकार आदेशश्छन्दसि स्मृतः ॥ १५ ॥ ऊ-
ष्मरेफेषु परतस्तस्य त्रैविध्यमुच्यते ॥ ह्रस्वाद्दीर्घाद्दीर्घ-
ह्रस्वो गुरौ च परतो गुरुः ॥ १६ ॥ ऋकारपरकष्मा-
न्त्ये दीर्घाद्दीर्घोऽपि जायते ॥ परसवर्णो ह्यनुस्वारस्ये-
ष्टप्रकृतिरुच्यते ॥ १७ ॥ अणुमात्रमनुस्वारो ह्युक्त
मं चाणुमात्रकम् ॥ शषसे च कखपफे विसर्गाः सन्ति
यत्र च ॥ १८ ॥ वाचो विरामः कर्त्तव्यस्तत्रैषच्छ्रुतिचो-
दनात् ॥ सँय्युक्तस्य पराद्यस्य चाकारस्य प्रतीयते ॥
१९ ॥ ईषद्दीर्घतयोच्चारः कात्यायनमुनेर्गिरा ॥ आस्ति-
कस्य मुनेर्वंशे जातो दैवज्ञगोकुलः ॥ २० ॥ तत्सुतेन
केशवेन कृता सम्यक् शुभार्थिनाम् ॥ प्रीत्यर्थं सुधियां
कारिकावली निर्म्मला शुभा ॥ २१ ॥ इति श्री आ-

स्तिकमहर्षिवंशोद्भवदैवज्ञगोकुलचन्द्रसुतदैवज्ञकेशव
सङ्कृता कारिकावली सम्पूर्णा ॥

अथ मल्लशर्म्मकृता शिक्षाऽऽरभ्यते ॥

नत्वा गणपतिं देवं ध्यात्वा श्रीकुलदेवताम् ॥ मल्लशर्म्मा हस्तपूर्वां करोमि स्वरप्रक्रियाम् ॥ १ ॥ नत्वाविघ्नहरं सदा शुभकरं सर्वस्य कामप्रदं स्मृत्वा श्रीगुरुपादुकां सुललितां ध्यात्वा परां देवताम् ॥ वेदे वाजसनेयके त्वधिकृता विप्राश्च ये सत्तमास्तेषामेव कृते कृता न कुधियां हस्तस्वरप्रक्रिया ॥ २ ॥ अथ साध्यायनियमः, तथा प्रातिशाख्ये मनुः । ब्रह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा ॥ स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते ॥ ३ ॥ तथा उत्तानपाणिं फणवत्कृत्वा सह शलाकया ॥ गुरुं प्रणम्य मनसा ततः स्वाध्यायवान्भवेत् ॥ ४ ॥ अत्र जपादौ हस्तस्वरवर्णहीनस्यानधिकारत्वं रावणेन स्वराङ्कुशे याज्ञवल्क्येन शिक्षायां च बोधितम् । तथा हि हस्तहीनं तु योऽधीते हस्तस्वर (१) विवर्ज्जितम् ॥ ऋग्यजुः सामभिर्दग्धो वियोनिमधिगच्छति ॥ ५ ॥ इति याज्ञवल्क्यशिक्षायां चोक्तम् । जपादौ नाधिकारोऽस्ति सम्यक् पाठमजानतः ॥ इत्युक्तं प्रातिशाख्ये । मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या-

---

(१) स्वरवर्ण इति 'ख' पुस्तकपाठः ॥

प्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ६ ॥ इत्यपि तत्रैवोक्तम् । एतेन हस्तस्वरवर्णयुक्तएव वेदोऽध्येतव्य इत्यतो हस्तस्वरप्रक्रियोच्यते । तत्र तावद्धस्तस्वरस्य मूलस्थानं श्लोकेकेन कथ्यते । तथा । आदौ हस्तं न्यसेन्मध्ये स्थितिरेषा सनातनी । ततः स्वरानुकूल्येन गतिस्तस्य न संशयः ॥ ७ ॥ इति मूलस्थानम् । अधस्तात्प्रव्रजन्पूर्वमूर्द्धान्मध्ये च तिष्ठति ॥ मध्यतो दक्षिणं गच्छेद्दक्षिणाद्याति चोत्तरे ॥ ८ ॥ दृष्ट्वा जात्यस्वरं शीघ्रं मध्यतो याति चोत्तरम् ॥ उत्तराद्यात्यधो हस्तं स्वरं दृष्ट्वा च दक्षिणे ॥ ९ ॥ अर्द्धन्युब्जे ततः पाणिरधस्ताद्याति दक्षिणे ॥ सम्पूर्णे सत्यधो गच्छेदधस्ताच्च न संशयः ॥ १० ॥ सिद्धे ह्यसि प्रतीकं च ह्यवसानं विना करम् ॥ मध्यतो याति सर्वत्र व्यूर्द्धमेव सुनिश्चितम् ॥ ११ ॥ अनुदात्तसमूहो यान्वर्णानाश्रित्य तिष्ठति ॥ ते युक्तास्तं परित्यक्तुमशक्ता निजबन्धुवत् ॥ १२ ॥ स्वरितेऽप्येवमेव स्याद्दक्षिणांसे विशेषतः ॥ न च पूर्वोक्तनियमो विद्यतेऽत्रेति निश्चितम् ॥ १३ ॥ प्रतीकेऽपि विशेषोक्तिर्मान्यते वाऽनुवर्त्तिनम् ॥ १४ इति सामान्यविधिः ॥ एकारेण समा रेखा मूर्द्ध्नि वर्णस्य या स्थिता ॥ तामगान्तां विजानीयादूर्ध्वगां ह्यूर्द्धसंस्थिताम् ॥ १५ ॥ ति-

र्य्यग्रेखा च वर्णस्य पादपार्श्वे स्थिता तथा ॥ ऊर्द्ध्वरेखा-सहायेन तस्यास्तु स्यादधो गतिः ॥ १६ ॥ वामरेखा-सहायेन गतिस्तस्यास्तु दक्षिणे ॥ बिन्दोर्गतिश्च जात्य-स्य मध्ये स्यादिति निश्चितम् ॥ १७ ॥ अर्द्धन्युब्जस्य पूर्णस्य दक्षिणः स्यात्त्वधोगतिः । इति चतुस्स्वरगतिः । पूर्णार्द्धन्युब्जजात्यानां सञ्ज्ञा सम्यक्क्रमेण हि । अङ्कैः पङ्क्तिश्चतुर्भिश्च स्वरविज्ञैरुदीरिता ॥ १८ ॥ इति पू-र्णार्द्धन्युब्जजात्यानां सञ्ज्ञा ॥ अथ ह्रस्वस्वरगतिप्रमा-णम् ॥ षडङ्गुलिप्रमाणानि दक्षिणे च तथोत्तरे ॥ ऊर्ध्वे नवाङ्गुलिर्ज्ञेया गतिः पाणेरधस्तथा ॥ १९ ॥ वामे च दक्षिणाद्याति चार्द्धेऽधस्तात्तथैव च ॥ अष्टा-दशाङ्गुलिर्ज्ञेया गतिर्हस्तस्य सुस्थिरा ॥ २० ॥ इति ह्रस्वस्वरगतिप्रमाणम् ॥ अथ विसर्गोच्चारणप्रमाणम् ॥ ह्रस्वाद्दीर्घाच्च परतो विसर्गश्चेत्तदा बुधः ॥ ह्रस्वस्व-रानुकूल्येनोच्चारयेत्तं सदा बुधैः ॥ २१ ॥ इति विस-र्गोच्चारणप्रमाणम् । अथाङ्गुलिनिस्सरणम् ॥ ह्रस्वे स्व-रितसंयुक्ते वर्णे च सविसर्गके । कनिष्ठा तर्ज्जनी चैव निष्काश्या हि स्वयूथतः ॥ २२ ॥ दीर्घे स्वरितसम्प्रा-प्ते ह्येकामेव कनिष्ठिकाम् ॥ जात्ये युग्मं विशेषेण त्य-क्तव्यमिति निश्चितम् ॥ २३ ॥ स्वरितेभ्यः क्रमेणैव दक्षिणोत्तरगामिनी ॥ कनिष्ठा तर्ज्जनी चैव त्याज्या

प्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ६ ॥ इत्यपि तत्रैवोक्तम् । एतेन ह्रस्तस्वरवर्णयुक्त एव वेदोऽध्येतव्य इत्यतो हस्तस्वरप्रक्रियोच्यते । तत्र तावद्धस्तस्वरस्य मूलस्थानं श्लोकैकेन कथ्यते । तथा । आदौ हस्तं न्यसेन्मध्ये स्थितिरेषा सनातनी । ततः स्वरानुकूल्येन गतिस्तस्य न संशयः ॥ ७ ॥ इति मूलस्थानम् । अधस्तात्प्रव्रजन्पूर्वामूर्ध्वान्मध्ये च तिष्ठति ॥ मध्यतो दक्षिणं गच्छेद्दक्षिणाद्यातिं चोत्तरे ॥ ८ ॥ दृष्ट्वा जात्यस्वरं शीघ्रं मध्यतो याति चोत्तरम् ॥ उत्तराद्यात्यधो हस्तं स्वरं दृष्ट्वा च दक्षिणे ॥ ९ ॥ अर्द्धन्युब्जे ततः पाणिरधस्ताद्याति दक्षिणे ॥ सम्पूर्णे सत्यधो गच्छेदधस्ताच्च न संशयः ॥ १० ॥ सिं ह्यसि प्रतीकं च ह्यवसानं विना करम् ॥ मध्यतो याति सर्वत्र व्यूर्द्ध्वमेव सुनिश्चितम् ॥ ११ ॥ अनुदात्तसमूहो यान्वर्णानाश्रित्य तिष्ठति ॥ ते युक्तास्तं परित्यक्तुमशक्ता निजबन्धुवत् ॥ १२ ॥ स्वरितेऽप्येवमेव स्याद्दक्षिणांसे विशेषतः ॥ न च पूर्वोक्तनियमो विद्यतेऽत्रेति निश्चितम् ॥ १३ ॥ प्रतीकेऽपि विशेषोक्तिर्मन्यते वाऽनुवर्त्तिनम् ॥ १४ इति सामान्यविधिः ॥ एकारेण समा रेखा मूर्द्ध्नि वर्णस्य या स्थिता ॥ वामगान्तां विजानीयादूर्ध्वगां व्यूर्द्धसंस्थिताम् ॥ १५ ॥ ति-

र्य्यग्रेखा च वर्णस्य पादपार्श्वे स्थिता तु या ॥ ऊर्द्ध्वरेखा-
सहायेन तस्यास्तु स्यादधो गतिः ॥ १६ ॥ वामरेखा-
सहायेन गतिस्तस्यास्तु दक्षिणे ॥ बिन्दोर्गतिश्च जात्य-
द्वय मध्ये स्यादिति निश्चितम् ॥ १७ ॥ अर्द्धन्युब्जस्य
पूर्णस्य दक्षिणः स्यात्त्वधो गतिः । इति चतुस्स्वरगतिः ।
पूर्णार्द्धन्युब्जजात्यानां सञ्ज्ञा सव्यक्रमेण हि । अङ्कैः
पङ्क्तिश्चतुर्भिश्च स्वरविद्भिरुदीरिता ॥ १८ ॥ इति पू-
र्णार्द्धन्युब्जजात्यानां सञ्ज्ञा ॥ अथ हस्तस्वरगतिप्रमा-
णम् ॥ षडङ्गुलिप्रमाणानि दक्षिणे च तथोत्तरे ॥
ऊर्ध्वे नवाङ्गुलिर्ज्ञेया गतिः पाणेरधस्तथा ॥ १९ ॥
वामे च दक्षिणाद्याति चार्द्धेऽधस्तात्तथैव च ॥ अष्टा-
दशाङ्गुलिर्ज्ञेया गतिर्हस्तस्य सुस्थिरा ॥ २० ॥ इति
हस्तस्वरगतिप्रमाणम् ॥ अथ विसर्गोच्चारणप्रमाणम् ॥
ह्रस्वाद्दीर्घाच्च परतो विसर्गश्चेत्तदा बुधः ॥ ह्रस्वस्व-
रानुकूल्येनोच्चारयेत्तं सदा बुधैः ॥ २१ ॥ इति विस-
र्गोच्चारणप्रमाणम् । अथाङ्गुलिनिस्सरणम् ॥ ह्रस्वे स्व-
रितसंयुक्ते वर्णे च सविसर्गके । कनिष्ठा तर्जनी चैव
निष्काश्या हि स्वयूथतः ॥ २२ ॥ दीर्घे स्वरितसम्प्रा-
प्ते त्वेकामेव कनिष्ठिकाम् ॥ जात्ये युग्मं विशेषेण त्य-
क्तव्यमिति निश्चितम् ॥ २३ ॥ स्वरितेभ्यः क्रमेणैव
दक्षिणोत्तरगामिनी ॥ कनिष्ठा तर्जनी चैव त्याज्या

भङ्गं स्याद्यत्र मन्त्रेण वै रङ्गस्तु भवेदिति ॥ ४३ ॥
महाशब्दोऽतिशब्दस्य यद्वर्णात्प्राक् प्रवर्त्तते ॥ महा-
रङ्गोऽतिरङ्गस्य सञ्ज्ञा तस्यैव निश्चिता ॥ ४४ अथ र-
ङ्गादीनामुच्चारणे प्रमाणम्। ह्रस्वात्तु द्विगुणो दीर्घो दी-
र्घादेकगुणः प्लुतः ॥ प्लुतादेकगुणो रङ्गो रङ्गादेकगु-
णाधिकः ॥ ४५ ॥ महाशब्देन सँय्युक्तो व्यञ्जनं चार्द्ध-
मात्रिकम् ॥ अतिरङ्गो महारङ्गाद्वृद्धो ह्येकगुणाऽधि-
कः ॥ ४६ ॥ एतत्तु किल वेदे वै ज्ञेयं पूर्णोऽपि सु-
स्थिरम् ॥ अथ द्विस्वरक्रमः ॥ द्विस्वरे स्वरहीनस्य
गतिस्तूपरि चोत्तरे ॥ जात्ये त्वर्द्धे च सम्पूर्णे न्युब्जे
चतुस्स्वरेषु यत् ॥ ॥ ४७ ॥ स एव नियमो ह्ये-
कैर्द्विस्वरेऽपि च दर्शितः ॥ भेदेनैव प्रकारस्तु (१)
लिपिमात्रे सुनिश्चितः ॥ ४८ ॥ तिर्य्यग्रेखा द्विके म-
ध्ये मध्ये वा तिर्य्यगूर्ध्वयोः ॥ उत्तरं याति सोर्द्ध्वञ्च
विस्वरस्त्वेक्रमेण हि ॥ ४९ ॥ अथौष्ठमकारस्थानानि ॥
स्वन्ते मिम्यातौ मोधे च मन्नं मध्यं मधौ मिधौ॥ रचो-
ह्णं च मन्ने तु बलं त्यक्ता मलेऽपि च ॥ ५० ॥ मि-
मन्ये च मिभर्त्तौ च मिभर्यौ मभयेऽपिच ॥ औदुम्ब-
र्यात्मके चैवं मन्मणे म्नान्मणे स्पषे ॥ ५१ ॥ माघोस्तु
मर्हिषं मध्यां (२)स्टहन्ते च मधानके ॥ स्टहस्पतौ च

(१) त्रिमात्रे इति 'ख' पुस्तकपाठः ॥

(२) माहर्षोर्म्मर्हिषम्माह्यामिति 'ख' पुस्तकपाठश्च ॥

पिमत्ते क्षते मालवे मभूषते ॥ ५२ ॥ मिश्चाडिति प्रमुधे च मुधे मधौ प्रमाहके ॥ मम्लुशे मदरे मधे मपायो मब्रह्मचर्यके ॥ ५३ ॥ मटे सोमे च मीभ-त्से क्षोमे मैय्यमके ऽपि च ॥ मामल्ले च मलाकायां स-ञ्ज्ञा सप्तविभक्तिषु ॥५४॥ स्थानेष्वेतेषु शिक्षायां या-ज्ञवल्क्येन भाषिता ॥ ५५ ॥ अथौष्ठमकारोत्पत्तिः ॥ मकारस्त्वौष्ठसञ्ज्ञः स्यान्मकारं बिन्दुगर्भकम् ॥ सर्वा-सामाङ्गुलीनान्निस्सारणं कार्य्यमत्र वै ॥ ५६ ॥ अथ ठकारस्थानानि ॥ पृष्ठे गोष्ठे च शोचिष्ठेत्यनुष्ठाने च पिष्ठके ॥ अधिष्ठानेऽनधिष्ठाने स्वादिष्ठे च वसिष्ठ-के ॥ ५७ ॥ निविष्ठोष्ठत्रनिष्ठेषु कनिष्ठायां मदिष्ठके ॥ निष्ठायां चाप्यनिष्ठायां मजाविष्ठां च षष्ठके ॥ ५८ ॥ प्रतिष्ठायां यविष्ठ्यं च वर्षिष्ठे तिष्ठतेऽपि च ॥ आमो ह्निष्ठे यजिष्ठे च नेदिष्ठस्त्रिष्ठिनेऽपि च ॥ ५९ ॥ नि-ष्ठीवने चाखरेष्ठः पुञ्जिष्ठे गह्वरेष्ठके ॥ ज्येष्ठे श्रेष्ठे कनिष्ठे च भूयिष्ठायान्तु पिष्ठके ॥ ६० ॥ नरिष्ठायां गरिष्ठे च म्राजिष्ठेऽष्टविभक्तिषु ॥ समस्वेव यथा प्रोक्ताः सूरिभिः शब्ददर्शिभिः ॥ ६१ ॥ इति ष्ठका-रस्थानानि ॥ यस्सुबोधास्पटेन्नित्यमिमां च स्वरप्र-क्रियाम् ॥ ह्रस्तपूर्वा तु तस्यैव सम्यग्वेदे गतिर्भवेत् ॥ ६२ ॥ श्रीमता कान्यकुब्जेन ह्युपमन्युवरिनह्योनिणा ॥

भङ्गं स्याद्यत्र मन्त्रेण वै रङ्गस्तु भवेदिति ।
महाशब्दोऽतिशब्दस्य यद्वर्णात्प्राक् प्रवर्त्तते
रङ्गोऽतिरङ्गस्य सञ्ज्ञा तस्यैव निश्चिता ॥ ४
ङ्गादीनामुच्चारणे प्रमाणम् । ह्रस्वात्तु द्विगुणो
र्णादेकगुणः प्लुतः ॥ प्लुतादेकगुणो रङ्गो र
णाधिकः ॥ ४५ ॥ महाशब्देन संयुक्तो व्यञ्
मात्रिकम् ॥ अतिरङ्गो महारङ्गाद्वृद्धो ह्येक
कः ॥ ४६ ॥ एतत्तु किल वेदे वै ज्ञेयं पू
स्थिरम् ॥ अथ द्विस्वरक्रमः ॥ द्विस्वरे
गतिस्तूपरि चोत्तरे ॥ जात्ये त्वर्द्धं च सम्पू
चतुस्स्वरेषु यत् ॥ ॥ ४७ ॥ स एव नि
कैर्द्विस्वरेऽपि च दर्शितः ॥ भेदेनैव प्रका
त्त्रिमात्रे सुनिश्चितः ॥ ४८ ॥ तिर्य्यग्रेखा
ध्ये मध्ये वा तिर्य्यगूर्द्ध्वयोः ॥ उत्तरं याति
विस्वरस्यैक्रमेण हि ॥ ४९ ॥ अथौष्ठमकार स
न्ते मिश्रातौ मोधे च मन्नं मधयं मधौ मि
ष्णे च मन्ने तु बलं त्यक्त्वा मलेऽपि च ॥ ५
मन्वे च मिमर्त्तौ च मिमयौ ममयेऽपिच ॥
य्यात्मके चैवं मन्त्रास्ये मान्त्राणे स्पष्टे ॥ ५१ ॥
महिषं मध्यां (२)स्पहन्ते च मधानके ॥ स्पह

(१) त्रिमात्रे इति 'ख' पुस्तकपाठः ॥

(२) ...इति 'ख' पुस्तकपाठश्च ॥

पिमते स्तते माल्वे मभूप्रते ॥ ५२ ॥ मिम्भाडिति प्रमुधे च सुघ्ने मध्वौ प्रमाह्वके ॥ मम्लुशे मद्रे म्नध्ने मपायो मन्ह्मचर्य्यके ॥ ५३ ॥ मटे सोमे च मीभत्से क्षोमे नैय्यम्मकेऽपि च ॥ मामले च मलाकायां सञ्ज्ञा समविभक्तिषु ॥५४॥ स्थानेष्वेतेषु मिथायां याज्ञवल्क्येन भाषिता ॥ ५५ ॥ अथौष्ठमकारोत्पत्तिः ॥ मकारश्चौष्ठसञ्ज्ञः स्यान्मकारं बिन्दुगर्भकम् ॥ सर्वासामाङ्गुलीनान्निस्सरणं कार्य्यमत्र वै ॥ ५६ ॥ अथ ठकारस्थानानि ॥ पृष्ठे गोष्ठे च शोचिष्ठेत्यनुष्ठाने च पिष्ठके ॥ अधिष्ठानेऽनधिष्ठाने स्वादिष्ठे च वसिष्ठके ॥ ५७ ॥ निविष्ठौष्ठनिष्ठेषु कनिष्ठायां मदिष्ठके ॥ निष्ठायां चाप्यनिष्ठायां मजाविष्ठां च षष्ठके ॥ ५८ ॥ प्रतिष्ठायां यविष्ठ्यं च वर्षिष्ठे तिष्ठतेऽपि च ॥ आपोहिष्ठे यजिष्ठे च नेदिष्ठस्त्विष्ठिनेऽपि च ॥ ५९ ॥ निष्ठीवने चाखरेष्ठः पुच्छिष्ठे गह्वरेष्ठके ॥ ज्येष्ठे श्रेष्ठे कनिष्ठे च भूयिष्ठायान्तु पिष्ठके ॥ ६० ॥ नरिष्ठायां गरिष्ठे च भ्राजिष्ठेऽष्टविभक्तिषु ॥ समस्वेव यथा प्रोक्ताः सूरिभिः शब्ददर्शिभिः ॥ ६१ ॥ इति ष्ठकारस्थानानि ॥ यस्सुबोधात्पठेन्नित्यमिमां च स्वरप्रक्रियाम् ॥ ह्रस्तपूर्वां तु तस्यैव सम्यग्वेदे गतिर्भवेत् ॥ ६२ ॥ श्रीमता कान्यकुब्जेन ह्युपमन्युविनिर्मिता ॥

श्रीमद्देवस्वरूपाणां श्रीमद्वाकपतिशर्म्मणाम् ॥ ६३ ॥ सूनुना पितृभक्तेन मल्लविप्रेण धीमता ॥ विक्रमार्क-गताब्देषु चन्द्रवस्वगभूमिषु ॥ ६४ ॥ ऊर्ज्जमासे सि-ते पक्षे ह्येकादश्यां शनेर्द्दिने ॥ कृतेयं बालबोधाय स्व-ह्रस्तस्वरप्रक्रिया ॥ ६५ ॥ इति श्रीमत्कान्यकुब्जो-योपमन्युगोत्रीयाग्निहोत्रिखगपतितनूजपितृभक्तघाटम पुरवासिमल्लशर्म्मकृता शिक्षा समाप्ता ॥

अथ स्वराङ्कुशशिक्षाऽऽरभ्यते ॥

हेरम्बं चण्डिकां नत्वा शम्भुं सूर्य्यं हरिं गुरुम् ॥ सरस्वतीं कविवरान्वक्ष्येऽहं स्वरनिर्णयम् ॥ १ ॥ उदात्तान्निहतः स्वारः स्वरितात्प्रचयो भवेत् ॥ उदात्तात्स्वरितात्पूर्व्वो नान्यमापद्यते स्वरम् ॥ २ ॥ व्यञ्जनैस्तु यवौ यत्र प्रयुज्येते ततः परम् ॥ अपूर्वो नीचपूर्वो वा जात्यः स्वारः स उच्यते ॥ ३ ॥ एदोतोरुभयोर्यत्र नीचोऽकारः परो यदि ॥ एकीभावे भवेत्तत्र स्वारोऽभिनिहितस्तदा ॥ ४ ॥ इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् ॥ अनुदात्तस्वरे नित्यं विद्यात्क्षैप्रस्य लक्षणम् ॥ ५ ॥ इकार उच्चः पूर्व्वस्मिन्परस्मिन्नियतः स च ॥ प्रश्लिष्टमाहुराचार्याः स्वरवर्णविदस्तदा ॥ ६ ॥ कम्पन्ते ते च चत्वारः स्वरितोच्चोदयाः स्वराः ॥ एतत्सम्यक्प्रकारेण ज्ञात्वाऽसौ कम्पविद्भवेत् ॥ ७ ॥ नीचेन स्वरितः स्वारमेकीभावेऽनुगच्छति ॥ नीचं नीचस्त्विभिश्चोच्च उच्चत्वमभिगच्छति ॥ ८ ॥ उदात्तात्स्वरितादस्य स्वरितोदात्तवच्छ्रुतिः ॥ प्रकृत्या निहितं चाहुराचार्य्याः स्वरवित्तमाः ॥ ९ ॥ उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत् ॥ एष सर्वबहुस्वारस्तैरोव्य-

ञ्जन एव च ॥ १० ॥ अवग्रहात्परं यत्र स्वरितस्स्या-
दनन्तरः ॥ तैरोविरामं तं विद्यादुदात्तो यद्यवग्रहः ॥
११ ॥ स्वरे चेत्स्वरितं यत्र विवृत्त्या तत्र संयुतम् ॥
एतत्तु पादवृत्तस्य लक्षणं शास्त्रनिश्चितम् ॥ १२ ॥
जात्यस्स्वारः स जात्येन स्रुच्यग्ने क्षैप्रउच्यते ॥ तेऽव-
र्धन्ताऽभिनिहितः प्रश्लिष्टो ह्यीन्द्र गिर्वणः ॥ १३ ॥ तै-
रोविरामो विष्कभिते तैरोव्यञ्जन ऊतये ॥ पाद-
वृत्तस्य विद्यात्तु ताऽअस्येति निदर्शनम् ॥ १४ ॥ जा-
त्योऽभिनिहितः क्षैप्रस्तैरोव्यञ्जन एव च ॥ तिरो-
विरामः प्रश्लिष्टः पादवृत्तस्तु सप्तमः ॥ १५ ॥ यत्रा-
भिनिहितात्पूर्वो ह्युदात्तो दृश्यते यदि ॥ तत्र स्वा-
रं न कुर्वीत रथानां नेति दर्शनम् ॥ १६ ॥ एका-
क्षरसमावेशे पूर्वयोः स्वरितः स्वरः ॥ तस्योदात्ततरो-
दात्तादर्द्धमात्रार्द्धमेव वा ॥ १७ ॥ स्वरात्परं व्यञ्जनं य-
त्पञ्चमेनान्वितं यदि ॥ पूर्वस्य स्वरतो नादो न पूर्व-
स्वरिते स्वरः १८ ॥ यत्र स्वरात्परो नादः पूर्वस्वरि-
तभाक्परः ॥ तत्राक्षेपो न कर्त्तव्यो नादे अक्षघेऽ-
पि तत्परे ॥ १९ ॥ स्वरितस्यानुरूपेण कम्पं कुर्वीत
शास्त्रवित् ॥ ह्रस्वे ह्रस्वं विजानीयाद्दीर्घे दीर्घं तथैव
च ॥ २० ॥ स्वरितान्नियतं गच्छेत्स्वरितो नियत-
श्च नौ ॥ द्विमात्रो यत्र दृश्येत ह्रस्वकम्पः स उच्यते ॥

२१ ॥ अनुदात्तं क्रमात्कुर्य्यात्स्वरितं च्यावलम्बयेत् ॥ पुनर्नियतमागच्छेद्दीर्घकम्पः स उच्यते ॥ २२ ॥ जयन्तस्वामिना प्रोक्ताः श्लोकानामेकविंशतिः ॥ स्वराङ्कुशेति विख्याता बह्वृचां स्वरसिद्धये ॥ २३ ॥ एकोदात्तं पदं विद्यादेकस्वारमथापरम् ॥ कानि चोदद्युदात्तानि कनिष्ठं निहितं स्मृतम् ॥ २४ ॥ उदात्तान्निहितः स्वार्य्यः स्वारोदात्तौ न चेत्परौ ॥ स्वरितो यस्तथा भूतो ज्ञेयः सप्ताक्षतीस्त्विति ॥ इति श्रीजयन्तस्वामिप्रोक्ता स्वराङ्कुशा शिक्षा समाप्ता (१)

(१) केचन रावणकृता स्वराङ्कुशा शिक्षा प्रतिपाद्यन्ते ॥

अथ षोडशश्लोकी शिक्षाऽऽ

अथ शिक्षां प्रवक्ष्यामि वाच उच्चारणे वि
संव्यवहारेषु स्वयं प्रोक्ता स्वयम्भुवा ॥ १
इमा वर्णाः स्वरा द्वाविंशतिर्यमाः ॥ चत्वा
नुस्वारᳲकᳳपस्त्रिषष्टिकाः ॥ २ ॥ समास्तेऽ
ऋद्वादीर्घल्पञ्चमः ॥ एदैदोदौ तु चत्वा
न्यक्षराणि च ॥ ३ ॥ ह्रस्वदीर्घप्लुता भे
ऽनुदात्तकाः ॥ स्वरितश्चापि ते सानु
नासिकाः ॥ ४ ॥ इत्यष्टादशधा भेदा
नः स्वराः ॥ कुचुटुतुपुवर्गास्तदुत्पञ्चवर्णास
इति स्वरभेदाः ॥ कुवन्त्यच्चादिवर्गाणा
ञ्चमादितः ॥ खफाद्यास्तथा ज्ञे
द्वयवाः स्मृताः ॥ ६ ॥ अतश्चेतः स्व
लो ञमो झमो जवः ॥ खयश्चपः शस
राश्च तद्व्यञ्जनाः ॥७॥ कादयो मान्तिकाः
पञ्चमान्तरे ॥ शषसहाः स्यूष्माणोऽन्त
स्मृताः ॥ ८ ॥ कखतᳲपफतᳳपूर्वः क्रमा
जिह्वामूलीयको ज्ञेयउपध्मानीयसञ्ज्ञ
स्वर्गादिविसर्गानुस्वारव्यङ्गं पराश्रयम् ॥ ए

ख्खौ ग्खौ दीर्घश्च गुरुस्तथा ॥ १० ॥ इति व्यङ्गभेदाः ॥
इकुविसर्ज्जनीयानां स्यात्कण्ठ्यं यिस्तु तालुकम् ॥ ऋटु-
कं रष्टतुला दन्त्यमूपध्मानीयमोष्ठजम् ॥ ११ ॥ वो दन्तो-
ष्ठं ञमस्यापि नासिकायमयुग्घुरः ॥ ओदौतोरपि क-
ण्ठोऽउं त्वेदैतोः कण्ठतालुकम् ॥ १२ ॥ जिह्वामूली-
यमानस्य जिह्वामूलं हि चाष्टमम् ॥ सद्यो बोधकरा
शिक्षा मणिभूता प्रकाशिता ॥ १३ करालो न च ल-
म्बोष्ठो नाव्यक्तो नानुनासिकः ॥ गद्गदो बद्धजिह्वश्च प्र-
योगान्वक्तुमर्हति ॥ १४ ॥ व्याघ्री दद्भिर्हरेत्पुत्रान्भीता
पाताच्च पीडनात् ॥ तद्वत्प्रयोजयेद्वर्णांस्तेन लोके म-
हीयते ॥ १५ ॥ इति वर्णोच्चारः ॥ शिवास्यान्निसृतां
शिक्षां प्रयतो यः पठेदिह ॥ पुत्रकीर्तिधनायु-
ष्मान्स्वर्गातिसुखमश्नुते ॥ १६ ॥ इति रामकृष्णवि-
रचिता षोडशश्लोकी शिक्षा समाप्ता ॥

अथातोऽवसाननिर्णयं व्याख्यास्यामः ॥

नमस्कृत्य तु तं देवं शङ्करस्य सुतं प्रभुम् ॥ यस्य प्रसादाद्धेतस्य बुद्धिभेदोऽत्यभून्मम ॥ १ ॥ अवसानस्तु वक्ष्यामि यथा वदनुपूर्वशः ॥ २ ॥ इषे त्वा भूताय कुक्कुटोऽसि जनयत्यै त्वा मा भेः पृथिवि देवयजन्यदित्यै व्युन्दगमस्कन्नमद्याग्ने विरग्नेऽ दब्धायो दिवि विष्णुरग्ने व्रतपतेऽन्वस्त्यैष ते रुद्र भागः स्वाहा युक्तमेष ते गायत्रो वरुणस्योत्तम्भनमग्नेस्तनूः सिंहासि ध्रुवोऽसि ध्रुवोऽसि रक्षोहणाँवलगहनं स्वराडसि रक्षोहणो वो मित्रस्य मा देवीरापो व्याचन्ते समुद्रङ्गच्छ मनो मे तर्पयत स्वाङ्कृतोऽस्युपयामगृहीतोऽस्याग्रयणः सोमः पवते मित्रावरुणाभ्यान्त्वाऽऽत्मने मे मधवे त्वाऽग्नये त्वा मह्यं युक्तेऽश्वसनिरग्नये त्वा गायत्रच्छन्दसं श्रेणीनान्त्वोभिवक्त्वान्देवान्दिवमापये स्वाहाऽग्निरेकाक्षरेण मित्रो वसवस्त्रयोदशाक्षरेणैष ते ये देवा ऽआविर्मय्योऽसुहीमारोहाग्निः पृथुः सवित्रा प्रसविता पृथिव्याः सधस्थाद्वसवस्त्वोभयोरदितिष्ट्वा वसवस्त्वाऽऽकूतिमग्निम् ॥ ३ ॥ विष्णोः क्रममसिञ्चदस्यपान्त्वाऽयम्पुरः

पश्च सजूर्ऋतुभिरनड्वान्वयोराड्यस्यायुर्म्मे पृथिवीच्छ-
न्दोऽग्निर्देवताऽऽशुस्त्रिवृत्त्रवविंशं॰शश्यास्तुवताच्छच्छ-
न्दस्तन्तुना रायस्त्रिवृद्दसि राड्यसि विराडसि सम्रा-
डसि स्वराडस्यधिपत्न्यसि सहस्रस्य प्रमा सेनान्यऽ-
श्चामगे शङ्कवे शम्भवाय पर्यायेमा मे नृषदे वेद्वाजश्च
सप्तत्रिंशं॰शति: समुद्रोऽसि स्वर्गं घर्म्मस्तेजोऽसि प्र-
थमा द्वितीयैरश्विभ्यान्त्वा होता यक्षत्समिधाग्नि-
र्द्धारश्वाश्विनौ सरस्वतीन्द्रन्त्वाग्नोऽग्निए स्विष्टकृत-
न्देवोऽअग्निःस्विष्टकृत्त्वामद्याग्नये स्वाहा हिङ्का-
राय यते कायाऽऽब्रह्मन्नध्यायान्तस्ताऽभावश्वस्तू-
परोऽध्याग्रान्तः शारद्वद्भिर्न्नवाग्नेयः कृष्णग्रीवश्शिस्तो
ब्रह्मणो ब्राह्मणठं॰ सप्तदश सुमित्रिया नः सुमित्रिया
नः सुमित्रिया नःऽएधोऽसीति द्वे शते चतुस्त्रिंठं॰
शदित्यन्त्यावसानानि ॥ ४ ॥ अथ त्र्यवसानानि ।
शुन्धाऽइन्द्रोऽग्ने ब्रह्म सँव्वपामि पुरा क्रूरस्य सवि
तुस्त्वा गन्धर्वस्त्वोपहूतो द्यौरेषा ते व्वसुभ्यस्त्वा त्वि-
दोऽस्यग्निर्ज्योतिः सठं॰हिताऽस्युपहूताऽइहेदं देऽ-
प्राकूत्यै प्रयुजऽऊर्गसि द्वे त्वमग्नेऽभित्यमदित्यास्त्वा
भद्रो मे तप्तायनी मे देवस्य त्वोभयोरुह्विमस्य-
न्याग्वतिनाग्नौ मनसाऽइदमापऽऐन्द्रः प्राणो माऽपो-
ऽग्नेर्व्वः सोम राजन्निन्द्रवायूऽइमेऽअयँव्वाँध्या वाङ्मा

तम्प्रत्नथाऽयँव्वेनो ध्रुवोऽसि कोऽसीन्द्राग्नी ऽआगतं
पञ्च सजोषाऽइन्द्र यतस्त्वो व्विवस्वन्नादित्य बृहस्प-
तिसुतस्यैजतु दशमास्यऽआतिष्ठ तिस्रऽउदुत्यँव्वि नऽ-
इन्द्रेति तिस्रऽइह रतिः ॥ ५ ॥ ध्रुवसदन्त्वा ग्रहा-
ऽऊर्ज्जोर्जतयऽइन्द्रस्य व्वज्रो यवो यस्तेऽग्ना मा व्वा-
जस्याऽस्मे वः चतस्रोर्व्वं प्रपर्व्वतस्य प्रजापते ना-
भिव्याम्पच्च्यस्व कुविदङ्ग पुरीष्योऽस्यूतङ्ठ० सश्य-
मुखाङ्कृणोत्वदित्यै रास्नाय्यूर्द्ध्वो भवाग्निर्मूर्द्धा म-
धुश्चेमं मा हि शुक्रश्च व्विश्वकर्म्मोभयोर्न्नभश्च
षश्च षोडशी स्तोमोऽग्निरङ्ठ० होतारमग्ने त्वं तप-
श्च परमेष्ठी त्वोभयोर्न्नमोऽस्तु तिस्रऽआयुर्व्वेन
ऽऋचो नाम ॥ ६ ॥ स्वादुहीन्त्वा कुविदङ्ग यदा पिपे-
षङ्ठ० हवीरेतो मूत्रं दृष्ट्वा रूपे निषसाद नाभिर्म्मे
चया देवा यद्रापोऽअश्विनौ छागस्य प्रजापतये
त्वाऽग्निः पशुः प्राणाय स्वाहेमा नु कन्देऽअग्निश्चा-
घैतानष्टौ यङ्क्रन्दमोऽआ सुते कुतस्त्वमधि नो दस्रा
युवाकवो दैव्यावध्वर्यूऽअद्येदिन्द्रो ब्रह्मणस्पते ऽअ-
पेतः स्योना पृथिवि भूर्भुवोऽहानि शन्दते हङ्ठ०ह
यमाय त्वाऽनाधृष्टा पुरस्ताद्विश्वासां भुवां पते यस्ते
स्तनो गायत्रीच्छन्दः समुद्राय त्वाऽभीमं पयसो रेतः
स्वाहा प्राणेभ्यो लोमभ्यः स्वाहेति शतमेकचत्वारिङ्ठ०

ग्रादित्येतानि ऽअवसानानि ॥ ७ ॥ अथ चतुरवसाना-
नि प्रत्युष्टᳶ० रक्षोऽग्नीषोमयोरुज्जितिᳶ० सजूर्दे-
वेनेभ्यानास्त्वा ऽत्र्यम्बकँय्यजामहेऽठᳶ०गुरᳶ०शुष्टे या
ते धामान्युश्मसि देवस्य त्वाऽग्नीषोमाभ्यां मरु-
त्वन्तं वृषभं माह्विर्भूरग्ने पवस्वोत्तिष्ठन्नोजसाऽहृश्रम-
स्य केतवो युवन्तं देवस्याऽहृज्ज्योतिष्मन्तं प्रैतु सुप-
र्णोऽसि विराड्ज्योतिरिमᳶ० साहस्रं तिस्रो व्वा-
चो: पून पुनन्तु मा पितरऽएधोऽसि सँव्वत्सरोऽस्य-
ग्निमहृद्योभयोरिन्द्रस्यौजस्त्यऽऋजवे त्वा स्वाहा रुद्र-
द्राय हिरण्मयेन पात्रेणेति द्वाविᳶ०ग्रादित्येतानि ऽअ-
वसानानि ॥ ८ ॥ कृष्णोऽसि नमो वऽउभिगसि स-
मुद्रोऽसि मधुमतीन्नऽइषः प्राणाय परमेष्ठ्यभि-
धीतऽइन्द्रश्च प्रोह्यमाणः सोमो विश्वे देवा दृऽअ-
ग्निरेकाक्षरेण पूषा पञ्चाक्षरेण मित्रो नवाक्षरेण
वृष्णाऽऊर्म्मिरत्येतस्यावेष्टा दन्दशूका दक्षिणामारो-
ह प्रतीचीमुदीचीमूर्द्ध्वा व्वयो मा छन्दोऽग्नेर्भा-
गोऽसि व्वहूनाँय्यवानामेकया स्तुवत नवभिर्न्नवदृशा-
भिः ॥ ९ ॥ एवश्छन्दोऽरश्मिना सत्याय प्रतिपदसि
नमो हिरण्यबाहवे बभ्लुशाय रोहिताय कृत्स्नायत-
योष्णीषिणे व्विसृजद्भ्यः सभाभ्यो गणेभ्यस्तक्षभ्यः
श्वभ्यः कपर्द्दिने ह्रस्वाय ज्येष्ठाय सोभ्याय व्वन्याय

व्विलिम्मने स्नुत्याय कूप्याय व्वात्याय पाय्यीय सिक-
श्याय बज्ज्याय शुष्कव्याय प्रथममग्निमद्य स्तूपस्त्या-
ऽश्च्येति षट्पञ्चाशदित्येतानि निरवसानानि ॥ १० ॥
अथ मध्यावसानानि ॥ द्वितीयठं० धम्मोस्यग्ने व्वाज
जिद्विभूरस्यादद्दे रावाऽसि द्वे मध्यऽइन्द्राय त्वा बृहद्वद्व-
ते पञ्चेति मध्यावसानानि ॥ ११ ॥ अथ पञ्चावसा-
नानि ॥ प्रैतु व्वायुरनिलन्द्वे पञ्चावसाने ॥ १२ ॥ अ-
थ षडवसानानि ॥ या तेऽअग्नेऽयःशया या ते घर्म्मा
द्वे षडवसाने ॥ १३ ॥ अथ नवावसानानि ॥ मखस्य शि-
रोऽश्वस्य त्वा द्वे नवावसाने ॥ १४ ॥ अथ मर्य्या-
दा ॥ शतानि चतुर्द्दश त्रिनवतिर्द्व्यवसानानि १४९३
भवन्ति ॥ द्वे शते त्रयस्त्रिठं०शदन्त्यावसानानि २३३
भवन्ति ॥ शतं पञ्चाशत्त्र्यवसानानि १५० भवन्ति ॥
त्रिठं०शच्चतुरवसानानि ३२ भवन्ति ॥ षट्पञ्चाश-
न्निरवसानानि ५६ भवन्ति ॥ पञ्च मध्यावसानानि ५
भवन्ति ॥ द्वे पञ्चावसाने ५ द्वे षडवसाने २ द्वे नवा-
वसाने भवतः ॥ सर्वाण्यवसानान्येकीकृत्यैकानविंठं०
शतिः शतानि पञ्चसप्ततिः सङ्ख्या कण्डिकायास्त्वा-
रिठं०शदध्याये १९७५ ॥ इत्यनन्तदेवविरचिताऽव-
साननिर्णयशिक्षा समाप्ता ॥ रसवेदाङ्केन्दुमिते १९४६

फाल्गुने शुक्लपक्षके ॥ पूर्णिमायां गुरोर्वारेऽवसा-
नान्यङ्कितानि वै ॥ १ ॥

अथ कात्यायनमहर्षिप्रणीतस्वरभक्तिलक्षणपरिशिष्टशिक्षाऽऽरभ्यते ॥

अथातः सम्प्रवक्ष्यामि सर्वलक्षणलक्षिताम् ॥ भिदां समासतस्तत्र स्वरास्त्वष्टौ प्रकीर्त्तिताः ॥ १ ॥ तैरो-विरामः क्षैप्रश्च तैरोव्यञ्जनकस्तथा ॥ भाव्योऽभिनिहितो जात्यः पादवृत्तश्च सप्तमः ॥ २ ॥ प्रश्लिष्टइति विज्ञेयाः प्रोच्यन्ते लक्षणान्यथ ॥ अवग्रहउदात्तश्चेत्स्वरितः स्यात्ततः परम् ॥ ३ ॥ अवग्रहात्परं यत्तु तं विद्यात्प्रथमं स्वरम् ॥ लक्ष्यमस्य तु विज्ञेयं गोपताविति गो । पतौ ॥ ४ ॥ इकारोकारयोः स्थाने यवौ स्यातामुदात्तयोः ॥ अनुदात्ते पदे नित्यं स क्षिप्रइति कीर्त्तितः ॥ ५ ॥ त्र्यम्बकं इत्र इत्यादि लक्ष्यं ज्ञेयं विचक्षणैः ॥ स्वरितं छन्दसि पदं यत्किञ्चिदपि दृश्यते ॥६॥ उदात्तपूर्वं तत्सर्वं तैरोव्यञ्जनउच्यते ॥ इडे रन्ते तथा हव्ये काम्ये इत्यादि दर्शनम् ॥ ७ ॥ अकारएकोदात्तेन रेफेणापहृतो भवेत् ॥ तच्चाभिनिहितं प्राहुः कुकुरोऽसि निदर्शनम् ॥ ८ ॥ विवृत्त्या दृश्यते यत्र स्वरं च स्वरिते पदे ॥ सस्वरः पादवृत्तः स्यात्तुत्त्वऽईधे निदर्शनम् ॥ ९ ॥ यत्रोदात्त इकारो हि

निपातैकारसंयुतः ॥ स प्रश्लिष्टइति ज्ञेयोऽभीममित्यादि दर्शनम् ॥ १० ॥ सादौ पदे परे पूर्वं ककारान्ते पदे स्थिते ॥ कसवर्णं तु विज्ञेयं भिषक्सीसेन दर्शनम् ॥ ११ ॥ षकारान्ते पदे तान्ते पूर्वं च समवस्थिते ॥ प्रत्यारम्भो न तत्र स्याद्यच्चाहमिति दर्शनम् ॥ १२ ॥ सादौ पदे परे पूर्वं ङकारान्ते पदे सति ॥ कसवर्णद्वयं तत्र प्राङ् क्सोमइति दर्शनम् ॥ १३ ॥ सादौ पदे परे नान्ते पूर्वे च समवस्थिते ॥ तसवर्णं विजानीयात्त्रीग्त्समुद्द्रान्निदर्शनम् ॥ १४ ॥ मादौ पदे परे मान्ते पूर्वमुच्चारिते सति ॥ मसवर्णन्तु तत्र स्यादिमम्मइति दर्शनम् ॥ १५ ॥ पदमध्ये पदाद्यन्तेऽन्तरेफैश्च संयुते ॥ यकारे जं विजानीयाद्युञ्जानेत्यादिकं यथा ॥ १६ ॥ टवर्गमन्तरा षस्य खोच्चारश्छन्दसीरितः ॥ प्रत्युदाहरणं घृष्टो द्विषेत्वा निदर्शनम् ॥ १७ ॥ ऊष्मोर्ध्वरेफषस्योच्चारः सैकारो हल्युता न चेत् ॥ पितॄणामिह पित्रेखामित्यादि च निदर्शनम् ॥ १८ ॥ ॐकारः स्यादनुस्वारस्थाने शलि च रे परे ॥ ह्रस्वाद्दीर्घो भवेद्दीर्घाद्ध्रस्वो गुरुरथो मतः ॥ १९ ॥ संयोगे परतो हॐसइत्यादि निदर्शनम् ॥ ताॐ सवितुरित्यादि दॐष्ट्रेत्यादिकं तथा ॥ २० ॥ ह्रस्वदीर्घगुरूच्चारः कर्त्तव्योऽत्र यथा क्रमम् ॥ शल् रेफयोरभावेन सिॐही

प्रत्युदाहृतिः ॥ २१ ॥ यरेः परे यामु दिती द्विर्भवे-द्रेफभागिनाम् ॥ विसर्गाच्च परे यां ऋकारहीनां नि-दर्शनम् ॥ २२ ॥ अस्कन्नमद्य कस्याश्चित्कृष्णोऽस्या इ-ति च क्रमात् ॥ सूर्यंस्त्वा धौष्पिता चाथ दधात्त्व-स्मानिति क्रमात् ॥ २३ ॥ वृहन्तः प्रस्तरेष्ठेति पु-नः ककले निदर्शनम् ॥ पाणिनीयस्य सूत्राभ्यां द्वित्वं सर्वत्र कीर्त्तितम् ॥ २४ ॥ यवयोः परयोः सस्य द्वित्वं न स्यात्तु छन्दसि ॥ व्यसवस्त्वा धूपयन्तु तस्य योनिं यथायथम् ॥ २५ ॥ ह्रस्वुतऋकारस्तु रेकारश्छन्द-सि स्मृतः ॥ पितॄणामिति पित्रेणामित्यादि च निदर्श-नम् ॥ २६ ॥ ह्रस्वं दीर्घं भवेत्किञ्चित्संहिताविषये स्वके ॥ हविसर्गयुते वर्णे ह्रस्वुतायुतके च न ॥ २७ ॥ सपत्नान्यद्वृमदन्येति किञ्चिद्दीर्घो भवेदिह ॥ भागमप्रजावतीत्यादौ ह्रस्वता न तु दीर्घता ॥ २८ ॥ ह्रस्वुताकारसंयोगादिति ज्ञेयं विचक्षणैः ॥ इति का-त्यायनपरिशिष्टे वर्णोच्चारप्रकारः ॥ सन्ध्यस्तु चतुर्धा विज्ञे-या लोपागमविकारतः ॥ २९ ॥ प्रकृत्या च तथा तत्र प्रथमं हि निदर्शनम् ॥ विकारतो यथा चेदं प्रे-षितेत्यादिकं भवेत् ॥ ३० ॥ देवो वः सवितेत्यादौ प्रकृत्यादिप्रदर्शनम् ॥ उभौ स्वरौ तयोरन्तः सन्धिर्यत्र न दृश्यते ॥ ३१ ॥ सा विवृत्तिर्बुधैर्ज्ञेया स एवेति

च पश्यति ॥ एषा चतुर्द्धा विज्ञेया प्रथमा तु पिपीलि-
का ॥ ३२ ॥ परा पाकवती चैव तथा वत्सानुसारि-
णी । वत्सानुसृत्कजिता चैव चतस्रस्ता विवृत्तयः ॥ ३३॥
पिपीलिकाऽऽद्यन्तदीर्घा नाभ्याऽआसीन्निदर्शनम् ॥
द्वितीया तूभया ह्रस्वा व्विनऽइन्द्रेति दर्शनम् ॥ ३४ ॥
तृतीया चोदिता दीर्घा ताऽअस्येति निदर्शनम् ॥ अन्ते
चतुर्थी दीर्घा स्यात्तानऽआवोढमश्विना ॥ ३५ ॥
स्वरभक्तिः पञ्चधा स्यात्तन्नाद्या करिणी स्मृता ॥ रका-
रेण हकारेण सँय्योगो यत्र दृश्यते ॥ ३६ ॥ करिणी
सा तु विज्ञेया बर्हिरसीति दर्शनम् ॥ लकारेण ह-
कारेण सँय्योगो यत्र दृश्यते ॥ ३७ ॥ कुर्विणी सा
हि विज्ञेया उपवल्हेति पश्यति ॥ रकारस्य शकारेण
सँय्योगो यत्र दृश्यते ॥ ३८ ॥ हरिणी सा तु विज्ञेया-
ऽर्शसऽइत्यादि दर्शनम् ॥ लकारेण शकारेण सँय्योगो
यत्र जायते ॥ ३९ ॥ तां हरिणीं विजानीयाच्छतवल्शे-
ति दर्शनम् ॥ रेफस्याथ षकारेण सँय्योगो यत्र दृश्यते ॥
४० ॥ हंसपादेति विज्ञेया व्वर्षो व्वर्षीयसीति च ॥ एत-
ल्लक्षणमाख्यातं स्वरभक्तेर्विचक्षणैः ॥ ४१ ॥ ज्ञात्वैतन्म-
नुजो याति ब्रह्मलोकं सनातनम् ॥ इति कात्याय-
नेनैव परिशिष्टं कृतं मुदा ॥ ४२ ॥ इति कात्यायनो-
क्ता स्वरभक्तिलक्षणपरिशिष्टशिक्षा समाप्ता ॥

अथ क्रमसन्धानशिक्षाऽऽरभ्यते ॥

यथा समाम्नातङ्क्रमावसानर्ठं० सङ्क्रमेषु ॥ क्रमशास्त्रानुसारेण सन्धानं प्रोच्यतेऽधुना ॥ १ ॥ बिभ्भ्रधाः परमेण । १ । ह्वार्षीच्छ्रुतधारम् । २ । सहस्रधारस्त्वेवः । ३ । अधुक्षः सा । ४ । ब्बिभ्भ्रधायाऽङ्गन्तस्य । ५ । राध्यतामिदम् । ६ । एमि कः । ७ । तस्मै कर्म्मणे । ८ । ब्बाम्प्रत्युष्टम् । ९ । अरातयऽऽब्ध । १० । एमि धूः । ११ । धूर्व्वीमो देवानाम् । १२ । देवहूतमसहुतम् । १३ । हविर्ह्वीनँ ब्बिष्णुः । १४ । हस्ताभ्यामग्नये । १५ । गृह्णामि भूताय । १६ । रश्मिभिर्द्देवीः । १७ । देवयुवँय्युष्माः । १८ । स्याग्नये । १९ । अग्नीषोमाभ्यां दैव्याय । २० । ब्बेत्वद्भिः । २१ । ब्बेत्त्वग्नेः । २२ । भ्रमीष्व्वहविष्कृत् । २३ । इहि कुक्कुटः । २४ । ब्बह द्द्ध्रुवम् । २५ । बधायाग्ने । २६ । अन्तरिक्षन्धर्त्तम् । २७ । दिवँव्विश्वाभ्यः । २८ । ब्वेत्तु धान्यम् । २९ । ब्यानाय दीर्घाम् । ३० । रसेन रेवतीः । ३१ । पृच्यन्तांज्जनयत्यै । ३२ । बधः पृथिवि । ३३ मौगप । ३४ । बध्यासमररो । ३५ । स्कन्नगायत्रेण । ३६ । जाग-

तेन सुह्मा । ३७ । माऽज्म्यैनिम्निता । ३८ । माऽज्यं-दिह्यै । ३९ । प्रश्याम्न्यग्ने: । ४० । युजुषेयजुषे सवि-तुः । ४१ । त्वा तेगः । ४२ । इति द्विचत्वारिंशत्प्र-थमाध्याये ॥ पतये गन्धर्व्वः । १ । ईडितऽइन्द्रस्य।२। दक्षिणो मित्रावरुणौ । ३ । अभिशस्त्यै सवितुः । ४ । ध्रुवा ध्रुवा । ५ । माज्म्नि नमः । ६ । सचन्तामस्मा-कम् । ७ । अश्नन्नाम्येतम् । ८ । ब्रह्मणे तेन । ९ । ऊहाम्यग्नीषोमौ । १० । ऊहामीन्द्राग्न्योः । ११ । इन्द्राग्न्योरिन्द्राग्नी । १२ । इन्द्राग्नी व्वसुभ्यः । १३ । अवताँऽव्यन्तु । १४ । मरुद्भिरिन्द्रः । १५ । तस्मै पोषाय । १६ । व्वर्त्तेगने । १७ । हिमाऽअचारिष-म् । १८ । व्वेदिषदो ये । १९ । इत्येकोनविंशति-द्वितीयाध्याये ॥ २ ॥ उषसा सूर्य्यः । १ । गृहप-ते पुरीष्यः । २ । पतिवेदनमितः । ३ । इति त्री-णि क्रमासन्धानानि तृतीयाध्याये ॥ ३ ॥ चतुर्थे क्र-मसन्धानाभावः ॥ ४ ॥ पुरूरवा मन्थामि । १ । र-जःशया हरिशया । २ । देववीतये सिंह्हि । ३ । ध्रुवो व्वैष्णवम् । ४ । ध्रुवऽऐन्द्रम् । ५ । हव्यवाहनः श्वात्त्रः । ६ । अभूद्यायायथम् । ७ । इति सप्त पञ्च-माध्याये ॥ ५ ॥ षष्ठाध्याये क्रमसन्धानाभावः ॥ ६ ॥ मादयस्वोदानाय । १ । भून्महेन्द्राय । २ । इति द्वे

क्रमसन्धाने सप्तमाध्याये ॥ ७ ॥ अष्टमाध्याये क्रमसन्धानाभावः ॥ ८ ॥ इन्द्रस्य सत्यप्रसवः । १ । इन्द्रँ वाजजितः । २ । इति द्वे क्रमसन्धाने नवमाध्याये ॥ ९ ॥ दशमाध्याये क्रमसन्धानाभावः ॥ १० ॥ जागतेन हस्ते । १ । हिरण्ययीमानुष्टुभेन । २ । इति द्वे क्रमसन्धाने एकादशाध्याये ॥ ११ ॥ परिचिन्नोकाम् । १ । इत्येकं क्रमसन्धानं द्वादशाध्याये ॥ १२ ॥ हिंसासि साहस्रम् । १ । गवयमृण्यायुम् । २ । उष्ट्रमजः । ३ । शरभन्त्वम् । ४ । इति चत्वारि क्रमसन्धानानि त्रयोदशाध्याये ॥ १३ ॥ अन्तरिक्षँवायुः । १ । वायूराज्ञो । २ । बृहती नभः । ३ । इति त्रीणि क्रमसन्धानानि चतुर्दशाध्याये ॥ १४ ॥ अग्नेर्देवः । १ । रथेचित्रो मेनका । २ । असमरथः प्रम्लोचन्ती । ३ । अरिष्टनेमिर्विश्वाची । ४ । सुषेणाऽउर्वशी । ५ । शैशिरौ परमेष्ठी । ६ । दिवः सूर्य्यः । ७ । दिवं ध्रुवे । ८ । इत्यष्टौ पञ्चदशाध्याये ॥ १५ ॥ षोडशसप्तदशाध्यायौ क्रमसन्धानरहितौ स्तः ॥ १६ ॥ १७ ॥ स्वस्तोमः । १ । रथन्तरँवेट् । २ । इति द्वे क्रमसन्धानेऽष्टादशाध्याये । एकोनविंशतिमाध्याये क्रमसन्धानाभावः ॥ १९ ॥ वायुर्ज्योग्रत् । १ । स्वर्ण सूर्य्यः । २ । सुद्रेऽर्य्यं । ३ । आपोऽयज्ञि । ४ ।

इति चत्वारि क्रमसन्धानानि विंशतिमाध्याये ॥ २० ॥
एकविंशतिमाध्याये क्रमसन्धानाभावः ॥ २१ ॥ स्वा-
हाकृतः स्वगा । १ । प्राणाय यन्ते । २ । इति द्वे
द्वाविंशाध्याये ॥ २२ ॥ चतुष्पदश्चन्द्रमाः । १ । च-
न्द्रमा रात्रौ । २ । वायुः सूर्यः । इति त्रीणि क्रम-
सन्धानानि त्रयोविंशाध्याये ॥ २३ ॥ चतुर्विंशतिपञ्च-
विंशतिषड्विंशतिसप्तविंशतिमाध्यायेषु क्रमसन्धाना-
भावः ॥ २४ । २५ । २६ । २७ ॥ शुचिस्सुषिाहा ।
१ । देवौ त्रिष्टुभा । २ । इति द्वे क्रमसन्धानेऽष्टा-
विंशाध्याये ॥ २८ ॥ एकोनत्रिंशत्त्रिंशदेकत्रिंशद्वात्रिंश-
त्त्रयस्त्रिंशच्चतुस्त्रिंशत्पञ्चत्रिंशदध्यायेषु क्रमसन्धाना-
भावः ॥ २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ ॥
ऊतिभिः कया । १ । ईळ्वऽईळामहे ॥ २ ॥ इति द्वे क्रम-
सन्धाने षट्त्रिंशदध्याये ॥ ३६ ॥ पाहि मधु । १ ।
स्वाहा रात्रिः । २ । इति द्वे सप्तत्रिंशदध्याये ॥ ३७ ॥
सरस्वत्यसौ । १ । इत्येकमष्टत्रिंशाध्याये ॥ ३८ ॥ ए-
कोनचत्वारिंशाध्याये क्रमसन्धानाभावः ॥ ३९ ॥ अ-
विद्याँ विद्द्वयायाम् । १ । ओं ३ क्रतो । स्मर क्लिबे ।
क्लिबे स्मृतम् ॥ ४० ॥ इति चत्वारि चत्वारिंशाध्याये ॥ इति
पञ्चदशाधिकैकशतं क्रमसन्धानानि । ११५ । एभ्यो-

ऽन्यत्र संहितानुसारेण निर्णयः ॥ इति क्रमसन्धान-
शिक्षा समाप्ता ॥

अथ गलदृक्शिक्षाऽऽरभ्यते ॥

इषे त्वाऽश्वस्तूपरः समिद्धोऽअञ्जन्त्सहस्रशीर्षा पुरुषस्तदेव स्वाहा प्राणेभ्यस्त्वेत्येतेष्वध्यायेषु न गलिता ऋचः । द्वितीयेऽध्यायेऽग्ने व्रतपतऽइति पश्चात्प्रविष्टाऽतस्त्रयस्त्रिंᳪशत् । तृतीयेऽध्यायेऽयमग्निः पुरीष्य इति प्रविष्टाऽतो द्विषष्टिः । पञ्चमेऽध्यायेऽग्ने व्रतपाश्च प्रविष्टोरु विष्णो गतोऽतएकचत्वारिंᳪशत् । षष्ठेऽध्याये प्रथमा ऋग्गलिता, रेवतीरमध्वमित्यत्र देवस्य त्वा एवं पञ्चत्रिंᳪशत् । वाचस्पतय इत्यत्र स्वाङ्कृतोऽसि आत्मने मे सम्पृक्तो । अयन्नोऽग्नेनय सुमत्वाश्चतुश्चत्वारिंᳪशत् । आदित्येभ्यस्त्वेत्यत्र कदा चन सँव्वर्चसा युग्देवा गातुविदऽउदुत्यमवभृथनिचुम्पुणोशिक्वां गलिते सप्त षट्पञ्चाशत् । देव सवितरित्यत्र देवस्याहमेकोनचत्वारिंᳪशत् । अपो देवाऽइत्यत्र सोमस्य त्विषिरसि देवा सुप्ता द्वात्रिंᳪशत् । युञ्जान इत्यत्र युञ्जते मनो विश्वो देवस्य देव सवितः पृथिव्याः सधस्थादृसवस्त्वाच्छृन्दन्तु मिलिताष्टाशीतिः । इशानऽइत्यत्र हᳪसः शुचिषद्वान्हदग्निर्हे इशानो रुक्मः समिधाग्निं पुनरूर्जा सह-

रथ्याऽयन्ते भवन्तन्त्विति मिलिता अष्टोत्तरशतम् । मयि गृह्णाम्यग्निर्मूर्द्धा प्रविष्टाऽअपाम्पृष्ठं मही द्यौर्विष्णोः कर्म्माणि चिन्नन्देवानां त्रिपञ्चाशत् । ध्रुवक्षितिः शुक्रस्य विश्वकर्म्मा त्वा हे नमस्तेषस्य राद्दुरसि मिलितं सहस्य षड्विंशतिः शत् । अग्ने जातानग्निर्मूर्द्धा त्वामग्ने पुष्करादधि भुवो यज्ञस्यायमिहाग्ने त्वमयन्ते लोकम्पृण ताऽअस्येन्द्रं विश्वा न चैता लुप्यन्ति परमेष्ठी त्वा द्वौ मिलित्वा चतुः पञ्चाशत् । नमोऽस्तु नीलग्रीवाय नमोऽस्तु रुद्रेभ्यो द्वौ मिलित्वाऽशीतिः षष्टिः । अश्मन्नूर्जं हिमस्य त्वा वाचस्पतिं विश्वकर्म्मन्हविषोद्दुत्वेन्द्रं विश्वा नक्तोषासाऽग्ने तं सप्तनवतिः । वाजस्य देवस्य त्वा वाजस्य नु यास्ते यावऽ उद्बुध्यस्व येन वहसि विनस्त्वं यविष्ठैकोनसप्ततिः । स्वाहीन्त्वा वायोः पूतः कुविदङ्ग निषावतिः । चन्नस्य योनिः समुद्रे तऽउपयामगृहीतोऽसि पुनर्मिव निषसाद यदि जाग्रद्यदापो यदि दिवा यदेन्द्रस्य युवं सुराममिति नवतिः । इमन्मे तन्त्वा शन्नो वाजेवाजेऽवत होता यक्षदिन्द्रस्यषभस्येति सरस्वतीमेषस्येति प्रविष्टाः सप्तपञ्चाशत् । तेजोऽसि तत्सवितुर्विश्वो देवस्य पृथिव्यै स्वाहा मधवे स्वाहा वाजाय स्वाहाऽसवे स्वाहेति प्रविष्टा एकोनविंशतिः शतिः । हिरण्य-

गर्भः कुविदङ्ग कः स्वित्सूर्य्यऽएकाकी का स्विद्द्यौरा-
शसोदुपयामगृहीतोऽसि सप्तपञ्चाशत् । शादन्दद्भि-
र्हिरण्यगर्भो यः प्राणतोऽग्ने त्वन्नस्तुश्चत्वारिंशं-
शत् । अग्निस्त्वं वैश्वानरो नः पञ्चविंशं शतिः । स-
मास्त्वोद्वयन्नस्तुश्चत्वारिंशं शत् । होता यक्षद्देवा
दैव्या शुचिमुष्णिहानन्तरं सर्वोऽनः पञ्चविंशं शत् ।
देव सवितस्तत्सवितुर्विंशं शत् । अस्या जरासो युञ्जा
थयमिह मूर्द्धानन्दिवऽउद्धुत्यँविश्वेऽस्रदोन्द्र वायू य-
ज्ञो देवानां गावऽउप दैव्यावद्ध्वर्य्यूऽस्रद्येभिः सप्त-
शीतिः । यज्ञाग्नतऽआक्रष्णेन सप्तपञ्चाशत् । अपे-
तोऽश्वत्थे वः सुमित्रिया नऽउद्वयमग्नऽआयूंषि
षष्टादश । ऋचँव्वाचम्भूर्भुवः कया नः कस्त्वा स्योना
पृथिवि आपो हिष्ठेतितिस्रो नमस्ते हरसे सुमित्रिया
नोऽभीषुणो दृते दृंहं ह त्रयोदश । देवस्य त्वा देवी
द्यावा पृथिवीऽन्द्रस्यौजोऽश्वस्य त्वा ऋजवे त्वेयन्त्य-
ग्रे प्रविष्टास्त्वयो हृदे त्वा युञ्जते मनः प्रैतु मखस्य
शिरस्त्रयोदश । देवस्य त्वा सुमित्रिया नऽउद्वयमे-
धोऽसीडऽएह्यदित्यै रास्नासीन्द्राय त्वा षड्द्राविंशं
शत् । ईशा वास्यमन्धन्तमोऽन्यदेव सम्भूतिं च मिलि-
तास्त्रयोऽग्नेनय त्रयोदश । एवं चतुष्षष्टिऋचो विलु-
प्तौ एकादशोत्तरशतानि ऋचोऽधिकाश्च ॥ एवं कृते

ष्टतिशतान्यपि सङ्ख्यकाश्च प्रोक्ताः समार्यैः खलु क
ण्डिकाश्च ॥ १ ॥ इति लुप्तकर्मसङ्ख्यात्मिका शिक्षा
समाप्ता ॥

अथ मनःस्वाराशिक्षाऽऽरभ्यते ॥

मनःस्वारं प्रवक्ष्यामि ब्रह्मणा निर्मितं पुरा ॥ भगवान्याज्ञवल्क्येन भाषितं लोकहेतवे ॥ १ ॥ अथ त्रिपदा द्विरवसानमध्येऽनुदात्तानि । अथाधिमध्येऽनुदात्तानि भवन्ति । कस्त्वा राजन्तमध्वराणां स नः पितेव मा नः परि ते प्रागपाक् प्रणो मरुतो यस्य योगे योगे तवस्तरं तस्माऽअरन्द्रन्नः परस्या ऽअधि पुनरूर्ज्जा समितमग्ने यत्ते शुक्रं तुभ्यन्ता मयि गृह्णामि मधु व्वाता मधुमान्नोऽग्ने युदत्र त्वँय्यविष्ठाग्ने पावक स नः पावका व्वार्ज्जहत्याय शवसे पवमानः सस्तानऽआबोढं च्चित्रभानो धियेषितः । आ नो मित्त्रावरुणाजीजनो ह्यग्ने पत्नीः स यन्नस्त्व व्वायो व्विश्वानि देव हरयो धूमकेतवो व्विश्वेभिः सोम्यँय्येना पावक यद्द्य कच्च व्वरुणः प्राविताषस्तद्यन्मे च्छिद्द्रमिन्द्रो विश्वस्य शन्नो देवीर्हते दृठँ० ह मा स्वाहा मरुद्भिः पञ्चचत्त्वारिंठँ० शत् ॥ १ ॥ अथ त्रिपदा द्विरनुदात्ता । प्रघासिनो हवामहे व्वयठँ० सोमान्त्वर्य्यच्छ मही द्यौः सह रय्याऽग्निः प्रियेषु समुद्द्रस्य त्वा इयं शुक्रज्ज्योतिस्वेदृङ्च व्वैश्वानरो नः पावका नः सुनावमारुहेयन्दे-

वस्य चेततो रातिꣳ॰ सत्पतिं देवस्य सवितुरुपह्वये
गिरीणासुम्ना ते द्रविणो दाः पिपीषति विभक्तारꣳ॰
हवामहऽउभा पिबतꣳ॰ हृदे त्वा द्वाविꣳ॰ शतिः ।
२ । अथ त्रिपदाद्यन्ता मध्येऽनुदात्तानि । अग्ने व्रतप-
ते सुसमिद्धाय त्वयं सनो नु पुनर्न्नऽउदुत्यं तमुत्वा
पाथ्यो वृषाऽऽपो हि ष्ठाऽयमग्नेऽस्यावर्तिन्नग्ने वाज-
स्य येनासमत्स्वग्ने तमद्य नमस्ते रुद्र सम्रा सुजा-
स्यग्नऽआयूꣳष्यश्वय्योऽअद्रिभिर्गोमद्वृणा सख्या तू-
तुजानः स हव्यवाट् स नऽइन्द्राय मध्वा यज्ञमच्छाय
तेऽअस्य वायो ये ते वनस्पतेऽव कस्त्वा सत्यस्सादस-
स्पतिं गावऽउपेन्द्रस्यपास्माऽइन्द्राण्याऽउष्णीषोऽश्वि-
ना धर्ममपातामश्विनैकोनचत्वारिꣳ॰ शत् । ३ ।
अथ त्रिपदाऽऽद्यानुदात्तानि । स्वयम्भूरस्यग्नये क-
व्यवाहनाय समिधाग्निं त्रिꣳ॰ शद्दामास्य प्रत्नान्न हि
तेषाँय्युद्वा हि देव वधो राजन्भद्राऽउतैभिर्न्नौ वी-
तꣳ॰ हविरभ्यां देवापां फेनेन चनस्य योनिर्द्दी-
नावन्तं करम्भिणमश्विनक्तस्य ते महोऽअर्णऽइम-
स्मे सुष्टुतिꣳ॰ सुमतीवृधो युञ्जन्त्यस्यैना विश्वान्य-
भि यज्ञं केतुङ्कृण्वन्नग्निर्नाराणि बृहन्निद्धिध्मो मि-
त्रꣳ॰ ऊर्ध्वऽउग्रा विघनिना सविता ते शरीरे द्वे व्या-
युः पुना तु स्योना पृथिव्येकत्रिꣳ॰ शत् । ४ । अथ त्रि-

पदा मध्योदात्तान्यल्लस्य त्यग्निर्मूर्द्धा महि चौरा-
मिदं विष्णुर्विष्णोः कर्म्माणि मित्रस्य चर्षणीधृतो वि
मुच्यद्वमषाढाऽसि सऽइधानो भद्रो नऽइष्टो ऽग्न-
ग्निः पुनाति ते यत्ते पवित्रं चोदयित्री सूनृतानां
तनूनपात्सुरो द्वारो देवीरग्ने स्वाहा वायुरग्रे-
गाऽअभीषुणो यदद्य सूरऽउदिते विश्वेभिरप नः पूष-
न्नय धर्त्ता दिवश्चतुर्विंशतिः । ५ । अथ त्रिपदा
अन्त्योदात्तानि वीतिहोत्रन्त्वोपप्रयन्तोऽअध्वरं सो-
मानꣳ स्वरणं यो देवाना नऽएतु युञ्जाथाꣳ रासभ-
न्नमुत्त्वा सोमायुञ्जन्त्याप्यायस्व समेतु ते मदिन्त-
मं मधुमन्तमयमग्निः सहस्रिणऽऋतजिन्नऽऋतस्य स्व-
तवाँश्च दिवो मूर्द्धा हिरण्यपाणिमूतयेऽग्निन्दूतं यु-
ञ्जन्ति ब्रध्नं कस्त्वाऽऽच्छयति स्वादिष्ठया तिस्रो
देवीर्बर्हिरिदं नियुत्वान्वा कया नश्चित्रस्तरणिर्विश्वद-
र्शतऽइन्द्रवायू बृहस्पतिमिमे सुतास्तद्विप्रासः प्रजा-
पतो त्वऽऋतञ्चँव्वाचमेकत्रिंशत् । ६ । अथ त्रिपदामध्ये
अन्तोदात्तानि भेषजमस्यूद्ध्वोऽअस्य काव्ययो राजानेषु
देवी द्यावापृथिवी देव्यो वनस्पतऽइयत्त्यग्रे षट् । ७ ।
अथ त्रिपदा कम्पः । प्रत्युष्टꣳ रक्षो हविः रेवतीर-
मद्धं निषसादाग्निस्तिग्मेन पयः पृथिव्यां नारिरस्याद-
देऽदित्यै रास्नासि । ८ । अथ त्रिपदा जात्यः । क-

स्त्वा विमुञ्चति तद्विष्णोर्युक्तेन मनसेन्द्रस्य स्यूरस्व-
ग्नेऽयाह्यग्ने प्रेद्धोऽअग्ने कोऽसि बाहू मे स्वयँव्वाजि-
न्दैव्या होताराऽऊर्द्ध्वमध्वरमस्माकमेकादश।९। अ-
थ त्रिपदामध्ये तकारान्ता आपवस्व परिवाजपतिराते
वत्सो मनो देवत्स्वर्य्यञ्चो मध्यान्ते पवित्रेण पुनीहि य-
ज्ञा नः षट्।१०। अथ त्रिपदान्ते तकारान्ताः।
आधत्तेऽएहि तत्सवितुरभ्यावर्त्तस्वाग्निं स्तोमेन र-
क्षोहा व्विश्वचर्षणिः सप्त।११। अथ त्रिपदाम-
ध्ये नकारान्ताः। अग्निर्ज्योतिषोऽरसकथ्याऽअव क-
या त्वं नीणि।१२। अथ त्रिपदान्ते नकारान्ताः।
ऊर्ज्जं व्वहन्ति त्रीणि पदा वयम्।१३। अथत्रिपदा-
न्तरा आद्युदात्ता। आऽय,न्ते हि,मा सु, न यदाऽऽहा-
नि पञ्च।१४। अथ चतुष्पदा द्विरवसाना मध्येऽनुदा-
त्ताऽन्यथादिमध्योदात्तानि भवन्ति। सा व्विश्वायुः ध्रु-
वासि मनो जूतिर्य्यम्परिधिं सम्बर्हिरत पितरऽआऽग-
न्त गृहा माऽग्ने त्वँ सु, अनु त्वा माता व्वस्व्यसि
समख्ये परि मा प्रति पन्थां सूर्य्यस्य चक्षुर्भवतन्नऽआप-
तये त्वा सन्ते कार्षिरसि यत्ते सोम त्वमङ्गऽऽवायो
मनो न देवा गातुविदो देवी रापऽएष वो गर्भो, यस्यै-
ते व्वातो वा बृहस्पते व्वाजँव्वाजस्य न्वग्नेऽअच्छ सू-
र्य्यत्वचसस्थऽइन्द्रस्य व्वज्रऽइयदस्यन्वग्निस्त्वमग्ने

ष्ट्युभिः सन्ते व्वायुर्य्यदग्ने यदत्ति ये जनेषु योऽअस्मा-
ब्भ्यमन्नपतेऽन्नस्य व्विभूस्त्वा रूपाण्यग्नेऽअङ्गिरऽउदुत्त
मँय्यस्तेऽअद्य त्वामग्ने यजमानाऽउदुत्त्वा गर्भोऽअ-
सि पुनरासद्य सँम्माँव्ययस्यास्ते कामङ्कामदुघे यत्वौष-
धीकृच्छुष्मा यस्यौषधीर्य्याः फलिनीरोषधयः सन्त्वाङ्ग-
न्व्वी मा मेषमूर्ज्जन्नमोऽस्तु सर्प्पेभ्यो याऽइषवो ये
वा यस्ते यावन्तोऽन्तसमुद्रानजस्रमिन्दुँय्योऽअग्निर-
ग्नेस्त्वामग्ने अऽङ्गिरसः सखायः सठं॰ सोऽअग्निर्य्ये
नऽऋषयो नमोऽस्तु नीलग्रीवाय या ते हेति र्म्मी न-
स्तोकेऽसङ्ख्याता सहस्राणि नीलग्रीवाः क्षितिकण्ठा
दिवँय्ये वृक्षेषु ये भूतानाँव्ये पथाँव्ये तीर्त्थान्व्यप्सन्तू-
ञ्जँयऽइमा ऽअवसृष्टापरेहि पिब यत्र बाणा व्वाजो नक्त-
यठं॰ कवन्तस्त्वा याव्येतावद्रूपंय्यजुर्भिराप्यन्ते ये
समाना हे हुतोऽउदीरतामङ्गिरसो नो ये नः पूर्व्वे
त्वठं॰ सोमाच्च्या जानु सरस्वती मनसाऽङ्गान्यात्म-
ञ्छिरो मे नराशठं॰ सः प्राति आनऽइन्द्रो हरिभि-
रिन्द्रः सुत्रामा स्ववाँस्तस्य व्वयमासन्द्रैर्गोभिर्न्न यऽइन्द्रे
ता नासत्या त्वष्टा तुरीपो व्वनस्पतिमभि यः प्राण-
तो द्विपदा या दैव्याऽअद्व्यर्य्यवः किꣳस्विदासीत्सू-
र्य्यसमंय्यान्निर्णिजोपप्रागात्सुमद्य्यदश्वस्य यत्ते गात्रा-
द्धये व्वाजिनं चतुस्त्रिठं॰ शद्वाजिनो यद्वाहिष्ठँव्वा-

यो शुक्रस्तनूनपातमूतिभिर्बर्हिषीन्द्रमिन्द्रꣳ स्वाहा
प्रचेतसा देवानाꣳ स्वाहाकृतिरग्निस्त्वष्टा वीरमसि
यमः समिद्धोऽग्रहव तनूनपात्पथो धन्वना गाऽआज-
न्तीन्द्रस्य वज्रो मरुता सनीकमाक्रन्दय तस्मा-
द्यज्ञात्तस्मादश्वा यो देवेभ्यस्तदेव स नो बन्धु-
र्यौस्मेधाम्हे विरूपेऽअग्ने शर्द्ध प्रवो महे स्रायन्तऽइव
सूर्य्यं ये त्वा जनिष्टाऽउग्रोऽसुतेऽदध्येभिः प्रवीरया
ब्रह्माणि मेऽस्तुतमा तऽस्यधगित्या येन कर्म्माणि नयं
त्वमग्ने प्रथमऽइडायास्त्वा हिरण्यपाणिः सविता ये
ते भगप्रणेतरानासत्या यदा वयन्तुत्तिष्ठापाघꣳ
शन्नो वातो द्यौः शान्तिर्यतो यतो, गर्भो देवानाꣳ
समग्निरग्निनाऽहः केतुनेडऽएहि स्वाहा पूर्ण चक्षुः
स्तोत्रिर्भिस्तपसे स्वाहा शतमेकाशीत्येकन्यूनम् ।
१५ । अथ चतुष्पदा हृयनुदात्तानि गायत्रेण त्वा स-
मिद्वसुभावाम्पूर्णा दर्वि देहि मे मनोनाम्पयः शुक्र-
स्त्वाऽग्नेर्ज्जनित्रमसुर विष्णो हृयꣳ हविष्मतीरिमा
हृदे त्वा वाचस्पतये सुवीरो वीरान्त्सुप्रजाः प्र-
जा ब्राह्मणमहृय वाममहृयापाꣳ समेषा वऽउत
स्नेमन्देवाः स्योनाऽसि युवꣳ सुरामसमागच्छ वाजी
प्रसहृय भस्मना सजूरब्दः साकंय्यक्ष्म द्रासस्वस्तान्द
कृणुष्व पाजऽइषे राये ञाणम्सेऽएना वऽउक्षे सुमन्द्रा-

यो ह्विष्ठाऽअतन्य धनुर्क्तैतवस्त्योऽपामिदं गोत्रभिदं गोविदमस्माकमिन्द्रोऽमीषां चित्तठ॰ सप्त ते सम्मुद्र-द्रा द्रूर्म्मिरेताऽअर्षन्ति सम्यक्स्रवन्ति सह दानुमपुरु-हूत स्वगो न पृष्ठो दिव्यश्याम तं देवा यज्ञन्दीचायै रूपमातिथ्यरूपं ग्रैवेभिः पौष्णानर्ङ्ऽऋचैरुक्थानाम-भिष्टभ्यां प्रातः सवनं पुनन्तु सोमान्त्वा हृद्वा परि-स्रुतः पृष्ठीमिमें दृपदादिव मुमुचानोऽठ॰शुना ते प्राणाय मे तिस्रस्त्रेधाऽऋतुथेन्द्रो महीमूषु सुबर्हिर-ग्निनक्षे यह्वी तिस्रऽइडा आमिला नो देवीऽऊर्ज्जो-ऊती देवा देवानां देवबर्हिर्व्वारितीनाँव्वायुश्चा कुविदङ्गऽऋतवस्त्वऽऋतुथाऽहामासाः पक्षऽऋषि पृच्छा-मि त्वा परमस्याँव्वेदिर्देवानामद्धाः स्वस्ति नः प्रात-स्निदेव स्वाहाऽऋतवस्ते यज्ञमिहैवाग्ने देवा दैव्यो-षासा नक्ताहूति चतस्रऽएता उव ऽइमांल्लासो बह्वीनां पिता तीव्राच्घोषान्दिवः पृथिव्याः परीत्य भूतानि मे-धामन्ऽआतिष्ठन्नमृ यदी माऽ उ त्वाऽयठ॰ सहस्रमु-क्तानायामव प्रातरग्निमुतेदानीमायासाय स्वाहा श-तमेकाधिकम् । १६ । अथ चतुष्पदाद्युदात्तमध्येऽनु-दात्तानि भवन्ति । भूरसि धृष्टिरसि मयीदमग्ने गृह-पतेऽक्रन्कर्माऽदित्यास्त्वा नमो मित्रस्याग्ने व्रतपाः परि त्वा गिर्व्वणो गिरो रेवतीरमद्ध्वमाऽहिर्भूम्मी

ऽग्ना ३ इ पत्नीवन्त्या २ ॥ ऽआवह यज्ञयज्ञं देव स-
वितर्वीतरठं० हा मव वाजे वाजेऽवत सोमठं० स्वा
भानवग्ने सहस्व सोमस्य त्वाऽऽत्वा जिघर्मि परि त्वा
ऽग्ने सोऽह होतः सुजातो विश्वाजसाऽहरहरप्रयावं
विश्वस्य केतुरस्त्वाव्यग्निरिन्द्रं विश्वाऽसुन्वन्तमयज-
मानमोषधीरितीष्कृतिन्नीमाग्ने तव श्रवो वयो भुवो
यज्ञस्य विश्ववस्मै प्राणाय काण्डात्काण्डात्परोहन्त्य-
दित्यास्त्वाऽयोध्याग्निर्ज्जनस्य गोपास्त्वाग्निश्चस्वस्त्वमा-
ऽऽवाचऽऽवहृत्त्वत्त्र नमस्तऽआयुधाय मीढुष्टम शिवत-
म नमस्ते हरसे यो देवानां चक्षुषः पिता बृहस्पते प-
रीन्द्रऽआसामेत मरुमोषि तऽद्वेहं दैव्याय धर्त्रे
कामद्दुभग्निना वाजाय स्वाहा विश्वस्वस्य मूर्द्धन्त्रस्त्वा
पत्नव्या व्याग्रं सोमस्य रूपं यमश्विना यदन त्वया
हि नोऽग्निष्वात्ताः पितरऽआसीनासोऽग्रहीनां वे-
देन रूपे सरस्वती योज्यां तेजः पशूनांह्रोमानि प्रप्र-
यतिहैं व्याभिमाना व्यकाः पतन्यसिमान्नश्वासः स-
मिद्धोऽअग्निरहदंरो देवीरंयहे वासो यद्वरिणी हय-
न्नारयंस्ते केष्वन्तः कस्यस्यानो भद्द्रा यदूवद्याम् मा त्वा-
ऽग्निर्ध्वनयींदश्वाय यत्ते सादे तं वस्त्रवायमेकया च न
स्त्वावान्त्समिधेन्द्रमिडाभिरिन्द्रन्दैव्या होतारा त्वष्टा
रमिन्द्रं समिधानमग्रहत्तनूपातमुद्भिदमीडेऽन्यमीडितं

न्यञ्चतीः सुप्रायणाः सुपेशसा सुशिल्पे पेशस्वती
स्तिस्रः समिद्धोऽअञ्जन्कृदयोऽश्वोपप्रागात्परममास्व-
यज्ञो दैव्या होतारा प्रथमा सुवाचाऽऽनो यज्ञम्भा-
रती ब्राह्मणासः पितरोऽहिरिव भोगैः धीश्वतेऽग्ने
विश्वेषामदितिस्त्वष्टर्यम्य तन्निनस्य वरामहानग्न-
ऽइन्द्र तमिद्रायातमुप प्रवऽइन्द्राय यज्ञाग्रतोऽनुनो-
ऽद्य सिनीवालि पृथुष्टुकाऽआराग्नि समद्भवाय कल्प-
न्ताम्लऽआयुष्मानग्ने परीमऽइन्द्राय त्वा घर्मैतन्मनस
कामं त्रिंशत्यधिकमेकशतम् । १७ । अथ चतुष्पदा-
ऽऽश्रुतान्तमध्येऽनुदात्तानि । अग्नेस्तनूरेतन्ते वदा
य्वनायमग्निरेतन्ते शिवो नाम चित्पतिर्म्माऽस्ववाम-
योः शिल्पे प्रजायाः पीताऽएषा तेऽग्नावग्निर्युञ्जते म-
नोऽग्नेीरसि घ्ल्ङ्घृतपावानः प्रजानास्त्य राया
अयंयज्ञो देवानां सुगर्भोऽसि हरिरसि पुरुदस्मो
विषुरूपः सनस्य ऽऋद्धिर्यस्य दोहो देवस्याऽध्मेश-
स्यार्यमणम्बृहस्पतिं सविता त्वा पुत्रमिव पितराव-
पास्पृष्टं रुद्राः सर्ठ० सृज्य देवस्त्वा घृतेन सीता शतँ-
ऽश्वोऽस्वाननीथ सोमानतीमन्यावोऽव पतन्नीरवदन्ना-
श्वयित्री वलासस्येरज्जयन्नग्ने भुवाऽस्पृचे च्वाऽऽदि-
त्यगर्भमग्निन्नान्यन्येऽसौ यस्मान्नः सहस्राणि स-
हस्रशः पावकया यो वाचस्पतिम्परी दिवा सङ्क्र-

न्द्रेनेनासिषेणोद्या समुद्रो विधेम तऽइमं स्तनं चत्वारि शृङ्गऽऋताषाडृतधामा षडिष्टो यज्ञऽएतन्नाना-नाय व्रयन्तो हविर्द्धानँय्यज्ञाना: करम्भो धानानां रूपं-व्रतेन दीक्षाम्पितृभ्य: स्वधायिभ्योऽश्विभ्याञ्चक्षु-र्जिह्वा मेऽपोऽअद्य बृहदिन्द्राय तिस्रो देवीर्हविषा धातारमिन्द्रमश्विना नमुचे,रश्विना हवि,रश्विना पि-बतां सुत्रामाणं पृथिवीन्देवीस्तिस्रो देवो देवैः स्व-धा त्वा यज्ञासकावृद्धमेनामृद्धमेनम्महानामृन्यो देव-

द्यो ... हरिणी: पृच्छामि त्वा यूपव्रस्क्काऽ...
निकृतमथान्निषदनममेव नोऽमुत्र भूयादध यज्ञाय त्वा
वऽऊर्जो नपातं जोष्ट्रीऽऊर्जाऽऽञ्जती प्रथमा वासु-
पावत्सुजनत्यन्या रथवाहणठं॰ हविश्चन्द्रमा मनसो-
ऽहृद्य: सम्भृत: प्रजापतिश्चरति व्वेनस्तदिदस्मे ब्रह्म
महोऽश्वमेधेर्विभ्राड्बृहद्व्वीञ्चोऽश्वहृद देवासो हि
घृतवती भुवनानामनड्वाऽहम्पिता नोऽसि दिविधाऽङ्-
मसिषे पिन्वस्व दिग्भ्य: स्वाहा व्वाचे यमाय नयोर-
शाधिकशतमेकम् । १८ । अथ चतुष्पदा मध्योदात्ता-
नि । यद्ग्रामेऽवभृथ निचुम्पुण व्विप्रश्नो देवस्य त्वा
चिदसि मित्रो नऽद्ग्रावत्यपाम्पेरुर्व्यो देवासश्चितन्देवा-
नां समिन्द्र णो धाता रातिः सुगा वो व्वयठं॰ हीन्द्र-
स्य ककुभठं॰ रूपं शन्नो भवन्तु व्वाजस्येमासुदुतिष्ठो-

धँऽऊपुषाऽओषधयः प्रति मित्रः सꣳसृज्य सिनीवाली
सुकपर्द्दोत्थाय बृहती दृशानो रुक्मोऽन्तरग्ने शिवो
भूत्वा विश्वा ते प्रप्रायमयꣳ सोऽग्ने दिवो नमः सु
याऽओषधीरश्वत्थे वो यदिमा सहस्व मे दीर्घायुस्त्वा
ऽऊर्जो नपाद्भूरस्यपाङ्गर्भं ध्रुवासितिर्ध्रुवयोनिः कु-
लायिनी घृतवती पृथिव्याः पुरीषमिन्द्राग्नीऽअव्य-
थमानाꣳ सꣳ समित्प्रमुञ्च या ते रुद्र शिव परि नः
शितिकण्ठा यऽएतावन्तऽउप उज्ज्मन्ये देवा देवेषु प्रा-
णदाऽअपानदा हविषा व्याघ्रानस्ताऽआयजन्ताशुः
शिशानो यस्य कुर्मः प्राचीमन्वग्ने सहस्राक्षाद्या जुह्वा
नः सुप्रतीकः सिन्धोरिव प्राध्वने स नो भुवनस्य प-
तऽइन्द्रदृꣳहो वि नऽइन्द्रो व्वेद्या व्वेदिर्य्यै समाना
यमग्ने कव्यवाहन त्वमग्ने ये चाऽधा यथा नः सो-
मो राजाऽद्भ्यः क्षीरं कुम्भो व्वनिष्ठुरान्त्रमन्नुपस्थे
यद्देवास्तिस्रो यत्र ब्रह्म यत्रेन्द्रः समिद्धऽइन्द्रो जुषा-
णो बर्हिर्व्वनस्पतिरवसृष्टऽउषासा नक्तं स्तोकानामि-
न्दुं दैव्या होतारा भिषजा व्वसन्तेनऽऋतुना पञ्चे-
मामगृभ्णन्नभिधाऽअसि प्रजापतये सूर्य्यस्ते चन्द्रमा-
स्ते काऽईमजारे षडस्य होता यक्षत्प्रजापतिँय्यस्ये-
मे यऽआत्मदास्त्वमीशानमदितिद्याः सुगव्यन्नोऽनुवी-
रैः समास्त्वा पीवोऽअन्नारयिवृधऽआपो ह यश्चित्मया-

भिरानो नियुद्भिर्वायविहऽइन्द्रस्य होता यक्षत्तिस्रो देवीर्धि-
यो जोष्टारं स्तोमं बर्हिरन्तरा मित्रावरुणा नीरिव-
तेऽश्वा ते वक्ष्यन्तो ऽवेदृष्टे तिष्ठन्त्वनुजीते पर्य्यपो ह
देवोऽस्याजरासऽइमान्ते विश्वे देवाः प्रवायुँ व्यास्त्या-
न्नोऽषाढँ युत्स्वप्नस्वतीमश्विना प्रातर्जितम्भगमुग्रहवा-
वतीर्गोमतीरिमञ्जीवेभ्यो वहव्यपाँ विश्वाऽआशा
यावती द्यावापृथिव्यभिमठँ० हृदयेन यस्मिन्नक्ष-
व्रीणि सम्भूतिञ्च विद्याञ्च शतमेवाचत्वारिंशत् ।
१९ । अथ चतुष्पदाऽप्यस्योदाहृतानि । अयन्तो देवश्रु-
तौ देवेष्वच्छिन्नस्य ते सप्रथमस्ते नोऽअर्वन्तोऽग्नये गृ-
हपतये यस्य प्रयाणं द्यौस्ते पृच्छामि होता सठँ० सीद-
स्वापो देवीर्न्नाभा पृथिव्याऽउद्देपात्नाह्र दिवस्परि
मौणामुदारऽइडामग्ने ताऽअस्य निवेशनः सङ्क्रमणः
सोमराज्ञोर्बर्हीष्मो वो रिपत्पावकवर्च्चाः शुक्रज्ञानऽश्रु-
तावानस्य महिषँय्या शतेन समन्यवकस्ववक्रतग्ने जाताँस्त-
त्यग्नीभिः सम्प्रच्छ्यवह्वसुप परि ते धन्वनो विकिरि-
दद्र विलोहित यो नः पिता सूर्य्यरश्म्यार्च्चिकेशो
विमानऽएषः पृथिव्याऽअहं स्वर्यन्नस्ताऽ सवितुश्च-
त्तिञ्जुहोमि घृतं मिमिक्षे विश्वेऽअद्यमौ ते यद्राकू-
ताद्धामच्छ इग्निरास्ते रूपमाश्यावयेडाभिर्यक्ष्यामस्तु-
रावन्नम्बर्हिषदँ यस्ते रसस्त्वठँ० सोम पितृभिर्यो-

ऽअग्निस्तदश्विना सुखर्ठ० सत्यति वचेऽस्याद्धासि सि-
न्वन्ति परीडितो देवैरुपासा नक्तमिन्द्रादेन्दुस्यातन्नो-
ऽश्विना भेषजं सविता त्वष्टा भिषजा प्र बाहवा
का स्विदृद्यौरासीद्वर्णानान्त्वा माता चापितेषु कोऽस्य
व्वेद्याहम्प्रजापते न पृषदश्वा मरुतः सन्तु प्रजापते-
स्तपसेमा तेऽउप प्रागाच्छसनं प्राचीनम्बर्हिर्व्वेदस्व-
तोरुद्रिर्येतावानस्य ततो विराडजन तस्य यज्ञाज्जातं
श्रुधि श्रुत्कर्णानऽइडाभिरस्मे रुद्रा विश्वेऽअद्य
त्वमिन्द्र देवन्देवँऽव्वऽइच्छन्ति त्वा न ते द्युभिरक्तुभि-
र्व्वर्गऽएव सप्तऽस्तपसोऽपश्यत्सोमँऽव्यमाय त्वा मर्य त्य-
दस्यवामो ह्यग्मन्त्येव शतमेकमूर्नमिति । २० । अथ-
चतुष्पदासमधेऽतोदात्तानि । सप्तस्वभागास्य येषा-
मद्धीति मो पृगास्व्यायुषञ्जनदृग्नेर्व्वसुमते रुद्रवते
मूर्द्धानन्दिवऽआक्रम्य व्वाजिन्नुदक्रामीद्धोपासा स-
मनसा यास्विक्ष्वतीरमद्वरस्य व्विज्ज्यन्धनुरिमा रु-
द्राय व्विश्वकर्म्मा व्विमनास्समिद्धेऽअग्नावेतावद्रूप-
मग्निश्वात्तानृतुमतऽइदम्पितृभ्यस्तदस्य रूपमास्य । यो
स्मान्नीर्य्यो भूतानां समिद्धोऽअग्निरश्विना तन्नो व्वा-
तऽएकस्त्वष्टुरन्नाद्यो जातवेदा नराशर्ठ० सस्य
महिमानं सद्यो जातः स्वाहुषर्ठ० सदः पितरस्तँव्य-
ञ्चनहि रप्सशं हिरण्यहस्तोऽअसुरः शन्नो मित्रोऽचि-

यज्ञादद्दृष्टया सविता प्रथमे तद्देवत्यैकोनचत्वारिंश-
त् । २१ । अथ चतुष्पदा प्रथमे को जात्यः पविन्न
स्त्यो धान्यमस्यदिव्यै राऽस्न्नासि भूर्भुवः स्वरयमग्निः
पुरीष्योऽद्यावो देवासस्तस्यास्ते सत्यसवसो विष्णोर्नु कं
प्रतद्विष्णूरक्षसां भागोऽसि देवीरापोऽपान्नपात्सा-
विन्नोऽसि देवश्रुतस्त्वैनसऽइममग्नो देव पुरीष्यासोऽअ-
ग्ने त्वं पुरीष्यो मातेव पृथिव्यन्वी राट्सुपर्णोऽस्यश्र्व-
तेमग्नो देव पुरीष्यासोऽअग्ने त्वन्नऽआस्विन्नोजो-
ऽग्नात्यरिस्नुतोऽविन्नं मेऽएवेद्विभूमीचा यकोऽसकौ
यद्वविष्यत्वव शरीरँव्वनस्पते व्वोड्ढो येन द्यौरि-
न्द्राग्नीमित्रावरुणा प्रैतु ब्रह्मणस्पतिं सुखारथिर-
श्वानिव प्रवो महे मह्युत नऽउग्रस्था व्वास्य शतं नि-
शदुत्तरम् । २२ । अथ चतुष्पदा मध्ये जात्योऽग्ने त्वँ-
व्विष्णोररराटमिन्द्रस्य स्यूः परि वीरस्यग्नेरनीकमभि-
भूरसि युजे वां सुजातो ज्योतिषा मूर्द्धासि राडयमु-
रो हरिकेशः पञ्चाजुह्वाना सरस्वत्यश्विना तेजसा
सत्वग्नो यद्वातो देवीऽउषासा नक्तेन्द्रस्य रूपं परि-
द्यावापृथिवी विदद्वदी त्वन्नोऽअग्ने पयस्पथः
परिपातमिमा गिरः प्रनूनङ्चनस्य त्वा सप्तविंशं०
शतिः । २३ । अथ चतुष्पदा मध्येऽन्त्यो जात्यो घृ-
ताच्यसि घृताचीस्त्योऽयमिहाद्यन्नमीमदन्त सुस-

न्द्दथन्त्वा देव सवितरेष ते कदा चन प्रयुच्छसि प्रजापतेः प्रजाऽअभूम हिरण्यरूपाऽउषसः श्मी च परस्याः परावतो याः सेनाऽअपो देवीर्व्वीधा मे पुनस्त्वा युक्ते दिवि व्वर्ष्मी युनक्त सीरा लाङ्गलमपवीरवत् [illegible] प्रति विष्ठिताः पृथिवीँय्याश्च ब्रह्म जज्ञानं तव भ्रमासः प्रजापतिस्त्वाऽवोचाम कवये व्विश्वस्य दूतँय्येन व्वहस्यश्ववोचन्मा नो महान्तँय्या ते धामानि परमाणि व्विश्वकर्म्मा ह्युदग्राभज्ज्वाग्ने प्रेहि प्रस्तरेण परिधिना पशुभिः पशूनायन्तु नः पितरो येऽअग्निष्वात्तास्तमिन्द्रं देवं बर्हिः सरस्वती त्रिः, सठं० शितो रश्मिना भद्रं कर्णेभिर्म्मो नो मित्रो यन्नीक्षणं त्वन्नेणाग्नेऽति निहः स्वासस्थमिन्द्रेणानु त्वा रथो जीमूतस्येव भवति त्रिपादूर्ध्वस्तस्माद्यज्ञात्पुरुषेण नीतिशताऽऽयदिषऽइन्द्रो वृत्रँव्वट् सूर्य्यस्य देवेभ्यो हि देवेन नऽएष वस्तोमो नमस्तेऽअस्तु प्रजापतिः सकिम्भयमाणः कुर्व्वन्नेव स परि चतुष्षष्टिः । २४ । अथ चतुष्पदा कर्म्मो जात्यः । रूपेण वऽउमाऽग्नो व्वीर्य्येण सधमादो द्युम्निन्नीराददे गायत्रेण प्रतूर्व्वन्नेहि मुञ्चन्तु माऽसन्मिन्महत्यग्निम्वनो भैषज्ज्येन सुभूः स्वयम्भूर्य्यहाजिनो दश । २५ । अथ चतुष्पदा कर्म्ममानेऽन्तकः । द्वितीयं व्वसोः पवित्रमग्नये जुष्टं गृह्णाम्यादेदेऽद्वरक्त-

तं सँवत्सरा ध्रुवासि ध्रुवोऽयमग्ने नयान्तस्ते समु-
द्रे तेऽअन्तः सरस्वत्यै त्वाचोऽपो देवाऽआ विश्वतः
सꣳ० सृष्टाँवसुभिः सꣳ० शितस्थे समुद्रे त्वा स बो-
ध्यति विश्वास्त्वमुत्तमाऽअग्ने तव श्रवऽउदग्ने तिष्ठ
स्वेहं दैव्यां ते रुद्र शिवा तनूरघोराऽसौ योऽवसर्पति
सऽइषुहस्तैरभि गोनायभि प्रवन्त धामन्देऽश्विनँस्तुन-
त्रिंश परीतोषिञ्चत बर्हिषदः पितरः पयसा शुक्र-
मिन्द्रः सुत्रामोद्यन्तनूपा भिषजेन्द्रस्तुरः कवष्यो
वाश्विना गोभिः शैशिरेण तेजोऽसि व्यसवस्त्वाञ्जन्तु
गायत्री त्रिष्टुप्ख्योरस्ते भर्ते परेभ्यो मा त्वा तपस्पा-
हि नऽओजो न सुवर्हिषमापश्चिदात्तऽआनो यज्ञं
चन्द्रनाऽअप्सु पञ्च नद्यस्त्वमिमा सह सोमाऽस्तुष्टी
नाम हिरण्मयेन पात्रेण पञ्च पञ्चाशत् । २६ । अथ
चतुष्पदा द्विकम्पः । अपारक्कन्द्यौरिव भूम्ना वनेषु वि
द्वितीयस्समुद्रे ते चत्वारि । २७ । अथ चतुष्पदा
द्विजात्यः । प्रथमँवसोः पवित्रं तनूपाऽअग्ने सन्तः
सिन्धुः पवित्रे स्थः स्थिरो भवापेत वीत स रुद्रन्त्वा-
न्याऽइव वहतुँव्वायव्यैर्व्वायव्यानि वैश्वदेवी पुनत्युप-
हूताः पितरोऽहावस्यग्ने निर्ज्जीरयो होताऽहुर्युर्व्री-
ह्वाणोऽस्य सोमो धेनुं चिरायुष्यँवर्चस्यं षोडश । २८ ।
अथ चतुष्पदामध्ये तकारान्ताः । अक्षतमसि दिवो

वा ज्योतिरसि यस्ते द्रप्सस्कन्दति कोऽदात्सोम-
स्य त्विषिरस्यग्ने बृहन्नर्ठं॰ सः सुविषस्सञ्ज्ञानमसि
हिरण्यगर्भः सँव्वत्सरीण्ट्वष्टुः प्रोष्ठपदश्च्य: किठं॰ स्वि-
दासीद्विश्वतश्चक्षुरुत व्वाजस्य मा सोममद्भ्यः स्वा-
हा यज्ञं व्वरुणो यऽइस्या देवम्बर्हिरिन्द्रन्देवऽइन्द्रन्नरो
देवम्बर्हिर्व्वयोधसं देवो नराशठं॰सस्त्रिभिरादित्यै-
र्न्नो भारती यदक्रन्दो यमेन दत्तं हिरण्यशृङ्गो यऽ
ऽउपश्वासय सहस्रशीर्षा वेदाहमेतमद्भ्या देवास्ति-
रश्चीनो व्विततोऽपाधमत्समन्महे शवसा परं मृत्योः-
स्तच्चुरनेजदेकमन्यदेव नीण्यधिकचत्वारिंशत् ।
२८ । अथ चतुष्पदा अन्ते नकारान्ताः । ये रूपाणि
तन्वा शोचिष्ठाव कद्रुं स प्रथमऽइडेरन्ते युञ्जानः
प्रथमं हस्तऽआधाय प्रतूर्तं व्वाजिन्त्सँव्वसाथामा त्वा-
ऽऽहार्षम्प्रति स्पशो यामिषुं शिवेन व्वचसा द्रापेऽन्ध-
न्यसो व्विश्वकर्म्मन्हविषा वत्रविज्ञाय स्थविरऽइन्द्र-
स्य वृष्णऽइन्द्रेमं पञ्चदिशो व्वयन्नाम व्वाजस्य नु
यहस्तँय्यत्र धाराऽइन्द्रस्य रूपमाया निषसाद मह्नास्य-
भिद्दवान्कः स्वित्सूर्य्यऽएकाकी प्रथ भीमं सम्पदश । ३६ ।
कक्राव्णोऽग्रकारिषं पञ्चस्वन्तस्तान नि । आ वायो आघा
सर्व्वे निमेषा यज्ञो देवानामिन्द्रव यन्ते देव्यग्निर्मूर्द्धा
अग्नीऽअपात्पितुन्त्वश्विभ्यां पिन्वस्य मतौ नव । ३७ ।

त्वारिंशत् । ३० । अथ चतुष्पदा मध्ये नकारान्ताः ।
पुनर्म्मनो ऽ यन्नो ऽ ग्निरूपावीरब्सुरक्रामावक्रन्ददग्निः
सीदन्त्वमयमग्निर्वीरतमो येऽग्नेष्विन्द्रन्दैवीस्तिधा
हितमग्निरस्मिञ्जन्मना नाना हि यमश्विना देवी-
द्वीरऽइन्द्रन्देवीस्तिस्रो द्वारो ध्रुवयोषसं देवीस्तिस्रो
ष्टतेनाञ्जन्यत्पुरुषंयज्ञेन यज्ञठं॰ रुचं ब्राह्मारोदसी
दिवि पृष्ठोऽष्टौ व्यवख्यद्ये नः सपत्नाः षष्टिं शतिः ।
३१ । अथ चतुष्पदा अन्ते नकारान्ता मित्रो नो या
तऽआदित्येभ्यस्त्वा चतुस्त्रिठं॰ शत्तन्तवो मा नऽइन्द्र
ते युक्ताय सविता शिवो भव दृठं॰हस्व देवि द-
ठं॰ष्ट्राभ्यां मलिम्लूनुशिक्कपावको धरुणोतो वाचो
व्वातस्य जूतिं सहसा जाताँल्लोकम्पृणा किठं॰ स्विदनं
कऽउ सो या सेनाऽईदृक्षासऽएतादृक्षासऽएतठं॰ स-
धस्त्य सीसेन तन्त्रं मनसा त्वष्टादधदातऽइन्द्रो दूरा-
त्त्वामग्ने पृणातेऽआजुह्वानऽईड्यो यऽइमे तेऽआच-
रन्ती सुपर्णं व्वस्ते नाभ्याऽआसीदाकृष्णेन प्रवाहजे-
ऽप्रनु पवित्रं सत्य पूर्व्वातः क्रव्यादमग्निमेकाधिक-
त्याऽइव व्रह्मुव्वाय चतुष्पदोत्तराऽऽद्युदात्ताः । सन्त्व-
ऽत्ता: पितरोऽहावत, माह, त्वन्नो न वै त्वामि,
त्वाणोऽस्य सोमो ष्टे, प्रतद्वोचे, दन्विन्त्वाए हि रुन्द्रे-
अथ चतुष्पदामध्ये अथ व्यवसानाऽऽद्युदात्ताः । अ-

ग्ने ब्रह्म व्वसुभ्यस्त्वोग्गंस्युहिवमत्यन्न्यास्मनस्ते यावा-
न्तम्प्रस्क्कथा व्विश्वेदेवासऽआतिष्ठेन्द्रमिद्दुदुत्तम्प्रजापप-
ते नादित्यै रास्नऽऋचो नामाश्विनौ च्छागस्य य-
ङ्क्ष न्द्रसी दैव्यावद्ध्वर्यू ब्रह्मणस्पते इते इठं॰ह मा-
ऽनाधृष्टा पुरस्तादिश्वासाम्भुवां स्वाहा प्राणेभ्यो लो-
मभ्यश्चतुर्व्विंशतिः । २४ । अथ व्यवसानाऽऽद्यनुदा-
त्ताः । युष्माऽइन्द्रः सवितुस्त्वैषा तेऽग्निरुर्ज्योतिर्व्व-
तङ्कृणुतेन्द्रः प्राणोऽयँव्वेनो मरुत्वाँ २ ॥ ऽइन्द्र
महाँ२ ॥ ऽइन्द्रो यऽओजसा व्वाचस्पतिर्भुवसदन्वा-
ऽग्निभ्यास्पत्यस्य क्रुविदङ्ग व्विश्वकर्म्मा त्वा हे पर-
मेष्ठी त्वा हे स्वाहृतोन्वेरठं॰ हविष्ट्वा रूपऽऋतता-
वानँव्वैश्वानरस्य सुमतौ व्वैश्वानरो नऽऊतयेऽग्नि-
र्ऋषिर्य्यमाय त्वा समुद्राय त्वा समुद्राय त्वा ष-
ड्विंशतिः । २५ । अथ व्यवसाने कम्पः । सँव्वपाम्युप-
ह्वतौ हयौः कम्पो जात्यः सठं॰हिताऽस्याकूत्यै प्रयुजे
तप्मायनी मे बृहन्नसि यवोऽसि हे माऽपः प्रपर्व्वतस्ये-
मम्मा हिठं॰सीद्दृहंऽअन्तरिक्षे निषसाद महाँ२॥ऽइ-
न्द्रो व्वज्रहस्तो यस्ते स्तनोऽभीमं सम्मदश । २६ ।
अथ व्यवसाने प्रथमाद्दीर्दात्तानि । आ वायो आघा
ये व्विनो ग्रहाऽऊर्ज्जोज्जतयो यन्ते देव्यग्निर्म्मूर्द्धा
रेतो मूत्रमग्निस्त व्वैश्वानरस्य सुमतौ नव । २७ ।

अथ व्यवसानान्तोदात्ताः । गन्धर्वस्त्वोपह्वूताऽइह्वा-गनेर्व्वो श्विवस्वन्ना दित्यैजतु दशमाख्योऽग्निः पशुरथै-तानष्टावासुते दस्त्रा युवाकवः स्योना पृथिव्यह्वानि शमेकादश । ३८ । अथ व्यवसाने जात्यः । पुरा क्रूरस्य व्विदोऽस्यापोऽअस्मानभि ददं घृतेनाक्तावुपयामगृहीतोऽसि ध्रुवोऽस्यस्मे वः पुरीष्योऽस्यतठं० सत्यस्मभुस्व शुक्रस्त्वेषस्याग्ने त्वन्नोऽअन्तमऽआयुर्य्यज्ञेन क्कविदङ्ग प्रजापतये त्वेमा नु यद्येमामभि नोऽपेतऽएकविंशतिः । ३९ । अथ व्यवसाने द्विर्ज्जात्यः । कोऽसि महाँ२ऽइन्द्रो नृवदाचर्षणिप्राः सहश्च नभश्च तपश्च पञ्च । ४० । अथ व्यवसाने द्वितीयाद्वौदात्तानि । आदित्यास्त्वक्सोम राजन्निन्द्रवायूऽइमेऽइन्द्राग्नीऽआगतसोमासश्चर्षणीधृतऽइन्द्र मरुत्वो जवो यः षोडशी सोमोऽग्निठं० होतारन्नमोऽस्तु रुद्रेभ्यो द्विरन्यथा द्वेवा यदापः प्राणाय स्वाहा बृहस्पते ऽअतीन्द्र गोमन्निन्द्रायाह्यग्निर्ऋषिर्गीयन्छन्दः पयसो रेतो विंशतिः । ४१ । अथ व्यवसाने तकारान्तास्त्वमग्ने व्रतपाऽइदमापो बृहस्पतिसुतस्य व्विश्वकर्म्मन्हविषेन्द्रस्य व्वज्ज्रोऽस्यामा वनस्योल्कन्नाभिर्मोऽष्टौ । ४२ । अथ व्यवसाने नकारान्ताः । महद्रो मे सजोषाऽइन्द्रहरति रुद्रौ भव यदा पिपेष पञ्च । ४३ । अथ व्यवसाने

प्रथमे द्वितीयान्तसुदात्तानि । उखाङ्क्षणोतु कुतस्त्वं द्विः । ४४ । अथ अवसाने त्र्याद्युदात्ताः । एदन्त्या-स्मा द्विः । ४५ । अथान्त्यावसाने त्वाद्युदात्ताः । मा भेरग्ने दव्यायोऽन्यस्त्व स्वाहा यज्ञँ व्वरुणास्योत्तम्भनं देवीरापः शुद्धा वोडँ व्याचन्तो द्वितीयं स्वाङ्कृतोऽसि सोमः पवते यस्तेऽअश्वसनिर्व्वंशीनान्त्वा व्वसवस्त्व-योदशानरैणा ये देवाऽअग्निनेत्रा व्वसवस्त्वा धूपय-न्त्वाकूतिमग्निँव्विष्णोः क्रमोऽसि चिदसि तयाऽऽयु-र्मे नवविंठँ॰शत्या स्रुवत तन्तुना रायस्पोषेण रा-जूयस्यधिपत्न्यसि व्वस्तुते गणेभ्यो घृणावे प्रभवाय पर्यायौजस्व ज्येष्ठयज्ञ शङ्खोकचतिस्त्रा च ठवसु चै-का च चतस्रस्य अविस्मेडिती बर्हिस्तीर्णमन्द्राः सु-पेशसोषे दैव्या होतारा तिस्रो देवीस्तत्वोऽश्विनौ सरस्वती चत्वार्य्यग्निः स्विष्टकृतन्त्वामद्य प्राचध्यै स्वाताय नक्तंभ्यस्ताऽउभौ अवयो गायत्रचै भूम्या-ऽआखून्वातं प्राणेन व्विष्टतिन्नाभ्यैषोऽस्यैकाधिकः ष-डिः । ४६ । अथान्त्यावसाने त्र्याद्यनुदात्तानि । इषे त्वाऽग्नेस्तनूरिन्द्रघोषस्त्वा रक्षोहणं व्वलगहनं रक्षो-हणो वो मित्रस्य माऽऽक्रमने सऽउशिक्वस्त्वनापये स्वाहैष ते निर्ऋतेऽआविर्म्मर्य्योऽजस्रमारोहाग्निः पृथुः सवित्रा प्रसवित्राऽपान्त्वाऽयम्पुरऽइयमुपरि स-

जूर्न्नुभिरनड्वान्वयः पृथिवी छन्दोऽग्निर्देवता-
ऽऽच्छन्दो विराडसि नयः प्राणश्च सत्यञ्च तिस्रो वयि-
श्च व्रीहयश्चाग्निश्च द्वे मित्रश्च चतस्रोऽग्निर्देवं पङ्क-
वाट् च निरश्विभ्यामन्त्वा प्रथममग्नये स्वाहा हिङ्का-
राय प्राणायाश्वयः पृथिव्यै धूम्रानन्वसन्ताय पङ्क्तिवाहो
विराजे प्रजापतये पुरुषान्मयुः प्राजापत्यः पुरुष-
स्तृगश्चन्द्रमसो मशकान्केशैर्मृतांऽस्कन्धा नृत्ताय
सूतमृतये स्तेनहृदयं पञ्चपञ्चाशत् । ४७ । अथा-
न्त्यावसाने छन्दांसि दान्तानि । एष ते रुद्रभागः स्वराड-
सि सपत्नहाऽग्नये त्वा गायत्रच्छन्दसं वसवस्त्वा रुद्रावन्-
न्तु राड्डासि नृपदे वेट् प्रथमं कृष्णग्रीवाऽऽग्नेयाऽव-
न्नतऽऋषभः कृष्णा भौमाः प्रथमद्वितीयोक्ताः सञ्चरा
धूम्रा बभ्रुनीकाशाः प्राजापतये च सौरी बलाकाऽए-
राय हलो वर्षाहूर्ऋतूनामाखुः श्वित्रऽआदित्यानाम्पृष-
तांऽवनिष्कुना नदीभ्यः पौञ्जिष्ठं सन्धये जारमुदसादे-
वेभ्यः कुब्जमायै दार्वाहारमन्यवेऽयस्तापं यमाय य-
मसूं सरोभ्यो धैवरमक्षराजाय कितवं प्रतिश्रुत्का-
याऽअर्तनमग्नये पीवानमष्टाविंशतिः । ४८ । अथा-
न्त्यावसाने छन्दो जाश्यः । कुक्कुटोऽसि जनयत्यै त्वा-
ऽग्ने व्रतपतऽएष ते गायत्रो ध्रुवोऽसि पृथिवीन्देवान्दृं-
वँवसवस्त्वाऽदितिष्ठाऽयन्दक्षिणा सहस्रस्य प्रमा न-

स्यऽआग्रवेऽइमा मे व्वाजस्य वित्तञ्च स्रुचश्च देवो-
ऽअग्निर्य्यते स्वाहा काय द्वितीयाऽग्नये स्वाहाऽऽयु-
र्य्यज्ञेनैकस्मै रोहितो धूम्ररोहितः शुद्धवालस्तृतीयो-
क्ताः सञ्चराः सुपर्णः पार्ज्जन्यः खड्गो व्वैश्वदेवोऽग्नेः
पङ्क्तिर्ब्रह्मणे ब्राह्मणं तपसे कौलालमर्म्मेभ्यो ह-
स्तिपस्वोभद्रसायै पौल्कसमेकान्निंशत् । ४८ । अथान्त्या-
वसाने कम्पः । पृथिवि देवयजन्यदित्यै व्व्युन्दनम-
ग्ने वः समुद्रङ्गच्छ प्रथमः स्वाङ्कृतोऽसि स्वर्ण चतुः
कम्पाद्गूडस्पदे तनूनपात्सरस्वतीन्नराशꣳसन्न द्वि-
कम्पो द्वुरो दिशो व्व्राजाय स्वाहा सोमाय कुलुङ्ग-
ऽइन्द्राग्न्योः पङ्क्तिरग्नयेऽनीकवतेऽग्नये गायत्राय
नस्वीय पूँस्त्वं सुमित्रिया नोऽष्टादश । ५० । अथा-
न्त्यावसाने कम्पो जाप्यः । भूताय त्वा दिविविष्णु-
र्द्वितीयः सिꣳह्यसि तेजोऽसि तेजो मयि धेह्याब्रह्म-
न्नश्वस्तूपरः शिल्पा व्वैश्वदेव्यऽएताऽऐन्द्राग्ना
स्तृतीयः कृष्णग्रीवाऽआग्नेयः कृष्णग्रीवा दश ।
५१ । अथान्त्यावसाने द्विर्ज्यादयः । अस्कन्नमद्याग्ग्र-
यणोऽसीदमुत्तरादाशुश्लिष्टदसमुद्रोऽसि नभस्वानृष्ट-
फ्निस्तिरश्चीनपृश्निस्तृतीयः कृष्णग्रीवाऽआग्नेया-
ऽअन्यत्रापोऽर्द्धमासानामिन्द्रस्य क्रोडो नव । ५२ ।
अथान्त्यावसाने त्रिर्ज्यादयः सिꣳह्यसि मित्रावरुणा-

भ्यान्त्वा षड्जाद्यो मघवे त्वाऽग्नये त्वा मह्यं चतुरो जाद्यः पृथिव्याः सधस्थात्त्रिष्टदसि प्रथमा द्वितीयैस्त्वारो जाद्या मघवे स्वाहा मारुन्द्रादिभिर्नव । ५३ । अथात्यावसाने नकारान्ताः । मनो मे प्रथमाऽग्नयेऽनीकवते ऽवसन्नाय कपिञ्जलानाङ्समुद्राय शिशुमारान्सोमाय हꣳसानग्नये कुटरूंस्सोमाय लबानङ्क्षे पारावताञ्चसुभ्यऽऋष्यानीशानाय परस्वते दश । ५४ । अथ निरवसाने ह्याद्युदात्ताः । नमो वऽइन्द्रश्च मरुतश्च विश्वे देवाश्चमसेऽवेष्टा दन्दशूकाद्ययमुदीचीमारोह मा च्छन्दऽएकया स्तुवतैवच्छन्दो बभ्रनुशाय रोहिताय कृत्स्नायोष्णीषिणो विसृजद्भ्यः सभाभ्यो गणेभ्यस्तक्षभ्योऽश्वेभ्यो ह्रस्वाय ऽनन्याय विंशतिः । ५५ । अथ निरवसाने त्र्यनुदात्ताः । प्राणाय के प्रोह्यमाणः सोमः पूषा पश्चाद्वैणार्थ्येतरस्थ प्रतीचीमारोह मूर्द्धा ऽवयो नवभिरस्तुवत रश्मिना सत्याय प्रतिपदस्यग्निजमद्ग्न्य स्तपस्त्वाऽत्र्य द्वादश । । ५६ । अथ निरवसाने कम्पः । कृष्णोऽसि मधुमतीन्नैः परमेष्ठ्यभिधीत इति त्रिः । ५७ । अथ निरवसाने कम्पो जात्यः । समुद्रोऽस्यग्निरेकाक्षरेण युवानाम्भागस्थः । ५८ । अथ निरवसाने ह्येको जात्यः । विश्वे देवा नवभिरस्तुवत नमो हिरण्यबाहु-

वे नमः कपर्दिने क्षुय्याय ठवाक्याय याम्याय सप्त । ५९ ।
अथ निरवसाने द्विर्जीव्यः । उभिगसि वृष्णाऽऊर्म्मि-
उर्य्येष्ठाय व्विलिम्मने ब्रजज्याय पञ्च । ६० । अथ नि-
रवसाने निर्ज्जीव्यः । सोभ्याय कूप्याय चतुरग्ने
अग्निगोऽसि वृवसूनाम्भागोऽसि सिकत्याय शुष्क्याय
षट् । ६१ । अथ निरवसाने मध्यावसाने द्वितीयभ-
ग्नोऽस्यग्ने वृवाजजिद्विभूरस्याददे रावाऽसि द्विर्जी-
व्यमिन्द्राय त्वा बृहद्वते पञ्च । ६२ । अथ चतुरवसा-
ने द्याद्युदात्ता । प्रत्युष्टꣳ रक्षऽइन्द्रानात्वा व्यम्ब-
काज्वामान्युग्मसि माऽहिर्भूर्म्मा पृदाकुरग्ने पवस्वा-
हृशृयमस्य वृवाजी कनिक्रदद्देवोऽसीन्द्रस्यौजस्त्य
स्वाहा रुद्रायैकादश । ६३ । अथ चतुरवसाने द्या-
द्युदात्ता । अग्नीषोमयोरुज्जितिं द्विषामपाः सꣳहे-
वेनारमुग्रꣳ ग्रुहेऽग्नीषोमाभ्यामम्बलं वृहसु-
ब्जिष्ठस्नोजसा युत्रन्देवस्याहमप्रथमो देवस्य त्वा
पृथिव्याः सुपर्णोऽसि व्विराङ्ज्योतिरिमꣳ सा-
हस्त्रम्लिशी व्वायोः पूतः पुनन्तु मा पितरः सꣳव-
त्सरोऽस्यभिग्नज्योत्सयोर्जवे त्वा हिरण्मयेन पा-
त्रेणाति द्वाविंशतिः । ६४ । इति महर्षियोगियाज्ञव-
ल्क्यकृता मनःस्वारशिक्षा समाप्ता ॥

अथ प्रातिशाख्यप्रदीपशिक्षा-ऽऽरभ्यते ॥

हेरम्बं विघ्नहर्तारं प्रणमामि सरस्वतीम् ॥ ययोर्न्नमनमात्रेण विघ्नसङ्घो विनश्यति ॥ १ ॥ प्रातिशाख्यं च शिक्षाश्च सम्यगालोच्य यत्नतः ॥ वैदिकानां सुबोधाय सम्यक्पाठस्य सिद्धये ॥ २ ॥ सदाशिवतनूजेन बालकृष्णेन धीमता ॥ प्रातिशाख्यप्रदीपाख्या शिक्षा सम्यङ्निरूप्यते ॥ ३ ॥ अथ वेदाध्ययनप्रकारः । तत्र याज्ञवल्क्यः । प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ॥ सावित्रीं चानुपूर्व्व्येण ततो वेदान्समारभेत् ॥ १ ॥ हस्तौ तु संयतौ धार्य्यौ जान्वोरुपरि संस्थितौ । गुरोरनुमतिं कृत्वा पठेन्नान्यमतिर्भवेत् ॥ २ ॥ ऊरुभागे तृतीये तु करन्न्यस्याथ दक्षिणम् ॥ प्रसन्नमानसो भूत्वा किञ्चिन्नम्रमधो मुखः ॥ ३ ॥ कूर्मोऽङ्गानीव संहृत्य हस्तदृष्टिदृढमनः ॥ स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः ॥ ४ ॥ नाभ्याहन्न्यान्न निर्हन्न्यान्न गायेन्न च कम्पयेत् ॥ यथादावुच्चरेद्वर्णांस्तथैवैतान्समापयेत् ॥ ५ ॥ निवेश्य दृष्टिं हस्ताग्रे वेदार्थ-

मनु चिन्तयेत् । सव्यमुच्चारयेद्वर्णान्हस्तेन च मुखेन च ॥ ६ ॥ स्वरस्यैव तु हस्तस्य द्वावेतौ युगपत्स्थितौ ॥ हस्ताद्भ्रष्टः स्वराद्भ्रष्टो न वेदफलमश्नुते ॥ ७ ॥ न कराग्रो न लम्बोष्ठो नाव्यक्तो नानुनासिकः ॥ गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति ॥ ८ ॥ नुनुर्नैका स्फुटो दण्डी स्वस्तिको मुष्टिकाहतिः ॥ एते वै हस्तदोषाः स्युः परभुस्येति सप्तमः ॥ ९ ॥ अथ करचालनक्रमस्तत्रैव अङ्गुष्ठस्योत्तरे पर्वे तर्जन्युपरि यद्भवेत् । प्रादेशस्य तु यो देशस्तस्मात्तं चालयेत्क्रमम् ॥ १० ॥ उदात्तं भ्रुवि पातेन प्रचयं नासिकाग्रतः । हृत्प्रदेशेऽनुदात्तं तु तिर्यग्गात्यादिकाः स्वराः ॥ ११ ॥ स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम् ॥ उत्थाने तु नवाङ्गुल्यमेतत्स्वारस्य लक्षणम् ॥ १२ ॥ तथा च प्रातिशाख्ये ॥ हृयनुशस्तो मूर्द्धन्युदात्तः श्रुतिमूले स्वरितइति ॥ अथ स्वरविचारः । तथा चोक्तम् । स्वरउच्चः स्वरो नीचः स्वरः स्वरित एव च ॥ स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरमिति ॥ अथोदात्तानुदात्तस्वरितस्वराणां लक्षणान्युच्यन्ते । तथा च प्रातिशाख्ये । उच्चैरुदात्तः ॥ १ ॥ ऊर्ध्वभागे निष्पन्नःस्वरउदात्तसञ्ज्ञः स्या-

अधोभागे निष्पन्नः स्वरोऽनुदात्तः स्यात् । यथा । आर्षेयऽऋषीणाम् । अनुदात्तप्रदेशाः । "उदात्ताच्चानुदात्तं स्वरितम् ॥ ४ ॥ उदात्तादक्षरात्परं व्यञ्जनव्यवहितमनुदात्तमक्षरं स्वरितं भवति । यथा स्वाहा हिम । हि ष्म ॥ निहितमनुदात्तस्वरितपरम् ॥ ५ ॥ अनुदात्तमापद्यते स्वरितं उदात्तपरं स्वरित परं च । उदात्तपरे यथा स्वाहा सोमाय । स्वर्ग्यायेति स्वः ग्याय । प्रसवेऽश्विनोः । परमेष्ठ्यभिधीतः । सुचीवेति । स्वरितपरे यथा स्वाहा स्वर्गाः ॥ इत्येवमादयः ॥ "उभयवान्स्वरितः ॥ ६ ॥ ऊर्ध्वाधो भागे निष्पन्नः स्वरः स्वरितसञ्ज्ञः स्यात् । यथा स्वः । धान्यमसि ॥ अथ स्वरितस्यैवान्तर्भेदा अष्टौ स्वरा उच्यन्ते ॥ तथा च याज्ञवल्क्यः । अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव च लक्षणम् ॥ जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः ॥ १३ ॥ तैरोव्यञ्जनसञ्ज्ञश्च तथा तैरोविरामकः ॥ पादवृत्तो भवेत्तद्वत्ताथाभाव्य इति स्वराः । १४ । इति । तत्र प्रत्येकलक्षणमुच्यते । तथा च प्रातिशाख्ये ॥ एक पदे नीचपूर्वः सयवो जात्यः ॥ एकस्मिन्पदे नीचपूर्वोऽनुदात्तपूर्वो यकारेण वा सहितो जात्यः स्वरः प्रत्येतव्यः । नीचपूर्व इति सम्भवद्वि-

येषाम् । अपूर्वोऽपि भवति । नीचपूर्वो यथा । धान्यमसि । कन्याऽइव । अपूर्वो यथा स्वर्देवेषु । तथा च याज्ञवल्क्यः । एकपदे नीचपूर्वः सयवो जात्य इष्यते ॥ अपूर्वोऽपि परस्तद्वद्धान्यं कन्या स्वरित्यपि ॥ १५ ॥ उदात्तादयः परे सप्त ॥ ७ ॥ उदात्तादयः परे सप्त स्वराः प्रत्येतव्याः । अभिनिहितक्षैप्रप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्ततायाभाव्याः ॥ त्रयो नीचस्वरपराः ॥ ८ ॥ अभिनिहितक्षैप्रप्रश्लिष्टा नीचस्वरपराः ॥ एदोद्भ्यामकारो लुगभिनिहितः ॥ ९ ॥ एकारौकाराभ्यामुदात्ताभ्यामुत्तरोऽकारोऽनुदात्तो यत्र लुक् लुप्यते तत्राभिनिहितः स्वरो भवति । यथा तेऽप्सरसाम् । तेऽवन्तु । वेदोऽसि । सुपोऽसि । तथा च याज्ञवल्क्यः । एदो आभ्यामुदात्ताभ्यामकारो विहितश्च यः ॥ अकारो लुप्यते यत्र तं चाभिनिहितं विदुः ॥ १६ ॥ अस्यापवादः । न देवेऽभवति ॥ १० ॥ देवद्रव्ययमेकारः अभवदित्यस्याकारे लुप्तेऽप्यभिनिहितस्वरितो न भवति । यथा देवेऽभवत् ॥ युवर्णौ यवौ क्षैप्रः ॥ ११ ॥ इस्य उस्य यु यू वर्णौ उदात्तौ अनुदात्ते स्वरोदयौ यकारवकाराभ्यां यथासङ्ख्येन युक्तौ यदा तदा क्षैप्रस्वरो भवति । यथा निऋत्यकाम् । त्र्यम्बकाम् । वाजी अर्व-

नु । व्याऽज्यर्व्वन् । नु इन्द्र । न्विन्द्र । इ अग्न: । अ-
ग्न: । तथा च याज्ञवल्क्यः । इवर्णौ यदोदात्तावा
पद्येते यथो क्वचित् ॥ अनुदात्ते परे नित्यं विद्यात्क्षै-
प्रस्य लक्षणम् ॥ १७ ॥ इवर्णोऽउभयतो ह्रस्वः प्रश्लि-
ष्टः ॥ १२ ॥ ह्रस्व इकार उदात्तः परश्च ह्रस्व इकारो-
ऽनुदात्तस्तयोः परस्परश्लिष्टे प्रश्लिष्टस्वरो भवति ।
यथा अभि इन्धताम् । अभीन्धताम् । श्रुधीव । तथा
च याज्ञवल्क्यः । इकारो दृश्यते यत्र इकारेणैव सं-
युतः ॥ उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥
१८ ॥ स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः ॥ १३ ॥ उदा-
त्तात्पूर्वस्मात्परो यः स्वरो व्यञ्जनयुतः स तैरोव्यञ्जन-
सञ्ज्ञकः स्वरो भवति । यथा इडे । रन्ते । तथा च
याज्ञवल्क्यः । उदात्तपूर्वं यत्किञ्चिद्व्यञ्जनेन च संयु-
तः ॥ एष सर्वबहुस्वारस्तैरोव्यञ्जनसञ्ज्ञकः ॥ १९ ॥
उदवग्रहस्तैरोविरामः ॥ १४ ॥ उदात्तावग्रहस्तैरोवि-
रामसञ्ज्ञकः स्यात् । अयं च समस्तपदेषु भवति ।
अवग्रहवचनात् । अवग्रहाभावे तु तैरोव्यञ्जन एव ।
यथा गोपताविति गो । पतौ । यज्ञपतिमितियज्ञ-
। पतिम् ॥ तथा च याज्ञवल्क्यः । अवग्रहात्परो
यस्तु स्वरितः स्यादनन्तरम् ॥ तैरोविरामं तं विद्या-

तः ॥ १५ ॥ स्वरयोरन्तरं विवृत्तिरुच्यते । तया लक्ष्यतइति विवृत्तिलक्षणः स पादवृत्तसञ्ज्ञो भवति । विवृत्त्या व्यवहित इत्यर्थः । यथा ध्रुवा असदन् । ध्रुवाऽअसदन् । का ईम् । काऽईम् । तथा च याज्ञवल्क्यः । स्वरे च स्वरिते चैव विवृत्तिर्दृश्यते यदि ॥ पादवृत्तो भवेत्स्वारः ध्रुवाऽआदिर्यथेति निदर्शनम् ॥ २१ ॥ स्वरयोरन्तरे काले विवृत्तिर्यत्र दृश्यते ॥ स स्वारः पादवृत्तः स्यात्काऽईमिति निदर्शनम् ॥ २२ ॥ उदात्तान्तो न्यवग्रहस्ताथाभाव्यः ॥ १६ ॥ उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यसञ्ज्ञकः स्वरो भवति । यथा तनूनप्त्रऽइति तनू । नप्त्रे । तनूनपादिति तनू । नपात् । तथा च याज्ञवल्क्यः । उदात्तान्तरयोर्मध्ये भवेन्नीचस्त्ववग्रहः ॥ ताथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् ॥ २३ ॥ केषांचिन्मते नाष्टमस्तु ताथाभाव्यः, कम्परूपस्य ताथाभाव्यस्य वाजसनेयिनां संहितापाठे निराकृतत्वात् । उक्तं च माध्यन्दिनशिक्षायाम् । औज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः । अवग्रहोयदा नीचउच्चयोर्मध्यतः क्वचित् ॥ २४ ॥ ताथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् ॥ पदपाठे भवत्येव कम्पो नाम स्वरस्तथा ॥ २५ ॥ इत्यष्टौ

स्वराः सोदाहरणा व्याख्याताः ॥ ऋजुं निहत्य प्रचि- हन्यतऽउदात्ते ॥ १७ ॥ ऋजुं स्वरितस्वरं निहत्य ह्र- स्वमनुदात्तवत् । ततो ऽत्यन्तं निहन्यते नीचैः क्रि- यते जात्याभिनिहितक्षैप्रप्रश्लिष्टा उदात्ते परभूते । यथा स्वः यौरिव । स्वद्यौरिव । प्रसवे अभिम्नगोः । प्रसवेऽभिम्नगोः । नि अग्रिणाम् । न्यग्रिणाम् । स्रुचि इव । स्रुचीवेति । उदात्त इति कस्मात् । धान्यमसि । वैष्णव्यौ । प्रचयस्वरलक्षणमाह । स्वरितात्परमनुदात्तमनुदात्तमथमेकमनेकं वा ॥ १८ ॥ स्वरितात्परमनुदात्तमेकमनेकं वाऽक्षरमुदात्तवत् । एकश्रुत्या उच्चारणीयं स्यात् । अयमेव प्रचयः प्रचितः प्रचो निचित उदात्तमय इति वैदिकैर्व्यवह्रियते । हस्तं तु नासिकाग्रसम्मितं कृत्वा प्रदर्शनीयः । प्रचयन्नासिकाग्रत इति याज्ञवल्क्यशिक्षावाक्यात् । यज्ञपतिः । अश्वऽस्तेयऽस्यार्षेयः ॥ नोदात्तस्वरितोदयम् ॥ २० ॥ स्वरितात्परमनुदात्तं उदात्ते स्वरिते वा परे प्रचयं न स्यात् । इडे० हव्य मा । तन्नस्मि विष्णो । सादन्यँस्विदथ्यम् ॥ उदात्तवानुदात्तः । स्वरितवान्स्वरितः । यत्र स्व- रद्वयस्य प्राप्तौ सत्यां विप्रतिषेधऽउत्तरस्वरत्व- द्भवति । यथा सूनवेऽग्ने । अदद्युत्येऽवस्ते ॥

स्वरविधायकं शास्त्रम् ॥ अथ स्वरसन्धिरभिधीयते ॥

संहितायाम् । १ । अधिकारोऽयम् । पदान्तपदाद्योः सन्धिः । २ । यदत्र सन्धिकार्य्यमुच्यते तत्पदान्तपदाद्योः स्यात् ॥ स्वरे भाव्यन्तस्थाम् । ३ । अकारवर्ज्यो भावी । इत्यनेन सूत्रेण भावीसञ्ज्ञोक्ता । ते भावीसञ्ज्ञका इ उ ऋ ऌ स्वराः स्वरे परे अन्तस्था यवरलाः क्रमश आपद्यन्ते । उदाहरणं यथा पुनात्यच्छिद्रेण । वाज्यर्व्वा । अन्वाज्यस्य । विभ्वर्व्वाना प्रभूः पित्रा । ऌकारोदाहरणं नास्ति संहितायाम् ॥ सन्ध्यक्षरमयवायावम् । ४ । सन्ध्यक्षरसञ्ज्ञकाः स्वरा एओ ऐऔ स्वरे परे अय् अव् आय् आव् एतानादेशानापद्यते । यथा इवऽएहि । अयादेशे कृते "यवयोः पदान्तयोः स्वरमध्ये लोपः । ५ । द्वयोः स्वरयोर्मध्ये विद्यमानयोः पदान्तयोर्य्यकारवकारयोर्लोपः स्यात् । सरस्वत्याऽइन्द्राय । विष्णो एते इति स्थिते अवादेशे कृते लोपे च पूर्वसूत्रेण प्राप्तेऽग्रिमसूत्रेण निषेधः कृतः ॥ न वकारस्यासस्थान एकेषाम् । ६ । स्वरयोर्मध्ये विद्यमानस्य वकारस्य पदान्तस्य लोपो न स्याद्भिन्नस्थाने स्वरे परे, यथा विष्णावेते । आनन्दनन्दावाण्डौ । असस्थान इति किम् । विष्णाऽउरुगाय । ऊरू पादाऽउच्येते ॥ कारव्यऽऋकारे ह्र

सम् । ७ । ऋवर्णे स्वरऋकारे परे ह्रस्वं स्वरः द्यते । त्वऽऋभुमते ॥ सिर्ठं० सवर्णे दीर्घम् । सिमृसञ्ज्ञकः स्वरः सवर्णे परे पूर्वः परस्य एकां मापद्यते । यथा नारातये । स्वाहाग्नये । यौरि म् । पचन्तूपे । अत्र स्वरे भाव्यन्तस्थामिति विप्रतिषेधसूत्रेनेन परत्वादिदमेव भवति ॥ अव दिवर्णऽएकारम् । ९ । अवर्णात्परइवर्णापूर्वः प कारमापद्यते । जयेन्द्राय । एदम् ॥ उवर्ण ओर म् । १० । अवर्णात्परउवर्णः पूर्वस्य एकमोकाप पद्यते । इन्द्रोर्जम् । प्रोहासि ॥ सन्ध्यक्षरे ऐ रौकारौ । ११ । अवर्णात्स्वरात्परं सन्ध्यक्षर एतौ ऐकारौकारौ आपद्येते । यथा भ्राजायैष इन्द्रैन्द्रम् । ओजिष्ठौजिष्ठः । प्रौक्षन् ॥ समुद्र संस्त्वेमं स्त्वोद्मन्निति च । एते निपात्यन्ते । अन्त प्राप्तस्य अन्यथोच्चारणं निपातनम् । यथा अपां समुद्रस्येमन् । अपान्त्वेमन् । अपान्त्वोद्मन् ॥ परकालः पूर्वकाले पुनः । १२ । जातः परकालो धिः पूर्वकाले विधौ प्राप्ते सत्यसिद्धः स्यात् । तऽ ई मुवन्तु । पादाऽउच्यते । अराध्याऽएदिधिषुःपी म् । राध्याऽ ऋदन्तः । अत्र यवयोः पदान्तयोरित्य परकालत्वात्तस्मिञ्जाते पूर्वकालं यथायथं प्राप्तं

न्विकार्यं न भवति ॥ आरब्धकारोऽष्टकात् । १३ । अष्टकात्परश्चकारः पूर्वस्य एकमात्रामापद्यते । करश्च अष्टकार इत्यस्यापवादः । यस्यावश्यं प्राप्तौ सत्यां यो विधिरारभ्यते स तस्यापवादः, यथा स्वपनमात्यै ॥ एदोद्भ्यां पूर्वमकारः । १४ । एदोद्भ्यां परो अकारः पूर्वस्य एकमेकारं ओकारं वाऽऽपद्यते । एतत्प्रकरणे यानि विसर्गान्तानि पदानि तेषां "सर्वो अकार ओकार" इत्यनुवर्तमाने "अकारे चे"ति वक्ष्यमाणसूत्रद्वयेन च ओकारान्तत्वम् । उदाहरणं यथा अग्नयेऽनीकवते । अग्नेद्ब्रायोऽभीतम ॥ प्रकृतिभाव ऋक्षु । १५ । ऋक्षु नियताक्षरच्छन्दस्सु मन्त्रेषु एदोद्भ्यामपरो अकारः प्रकृत्या भवति । एदोद्भ्यामित्यस्यापवादः । यथा गर्भेऽअन्तः । वायोऽ अस्मिन् ॥ यजुष्षु च । १६ । अनियताक्षरेषु अविशेषेण एकारौकाराभ्यां परः अकारः पूर्वस्य एकारमोकारं वाऽऽपद्यते । यथा अग्रेपुवोऽग्रे । व सेऽपानः । चकारादृक्ष्वपि क्वचित् । योऽसावादित्ये पुरुषः सोऽसावहम् ॥ का भुवोती सदना होतारा ज्या स्वधा पृथिवी प्रतिमिमसदन्नश्वामाकर्मोर्द्विमिथ-सनक्षाद्वृतास्तिषु ॥ १७ ॥ कादीनि नव पदानि यथासङ्ख्यं इमादिषु नवसु परेषु प्रकृत्या भवन्ति । का-

ऽईम् । भुवाऽअसदन् । ऊतीऽअश्याम । सद्नाऽअका-
र्म होताराऽऊर्द्धम् । ज्याऽइयम् । स्वधाऽअवस्तात् ।
पृथिवीऽउत द्यौः । प्रतिमाऽअस्ति ॥ प्रगृह्यं स्व-
रे ॥ १८ ॥ प्रगृह्यसञ्ज्ञकं पदं स्वरे परे प्रकृत्या
भवति । इन्द्राग्नीऽअपात् । इन्द्रवायूऽइमे । धिषे-
ऽध्यैपयः । अस्मेऽआरात् । त्वेऽइषः । अमीऽअ-
न्यः ॥ उकारोऽपृक्तोऽस्पर्शात् ॥ १९ ॥ पूर्वेण भावे
नियमार्थं वचनम् । अपृक्तउकारः स्पर्शात्परत्वाभाव
एव प्रकृत्या । एतवाऽउऽअञ्जि । अस्पर्शात्किम् । त-
दुइन्निके । सम्वतद्धामि ॥ न रोदसीमे ॥ २० ॥
रोदसी इत्येतद्द्विवचनान्तं पदमपि प्रकृत्या न भव-
ति इमे शब्दे परे । रोदसीमे शाये ॥ इत्यष्टौ स्वराः
सोदाहरणा व्याख्याताः । अथाङ्गुलिभिः प्रदर्शनीयवि-
षया व्याख्यायन्ते । तत्र व्यञ्जनानामिमे धर्माः सन्ति
छ्वितम्मात्कारणादादौ व्यञ्जनसन्धिरुच्यते । तकारव-
र्गश्चकारवर्गे चकारवर्गम् । १ । तकारादयः पञ्च च-
कारादिपञ्चान्यतमे वर्णे परे चकारादीन्यापद्यन्ते ।
अत्र स्थान्यादेशयोर्यथासङ्ख्यम् निमित्तकार्यिणोस्तु
न "शकारे च"त्यस्याप्येतत् । सूत्रशेषत्वेन निमित्तानां
पठत्वात् । योगविभागस्तु तावत एवोत्तरसूत्रेऽनुवृ-
त्त्यर्थः । युञ्जाहम् । श्वाच्छच्छन्दः । अनूज्जेषम् । आन्नू-

श्नथतु ॥ शकारे ॥ २ ॥ शकारे च परे तवर्गश्चवर्गमापद्य-
ते । अदित्याञ्छ्मश्रुभिः ॥ परश्शोऽस्पर्शपरश्छम् ॥ ३ ॥
तवर्गात्परः शकारश्छकारमापद्यते स्पर्शपरो न चेत् ।
चात्पूर्वश्चवर्गम् । यच्छूद्रे । कूश्माञ्छकपिञ्जलैः । अस्प-
र्शपरः किम् । पूर्वसूत्रोदाहरणं बोध्यम् ॥ नुः । ४ ।
अधिकारोऽयम् ॥ अनुनासिकमुपधा । ५ । अयम-
धि तथा ॥ चछयोः शम् । ६ । चकारे छकारे च प-
रे नकारः शकारमापद्यते । उपधा चानुनासिकम् ।
ताँश्चक्रे । जटायां अवँश्छिन्धि ॥ तथयोः सम् । ७ ।
तकारे थकारे च परे नकारः सकारमापद्यते । उप-
धा चानुनासिकम् अस्माँस्ते । पशूँस्तान् ॥ दधन्वा-
न्त्स्वतवान्यकारे लोपम् । ८ । अनयोर्नकारो यकारे प-
रे लोपमापद्यते । नाचानुनासिकोपधा । उक्तं च व-
सिष्ठशिक्षायाम् । स्वराणामानुनासिक्यं प्रतिजानन्ति
सर्वदा । वर्जयित्वा तमाकारं यत्र लोपो विधीयते ।
दधन्वा यः । स्वतवायातु ॥ रयिवृधे च । ९ । रयिवृधे
परे नकारो लोपमापद्यते । पीवोऽन्नारयिवृधः ॥
नॄन्पकारे विसर्जनीयम् । १० । नॄनित्ययं नकारः प-
कारे परे विसर्जनीयमापद्यते । अनुनासिका चोप-
धा । नॄँःऽ पाहि ॥ ऋतून्परिधीन्क्रतून्वनस्पतीन्त्स्व-
रे रेफम् । ११ । एतेषां नकारः स्वरे परे रेफमाप-

द्यते । अनुनासिका चोपधा । शतृँ१ ॥ रप । परि-र्याँ१ ॥ रपोर्गुं । क्रतूँ१ ॥ रनु ॥ एते छन्दकाद्यमानिका भवन्तीति पाराशरेणोक्तम् ॥ आकारोपधो यकार-म् । १२ । आकारोपधो नकारो यकारमापद्यते स्वरे परे अनुनासिका चोपधा । याँ २ ॥ ऽआवहः । अत्र यवयोरित्यनेन लोपेऽपि "न परकाल: पूर्वकाले पुन"-रित्यनेन तस्यासिद्धत्वात्प्रकरणान्तरस्थत्वाच्चानुनासि-कवर्जनं न भवति ॥ स्पर्शोऽपञ्चमः स्वरघौ तृतीय-म् । १३ । प्रतिसर्गभाद्याः स्वरे घिसञ्ज्ञके च परे वर्गतृतीयमापद्यन्ते । स्तुषगिरा । वेडसि । तदि-द्दासम् । सङ्क्रमोदाहरणं । अनुष्टुबेव: । कर्गसि । राडयन्ती । तस्मादग्नात् । त्रिष्टुब्जगती । अप-ञ्चमः किम् । युङ्ङसि । अस्मिन्यज्ञे ॥ पञ्चमे पञ्चम-म् । १४ । अपञ्चमः स्पर्शः पञ्चमे स्पर्शे परे पञ्च-ममापद्यते । वाङ्माच्या । व्याङ्माच्या । यन्मे छिद्र-द्दद्रम् ॥ हश्च तस्मात्पूर्वचतुर्थम् । १५ । अपञ्चमात्परो हकारः पूर्वस्य चतुर्थमापद्यते चात्पूर्वस्तृतीयम् । स्वा-ह्युतः । समसुखोद्धृद: । अवाड्ढव्यानि । अपञ्चमा-त्किम् । जीमूताग्द्धदयौपशेन ॥ "अनुस्वारठं० रो-ष्मसु मकारः । १६ । मकारो रेफे ऊष्मसु च पर-ष्वनुस्वारमापद्यते । "अनुस्वारस्य ठं०मित्यादेश: प्रा-

षसहरेफेषु"। तेषामनुस्वारादीनामङ्गुलिभिः प्रकारो दर्शितवान्याज्ञवल्क्यः। मुष्ट्याकृतिर्मकारे तु नकारे तु नखग्रहः। ककारान्ते टकारान्ते ङणोऽधोऽङ्गुलिनामनम्। १। पञ्चाङ्गुल्यं पकारे तु तकारे कुण्डलाकृतिः। ऊर्ध्वक्षेपाच्च योष्मास्यादधः क्षेपाच्च यो भवेत्। २। एकैकामुत्क्षिपेदोरः स्वरिते तूभयं क्षिपेत्। स्वरितं यद्भवेत्किञ्चित्सवकारोष्मकं ततः। दीर्घं वा यदि वा ह्रस्वं निक्षिपत्तूभयोरपि॥ ३॥ जात्ये च स्वरिते चैव यकारो दृश्यते यदि॥ कर्त्तव्यस्तूभयोः क्षेपो व्वायव्व्यैरिति दर्शनम्॥ ४॥ तथा च लघुमाध्यन्दिनीयशिक्षायाम्। कनिष्ठामोचनं कुर्य्यान्नीचे च प्रचये सति। नमः कूप्याय प्रथमो द्वितीयो जाग्रतस्तथा। १। तर्जनीमोचनं कुर्यादुदात्ते तु विसर्गके। देवो घर्मस्तथा ह्रस्वे स्वरिते तूभयं क्षिपेत्। २। अम्बो मर्त्यो भवेन्मध्यं स्वारे दीर्घे कनिष्ठिकाम्। उभयोरपि ह्रस्वे च वकारे स्वरिते सति। ३। दीर्घेऽपि चोभयोः क्षेपइति शास्त्रव्यवस्थितिः। अस्यार्थः। मकारे मुष्टिः। नकारे अङ्गुष्ठेन तर्जनीनखग्रहणम्। ककारे टकारे ङकारे, णकारे पदपाठे इषरवस्त्वित्यादौ च तर्जनीमधो नामयेत्। पकारे पञ्चाङ्गुलिमेलनम्। तकारे कुण्डला-

रे विसर्गे तर्जन्याः प्रसारणम् । अनुदात्तात्प्रचयाञ्च परे कनिष्ठिकायाः प्रसारणम् । ह्रस्वात्स्वरितात्परे चोभयोस्तर्जन्यकनिष्ठिकयोः प्रसारणम् । दीर्घात्स्वरितात्परे विसर्गे कनिष्ठिकायाः चेपः । वकारयुक्ताद्दीर्घादपि परे चोभयोः । यकारयुक्ताज्जात्यस्वरिताद्दीर्घादप्युभयोः । इत्यङ्गुलिप्रदर्शनीयविषया निरूपिताः ॥ अनुस्वारविषयो व्याख्यायते ॥ अनुस्वारठँ० रोष्मसु मकारः । १ । मकारोऽनुस्वारमापद्यते रेफसंहितोष्मपरेषु । यथा अपाम् रसेन । अपाꣳरसेन । त्वाम् । मश्वन्तः । त्वाꣳमश्वन्तः । देवम् सवितारम् । देवठँ० सवितारम् । उरुम् हि । उरुठँ० हि । तथा च प्रतिज्ञासूत्रे । अनुस्वारस्य ठँ०मित्यादेशः शषसहरेफेषु, तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरुभेदै र्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः । अनुस्वारस्य स्थानेठँ० इत्यादेशो भवति शषसहरेफेषु परेष्विति शेषः । यथा चिठँ०शत् । हवीꣳषि । पयाꣳसि । हठँ०हस्व । सठँ०रायः । ह्रस्वादक्षरात्परो दीर्घः । गुरौ परे नाम सँय्युक्ताक्षरे परे गुरुर्भवति । क्रमेणोदाहरणानि । दीर्घात्पराद्ध्रस्वो यथा । पृथिव्याꣳशतेन । यजूꣳषि । सहवाꣳसम् । अङ्क्ताꣳह-

विधा। दृषाॅ रयीणाम्। ह्रस्वात्परो दीर्घो यथा षि- ठं॰ सहाम। सर्वं॰ षडिति। भूयासं॰ सुगृहप- तिः। सठं॰ रायस्पोषेण। गुरौ परे गुरुर्यथा। भेष- जॅ स्त्रिया। दॅष्ट्राभ्याम्। सोमानॅ स्वरणम्। सि- ॅह्यसि। ऋकारसंयोगे परे दीर्घ एव भवति न तु गुरुः। उक्तं च कात्यायनशिक्षायाम्। अनुस्वारस्य ठं॰ कार आदेशश्छन्दसि स्मृतः। ऊष्मरेफेषु परतस्तस्य द्वैविध्यमुच्यते। १। ह्रस्वाद्दीर्घो दीर्घाद्ध्रस्वो गुरौ च परतो गुरुः। ऋकारपर ऊष्मान्तो दीर्घाद्दी- र्घोऽपि जायते। २। तथा अमोघनन्दिनीशिक्षायाम्। अनुस्वारो द्विमात्रः स्यादवर्णाद्व्यञ्जनोदये। ह्रस्वाद्वा यदि वा दीर्घाद्देशानाठं॰ हृदये यथा।३। सठं॰सृष्ट- जित्सठं॰स्रष्टां संयोगे ह्रस्व त उपधा च दीर्घमापद्येत... षयः। अथानुस्वारेऽङ्गुलिप्रदर्शनविचारः लाक्षकस्य... म... कृतसर्वसङ्ग्रहहस्तस्वरप्रक्रियाग्रन्थे। स्वरधौ। ...न्याज्या क्षिप्रं स्याद्द्विलके लघौ। ४धिसञ्ज्ञके ...प्रकरणस्थत्वाद्दीर्घे अनुस्वारे रानलम्। ...या निष्काश्या। द्विलके गु... अङ्गरभकार- ...नुस्वारे क्षिप्रं स्यात्। क्षिप्रं नादैरिव। "प- कारिकायामेवोक्तम्। तर्जन्याः पृष्ठसंस्थि। "अनरथ" इ- त्यनामितम्। तं क्षिप्रं स्थि विजानीयाज्जत्परत्वा" त्मानस्य

रितम् । ५ । अयं भावः । लघौ अनुस्वारे गुरौ अनुस्व
च तर्जन्याः पृष्ठमङ्गुष्ठाग्रेण नामितं कार्यम् । इदम
नुस्वारेङ्गुलिक्षेप इति सामान्येनोक्त्वा, अङ्गुष्ठाकुञ्च
लघावनुस्वारे त्वपाद्य रसम् । दीर्घे रङ्गे च तर्जन
प्रसारः परिकीर्त्तितः । ६ । इत्यनया दीर्घेऽनुस्वारे र
च तर्जन्याः प्रसारणं तदन्ये ह्रस्वे गुरौ चानुस्वारेऽ
ष्ठाकुञ्चनमिति, भगवता याज्ञवल्क्येन प्रतिपादिते
शास्त्रेणाप्यविरुद्धं भाति । तर्जन्याकुञ्चनं तु बाध्याभ
बाह्विशेषविहितत्वान्न भवति । अत एव विद्वांसोऽ
दीर्घेऽनुस्वारे तर्जन्याः प्रसारणम् । लघौ गुरौ चा
स्वारे तर्जनीपृष्ठेऽङ्गुष्ठं नामयति ॥ स्पर्शे परपञ्चमः
२ । मकारः स्पर्शे परस्य पञ्चममापद्यते । ङ्किङ्कारोय
...ने । अनु ...त्यादीदाहरणं बोध्यम्
रेफेषु, तपङ्क्त्या । ८ । परस्य वर्णस्य किञ्चित्तत्सवि
त्परो गीयम् ॥ अन्तस्थामन्तस्थास्वनुनासिकां परसव
नुमत्र । ५ । अन्तस्थामन्तस्थासु परासु परेषां समान-
परो नुनासिकामन्तस्थामापद्यते । तँय्यज्ञम् । सँ-
यांऽसि ल्लोकम् ॥ तकारो ले लम् । ६ । तकारो ल-
दीर्घः । रसमापद्यते । ग्रासील्लोकम् । परिच्छिल्लोका-
क्रमेणोदा ासिकम् । ७ । नकारो लकारे परे अनुना-
व्याप्त प्रतेन पद्यते । अस्मिँल्लोके । भीँल्लोकान् ।

स्वरच्छकारे चकारेण सर्वत्र । ८ । स्वरः छकारे परे चकारेणागमिकेन स विधीयते पदादिमध्यान्तेषु । अच्छावदामसि । माच्छन्दः । जगतीच्छन्दः ॥ यस्यातिच्छायसहेति न । ९ । एतेषान्न । सहच्छन्दसः । अतिष्ठा-यच्छिद्रा, यस्य छाया । ङ्णौ क्गाभ्याण्टसकारे । १० । ङका-रणकारौ यथासङ्ख्यं ककारटकाराभ्यां व्यवधीयेते सकारे परे ॥ प्राङ्क्सोमः । समुद्रान्त्समस्पत् । उद-स्तभाने लोपम् । ११ । उदः परः स्तभानशब्दीयसकारो लोपमापद्यते । उत्तभान । "तस्मादित्युत्तरस्यादेः" रि-त्यस्मिंस्सूत्रेऽव्यवहितस्येत्युक्तत्वात् । उद्दिव एस्तभानेत्यत्र न सकारलोपो भवति । भाव्युपधस्य विसर्जनीयो, रे-फे लुप्यते दीर्घश्चोपधा । १२ । भाविसञ्ज्ञोपधो रिफि-तस्य विसर्गो रेफे परे लुप्यते उपधा च दीर्घमापद्यते । वसुभीरुद्रैः । जटायामुदाहरणम् । अन्ताहकस्य: । नीरपारशसि । कद्रीरुद्रः । धातूराय: ॥ रेफण्ट स्वरयोः । १३ । भाव्युपधो रिफितस्य विसर्गः स्वरे परे घिसञ्ज्ञके च परे रेफमापद्यते । पश्निरक्रमीत् । वायुरनिलम् । अग्निर्मूर्धा । त्वष्टुर्जामातः । अहर्जिन्व । "अहरभकार-पर" मित्युक्तत्वात् । युञ्जन्ति प्रमहोऽस्य: । स्वर्द्यौरिव । "प-दादिष्वाजित्पर" इत्युक्तत्वात् । स्वश्वीय । "अनर्वा" इ-त्युक्तत्वात्स्वाय चारणाय च । "अजित्परत्वा" त्यातस्य

निषेधः ॥ कण्ठ्यपूर्वो यकारमरिफितः । १४ । रिफित-भिन्नः कण्ठ्यपूर्वो विसर्गो यकारमापद्यते स्वरे परे । यऽइमा विश्वा । शुष्माऽओषधीनाम् । यवयोरिति लोपः ॥ लोपन्धौ । १५ । अरिफितः कण्ठ्यपूर्वो विसर्गो लोपमापद्यते धौ परे । देवा देवैः । अयक्ष्मा मा ॥ भूमेश्चाकारेऽष्टके । १६ । भूमिशब्दसम्बन्धी विसर्गो लोपमापद्यते अष्टकाकारे परे । भूम्याददे ॥ सर्वो अकार ओकारम् । १७ । ह्रस्वाकारपूर्वो अरिफितो विसर्गः सोपध ओकारमापद्यते धौ परे । "लोपं धा" वित्यस्यापवादः । देवो देवैः, देवो वः सविता ॥ अकारे च । १८ । अरिफितो ह्रस्वकण्ठ्यपूर्वो विसर्गः सपूर्व ओकारमापद्यते अकारे परे । सुपोऽसि । कृष्णोऽसि ॥ स्वोरुर्ह्वात्रह्वस्य रात्र्याम् । १९ । स्वरित्ययं कद्रे अहरित्ययं रात्रिशब्दे परे सपूर्व ओकारमापद्यते । स्वोरुह्णाः । अह्नोरा त्रयोः ॥ चछयोः शम् । २० । विसर्गश्चछयोः शमापद्यते । इन्द्रश्च । प्रजापतिश्छन्दः ॥ तथयोः सम् । २१ । विसर्गस्तथयोः समापद्यते । कस्त्वा । नमस्ते ॥ षविका-रर्ठ० शाकल्यः शषसेषु । २२ । एषु विसर्गो विकारन्नापद्यते शाकल्यमतेन । व्यायव्याः श्वेताः ॥ अग्नीषोमयोः षष्ठी । व्यानस्पत्यः ॥ प्रकृत्या कखयोः पफयोश्च । २३ । कखयोः पफयोश्च परयोर्विसर्गः प्रकृत्या भवति । सिमाः

छायवस्मि, ततः स्वनेम । व्यसो : पवित्रम् । युः फलिनीः ॥ तस्मिँस्तस्ट्रजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम् । २४। इति पाणिनीयसूत्रैः प्राप्ताः प्रतिषेधा बोध्याः ॥ लुङ्मुदि जित्परे । २५। जित्सञ्ज्ञके परे मुत्सञ्ज्ञके च परभूते विसर्गो लुप्यते । भक्तास्तुताः। ऊर्जस्त्य ॥ उपवसने पीवः। २६। अयं विसर्गो लुप्यते उपवसने परे। पीवोपवसनानाम् ॥ सओषधीमयोः । २७। स इति विसर्गो लुप्यते ओषधीशब्दे इमशब्दे च परे। सौषधीरनु। सेमान्नः॥ व्यञ्जने च। २८। सइत्ययं विसर्गो लुप्यते व्यञ्जने परे। स ते लोकः स पर्य्यगात् । स बोधि॥ स्य एष च। २९। स्यः एषः इमौ विसर्गौ लुप्येते व्यञ्जने परे । स्यराध्यः । एषते। एषच्छागः॥ स्य व्याजी। एपस्य। इदं सूत्रद्वयं "तथयोः स"मित्यादीनां बाधकम्। स्य व्याजी स बोधीत्यादौ "सर्वो अः कार ओकार" मित्यनेन पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायेन "विप्रतिषेध उत्तरस्तत्र वदल्लोपे"। ३०। इत्युक्तत्वादेतस्य बाधो मध्येऽपवादः प्राप्तः अल्लोप इत्युक्तत्वान्न भवति ॥ अनितावध्याये। ३१। अधिकारोऽयम्। विधीयमानमागमविकारादिकार्यमितौ परे न भवति। उपस्थितं विना इति परत्वासम्भवात् । स्थितोपस्थितस्य तु एकविषयत्वादन्तःपदविकारागमवि-

षयोऽयं निषेधः । अध्याये इत्यधिकारोऽवध्यर्थम् । अधिकारः किम् । तवस्तारमिति तवः । तरम् । इत्यादौ "तथयोः स"मित्यादि भवति । अध्याये किम् । गोव्यच्छमिति गो । व्यच्छम् । इत्यादौ "स्वरे भावी"त्यादि भवति । नायं निषेधो विकारबलः पदस्यैव स्थितोपस्थिते नान्यत्र तेन रायस्पोषद ऽइति रायस्पोष । दे । अत्र रायः स्मृ इति सकारो भवति ॥ इति षत्वचर्यायाम् । ३२ । पुनरुच्चारितं चर्चा । इतः परं पदं तत्र इतौ पदे यथा न भवति तद्वदेव ॥ ककारपकारयोः सकारम् । ३३ । भाव्युपधः षकारम् । ३४ । भाव्युपधो विसर्गः षकारमापद्यते । परिशेषात्कारव्यपूर्वः सकारः ककारे च परे । अधिकारोऽयम् । उत्तरसूत्रेषु यथायोग्यमुभयोः सम्बन्धः ॥ आविर्निरिड इडाया वसतिर्वरिवः । ३५ । एतेषां विसर्गः ककारपकारयोर्यथायथं सकारं षकारं चापद्यते । आविष्कृणुष्व । अग्ने निष्पर । इडस्पदे । इडायास्पदम् । वसतिष्कृता । वरिवस्कृणोतु ॥ दिवोऽककुत्पृथिव्योः । ३६ । दिव इत्ययं विसर्गः कपयोः समापद्यते ककुत्पृथिवीशब्दौ वर्जयित्वा । दिवस्परि । दिवस्पृथाय । दिवस्पृष्ठे । अककुदित्यादि किम् । दिवः ककुत् । दिवः पृथिव्याः ॥ रायः सहस्पोषपुत्रयोः । ३७ । एतौ यथासङ्ख्यं पोषपुत्रयोः प-

रयोः सकारमापद्येते । रायस्पोषे । सहसस्पुत्रः ॥ तम-
सोऽपरस्मात् । ३८ ॥ कपयोरयं विसर्गः समापद्यते पर-
स्माच्छब्दं वर्जयित्वा । तमसस्परि । अपरस्मात्किम् ।
तमसः परस्मात् ॥ तमसस्पृथिव्याम् । ३९ । अयं समा-
पद्यते पृथिवीशब्दे । तपसस्पृथिव्याम् ॥ अह्नो रजसो
रिषस्पृशस्पातौ । ४० । एते चत्वारः पाघातौ सकार-
मापद्यन्ते । अह्नस्पातु । रजसस्पाति । रिषस्पाहि
सुप्रस्पृशस्पाहि ॥ अह्नस्कुर्विति च । ४१ । एतन्निपा-
त्यते । सकर्मा २ऽ ॥ अह्नस्कुरु ॥ समानपदे च । ४२ ।
एकपदे विद्यमानो विसर्गः कपयोर्यथायथं सकारं ष-
कारं चापद्यते इतौ परे चर्चायां च न ॥ श्रेयस्कर ।
तपस्पतिः । हविष्कृत् । चतुष्पात् । स्थितोपस्थिते ।
श्रेयः करेति श्रेयः कर । तपः पतिरिति तपः । पतिः ।
गाः पत्यमिति गाः । पत्यम् । हविष्कृदिति हविः कृ-
त् । चतुःपादिति चतुः । पात् । इत्यादि भवति ॥ प-
रावनसाने । ४३ । अवसानस्थिते परिशब्दे परे विसर्गः
समापद्यते । ओषधयस्परि । अवसाने किम् । हेडः प-
रि ते दृशन्तु ॥ कविः करत्कधिषु । ४४ । एतेषु विसर्गः
कविशब्दे सकारं षकारं चापद्यते । वसुष्कविः । श्रेयस-
स्करत् । पुनस्कृधि ॥ कपोश्च कधौ सकारम् । ४५ । क-
पोरित्ययं विसर्गः कविशब्दे सकारमापद्यते । भाव्युप-

भत्वात्पूर्वसूत्रेण षकारे प्राप्ते विधिः।कृधीकृधि॥ सदो द्यौर्न्नमस्कृतं पिता पथेषु । ४६। सदइत्यादीनां त्रयाणां विसर्गः कृतमित्यादिषु यथायथं सं षं चापद्यते। येषामस्तु सदस्कृतम्। उपहूतो द्यौष्पिता। अग्ने सप्रथा नमस्पथे॥ पतिरातव्यस्वरोदये, पदे च। ४७। तालव्यस्वरान्ते पतिशब्दे पदरूपे परे विसर्गः सकारमापद्यते। तालव्यस्वरोदयइति सम्भवाभिप्रायम्। ब्रह्मणस्पते। वाचस्पतये। वाचस्पतिम्। पदे किम्? "तस्मिन्निति निर्दिष्ट" इतिसप्तमीनिर्द्दिष्टवर्णविषयम्। अत्र चेदमेव ज्ञापकं पदावयवे व्यवस्थितस्यासम्भवात्। यतो जातः प्रजापतिः॥ न परुषः परुषि। ४८। परुषइत्ययं विसर्गः परुषि न सकारमापद्यते। "समानपदे चे"ति प्राप्तस्य निषेधः। परोहन्ती परुषः परुषः॥ वाजपतिर्वासऽएदिधिषुरन्तःपर्शव्येनान्तःपार्श्व्यमिति च। ४९। कपयोर्वाजपतिरित्यादीनां त्रयाणां विसर्गो अन्तःपर्शव्येनेत्यादिपदद्वयसम्बन्धी च न विकारमापद्यते। वाजपतिः कविः, "कविः कर"-दित्यस्य निषेधः। वासःपल्पूलीम्। एदिधिषुःपतिम्। अन्तः पर्शव्येन। अन्तः पार्श्व्यम्। "समानपदे चे"ति प्राप्तस्य निषेधः। इति चेति अनुक्तसमुच्चयार्थं तेन जातः पतिरित्यत्र न सकारः॥ अहः पतौ रेफम्।

५०। अहरित्ययं विसर्गः पतिशब्दे परे रेफमापद्यते । समानपदइत्यस्यापवादः । अहर्पतये । स्थितोपस्थिते तु अहः पतयऽइत्यहः । पतये ॥ परस्य मूर्द्धन्यम् ॥ ५१ ॥ अधिकारोऽयम् । परस्येति तऽआद्यादनाङ्क्षरादित्यस्मात्प्राक् मूर्द्धन्यमिति तमभि व्याप्य ॥ स्वधूः साऽसहयोः ॥ ५२ ॥ स्वः धूः इमौ यथा संख्यं साम् सह इत्येतयोः रेफमापद्यते, परस्य मूर्द्धन्यम् । स्वर्षामषाम् । इतं धूर्षाहौ ॥ "विकारी यथासन्न"मिति ईषद्विष्टत्वात्षकारः । स्थितोपस्थिते स्वः सामिति स्वः । साम् । धूः सहाविति धूः । सहौ ॥ उकारन्दुइर्दे ॥ ५३ ॥ दुरित्ययं विसर्जनीयः उकारमापद्यते परस्य मूर्द्धन्यम् । भिसञ्ज्ञकत्वादसोष्मत्वान्निरनुनासिकत्वाच्च उकारः । परि ते दूडभः । स्थितोपस्थिते दुइर्दभऽइतिदुः । दभः । अध्यायइत्युक्तत्वादुपस्थिते "रेफऽस्वरघा"विति भवति, स्थिते तु न संहितायाः अभावात् ॥ ओकारमितः सिञ्चतौ सोपधः ॥ ५४ ॥ इत इत्ययं विसर्गः पूर्ववर्णसहित ओकारमापद्यते सिञ्चतौ परे परस्य मूर्द्धन्यम् । परीतो षिञ्चता सुतम् ॥ इति विसर्गसन्धिकार्यम् ॥

अथ विसर्गाङ्गुलिप्रदर्शनप्रकारमा-

इह भगवान्महर्षियाज्ञवल्क्यः ॥

हकारो नैव मन्तव्यइति शाकल्यव्यवस्थितिः । इति वचनात्तत्स्वराग्रे तादृशस्वरानुकूलो विसर्गउच्चारणीयो न हकारसदृशइत्युच्चारणकर्तृशासनाद्व्यवस्था बोध्या ॥ तत्राघादनाडम्बरात् ॥ ५५ ॥ आघाशब्दात्परस्तकारो मूर्द्धन्यमापद्यते । स चेदाघाशब्दआडम्बरशब्दात्परो न । दावीघाटः । जित्सञ्ज्ञकत्वादसोष्मत्वाच्च टः । स्थितोपस्थिते तु दाव्वीघातऽइतिदाव । आघातः । अनाडम्बरादिति किम् । शब्दायाडम्बराघातम् ॥ वनसदोऽवेटो रेफेण ॥ ५६ ॥ वनशब्दः सदशब्दे परे रेफेण व्यवधीयते वनशब्दो वेटशब्दात्परोन चेत् । भुरण्यवो वनर्षदो वायवः । स्थितोपस्थिते वनसदऽइति वन । सदः । अवेटः किम् । अप्सु षदे वेडुनसदे ॥ पत्यौ च सकारेण ॥ ५७ ॥ वनशब्दः पतिशब्दे सकारेण व्यवधीयते । वनस्पतिः शमिता देवः । इदं शाखान्तरविषयम् । अत्र लेखनं तु सकारेणेत्यनुवृत्तिप्रदर्शनार्थः ॥ ऋतावरौ च पतिपरयोः ॥ ५८ ॥ ऋत अवर एतौ पति परयोः सकारेण व्यवधीयेते । तव वायवृतस्पते । तूणवद्भ्यमवरस्पराय । स्थितोपस्थिते तु ऋतपतऽइत्यृत । पते । अवरपरायेत्यवर ।

पराय ॥ तद्बृहतौ करपत्योस्तलोपश्च ॥ ५८ ॥ तत् बृहत् एतौ करपतिशब्दयोः प्रत्यययोर्यथासङ्ख्यं सकारेण व्यवधीयेते । पूर्वपदयोश्च तकारलोपो भवति । यथा तत् करान् । तस्क राँऽ२ ॥ उत । बृहत् पतिः ॥ बृहस्पतिः । परिष्कृते षकारेण ॥ ६० ॥ परीत्ययं कृते परे षकारेण व्यवधीयते । परिष्कृताः शुक्राः । स्थितोपस्थिते तु परिष्कृताऽइति परि । कृताः ॥ चन्द्रे सुशकारेण ॥ ६१ ॥ सुशब्दः चन्द्रे परे शकारेण व्यवधीयते । उभेसुश्चन्द्र । स्थितोपस्थिते सुचन्द्रेति सु चन्द्र ॥ दुधुक्षन्यो दकारम् ॥ ६२ ॥ दुधुक्षन्नित्ययं धकारो दकारमापद्यते । बृहतीन्दुदुक्षन् । स्थितोपस्थिते दुधुक्षन्निति दुधुक्षन् ॥ भाविभ्यः सषठ० समानपदे ॥ ६३ ॥ भाविभ्यः परः सकार एकपदे विद्यमानः षकारमापद्यते ॥ षात्तथौ मूर्द्धन्यम् ॥ ६४ ॥ षकारात्परौ तथौ मूर्द्धन्यमापद्यते । अङ्कुष्ठ गोष्ठानम् । परमेष्ठ्यभिधीतः । अप्सवन्तरा सुषाव । भुवना सीषधाम । दुष्टरस्तरन् । तकारस्य टकारः । जित्सङ्ज्ञकत्वात्थोष्मत्वाच्च थस्य ठः । स्थितोपस्थिते तु । गोस्थानमिति गो । स्थानम् । परमेस्थीति परमेस्थी । दुस्तरऽइति दुः । तरः । सुसावेति सु । सावा । सीसधामेति सीसधाम । तस्मादित्युत्तरस्त्यव्यवस्थितस्य । तेन पिष्ट इत्यत्र तकारस्य मूर्द्धन्योन ॥ अ-

नुस्वाराच्च तत्पूर्वात् ॥ ६५ ॥ भाविपूर्वादनुस्वारात्परः सकारः षकारमापद्यते । तपूꣳष्यग्ने । पुरोडाशैर्हवीꣳष्या । तत्पूर्वात्किम् । वामनाꣳसि ॥ करेफाभ्यां च ॥ ६६ ॥ ककाररेफाभ्यां च परः सकारः षकारमापद्यते ऋक्षु । वनर्षदः । अनुस्वारात्ककाराच्च परस्य षत्वं व्याकरणसिद्धम् । अत्र लेखनं तु हि० सीर्क्वसामयोरित्यादिनिषेधस्य वक्ष्यमाणत्वात्प्राप्तिप्रदर्शनार्थम् ॥ नेः सीदतेः ॥ ६७ ॥ नेः परः सद्धातोः सकारः षकारमापद्यते । एदं बर्हिर्निषीदत ॥ ससाद च ॥ ६८ ॥ नेः परः ससादेति सकारः षकारमापद्यते । एतस्य सद्धातुजत्वात्स्पष्टार्थम् । निषसाद धृतव्रतः ॥ ओकारात्सु ॥ ६९ ॥ ओकारात्परः सुसकारः षकारमापद्यते । मोषूणः ॥ ऊर्ध्वादृष्टात् । ७० । ऊर्ध्वादुकारात्परः सुसकारः षकारमापद्यते । ऊर्ध्वऽऊषुणः ॥ अभेश्च । ७१ । अभेः परः सुसकारः षकारमापद्यते । अभीषुणः ॥ परेश्च सिञ्चतेः । ७२ । परेः परः सिञ्चतेः सकारः षकारमापद्यते । परिषिञ्चन्ति ॥ अभेश्च । ७३ । अभेः परः सिञ्चतेः सकारः षकारमापद्यते । सिञ्चात्रकणावभ्यषिञ्चन् ॥ वेर्युदयः । ७४ । वेः परीभूतो यकारपरः सकारः षकारमापद्यते । विष्यास्यायुषो न सह्यात् । युदयः किम् । विस्वः पश्य ॥ द्वे-

र्नथोदयः। ७५। हेः परीभूतो नकारपरस्थकारपरस्य सकारः षकारमापद्यते। अस्ति हिष्माते। आपो हि ष्ठ ॥ द्यवेश्च। ७६। द्यविशब्दात्परस्थकारोदयः सकारः षकारमापद्यते। मकारस्तसम्भवान्न सम्बध्यते। उपद्यविष्ठ ॥ नेस्त्यास्तनोः। ७७। निशब्दात्परस्त्यास्तन्योर्धात्वोः सम्बन्धिसकारः षकारमापद्यते। निःस्त्यायताम्। निःस्तनिहि इति स्थिते "लुङ्मुदि जिह्मरे" इत्यनेन विसर्गलोपे कृते सस्य षः। आप्यायतान्निष्ट्यायताम्। निष्टनिहि ॥ ततक्षौ। ७८। नि इत्यस्मात्परः सकारः षकारमापद्यते ततक्षौ परे। तथयोरिति सस्य षः। स्वधया निष्टतक्षुः ॥ अनोः स्तुवन्त्याम्। ७९। अनोः परः स्तुवन्ति सकारः षकारमापद्यते। अनुष्टुवन्ति पूर्व्वथा ॥ दुःष्वप्न्यम्। ८०। इदं कृतषत्वं निपात्यते। दुःष्वप्न्यꣳ सुव। स्थितोपस्थिते दुःस्वप्न्यमिति दुःस्वप्न्यम् ॥ वन्द्वारुस्माकिः। ८१। एतयोः सकारः षकारमापद्यते। इह यानि विसर्गान्तानि पदानि तेषां तथयोरिति सत्वे कृते षः। गृणाति वन्द्वारुष्टे। माकिष्टे व्यथिराद्धर्षीत् ॥ सहेः पृतनाषाः। ८२। पृतनाशब्दात्परः सहेः सकारः षकारमापद्यते। पृतनाषाड्याय च। स्थि-

भाविपूर्वीद्माग्ने विधिः ॥ सधिरर्ठं॰ सुरदितिः । ८३ । एतेषां त्रयाणां सकारः षकारमापद्यते । अश्वन्ने सपिष्टुब । अर्ठं॰ सुरठं॰ सुष्टे । अदितिष्टे ॥ वायुरग्निरग्नेरेकाक्षरे । ८४ । एतेषां त्रयाणां सकारः एकाक्षरे पदे षकारमापद्यते । वायुष्ट्वा पचतैः । अग्निष्टेऽधिपतिः । अग्नेष्ट्वा तेजसा । एकाक्षरे किम् । अग्निस्तिग्मेन । अग्नेस्तनूः ॥ सकारपरे च । ८५ । नाम्युपधः सकारः सकारे परे एकाक्षरे पदे षकारमापद्यते । अनतस्य धनुष्ट्वम् । सकारपरे किम् । सवितुस्त्वा प्रसवे ॥ मातृभिरर्चिर्भिः पायुभिर्वक्रुणीः । ८६ । एतेषां चतुर्णां सकारः षकारमापद्यते । सर्ठं॰ सृज्य मातृभिष्ट्वम् ॥ शिवेभिरर्चिभिष्ट्वम् । अदब्धेभिः सवितः पायुभिष्ट्वम् । वक्रुणीष्ट्वा ॥ प्रकृत्या नानापदस्थे तका । ८७ । अधिकारोऽयम् । अनु सन्तनोतु बृहस्पति सुतस्य सुसमिद्धाय सुसन्दृशमभि सत्वाऽभिसंविशन्तु सुसस्याऽअतिस्थूलम्मुसले पत्नी सँख्याताऩ् अक्तुस्थलाञ्जिसक्थ्यौ दिविस्पृशा हृदिस्पृशर्ठं॰ सीसंक्षसामाभ्यां तिस्त्रिरस्ते सीसेन सीसाः सीसं पशुसनि गोसनि प्रतिसद्दृङ् प्रतिसद्दृशासस्तुभिर्ठं॰ अत् । ८८ । एते षड्विंशत्सकाराः प्रकृत्या भवन्ति । हि-

ठं॰सीरि "त्वचानुस्वाराच्चेति" प्राप्तिः । ऋक्सामेति द्वये "वारेफाभ्यां चेति" । तित्तिरिस्ते सर्पाणामित्यत्र 'सकारपरे चेति'। अन्यत्र समानपदत्वात्। चतुस्त्रिठं॰ शदिति किम् । घर्मश्चतुष्टोमः । अत्र 'लुङ्सुटीति' विसर्गलोपे 'भाविभ्य' इति षत्वं भवति । वीर्य्यं पुनो-ऽनुसन्तनोतु । बृहस्पतिसुतस्य । सुसमिद्धाय, सुसन्दृशन्त्वा । अभिसत्त्वा सत्तौजाः । देवाऽअभिसँ-स्त्रियन्तु । सुसस्याः कृषीस्कृधि । अतिस्थूलं चातिकृ-शम् । उलूखलमुसले । शँय्युना पत्नीसँय्याजान् । पु-न्निकस्थला च क्रतुस्थला । शितिकक्षोन्निसक्कथः। बृहता शिविस्पृशा । महद्ध्ठं॰ हृदिस्पृशम् । एनठं॰ हिठं॰सीः । ऋक्सामयोः शिल्पे । ऋक्सामाभ्याऽए-सन्तरन्तः । तित्तिरिस्ते सर्पाणाम् । सीसेन तन्त्रम् । हरिणोः सीसाः । सीसञ्च मे । प्रजासनिपशुसनि । गो सनि । प्रति सद्दङ् । प्रतिसद्दृश्यासऽएतन। चतुस्त्रिठं॰ श-द्धाजिनः॥ ऋकारेफाद्द्वयञ्च।८६। ऋकारो रेफऽश्च-ऽइत्येतद्द्वयपरः सकारः प्रकृत्या । तिसृभिरस्तुवत । तिसृश्च मे। वाचो विसर्जनम् ॥ पृथिवि दिव्युपरि-चर्षणिशकुनियासिभ्यः । ९० । एतेभ्यः षड्भ्यः सकारः प्रकृत्या । पृथिवि सदन्त्वा। दिवि सदन्त्वा । उपरि स-दो दुवस्वन्तः । चर्षणी सहाश्विनु । शकुनि सादेन कृ-

भ्यान् । अवयासिसीष्ठाः । इतिषत्वप्रकरणम् । ऋषरे-भ्यो नकारो णकारं० समानपदे, स्वरयवहकपैश्च । ६१ । ऋकाररेषकाररेफेभ्यः परः स्वरयकारवकारह-कारकवर्गपवर्गव्यवहितोऽपि नकारो णकारमापद्यते समानपदे । तस्मादित्युत्तरस्येत्युत्तरस्येत्युक्तत्वाद्व्यवधाने अप्राप्तवचनादेतैर्ग्रस्तैर्यथासम्भवमिलितैश्च व्यवाये भव-ति नान्यैः । नृमणाः । पुरीषवाहणः । स्थितोपस्थिते तु नृमना इति नृ । मनाः । पुरीषवाहन इति पुरीष । वाहनः । प्रवाहन इति प्र । वाहनः । एतैः किम् । र-श्मिना । रसेन । वृचानः । रथेन ॥ प्रनेति नुदाति हिनोमीनाम् । ६२ । प्रेत्यस्मान्नोनुदधात्वोर्हिनो-मिशब्दस्य च नकारो णकारमापद्यते । प्रणय देवा-व्यम् । प्रणुदानः । प्रहिणोमि ॥ प्रकृत्या पदा-न्तीयः । ६३ । पदान्तीयो नकारः प्रकृत्या भव-ति । पूषन् । अस्मान् । पितृन् ॥ निवनिन-सः प्रपीनम् । ६४ । ऋषरेभ्यो निवनिनसङ्ख्येषां प्रपीनमित्ययं नकारः प्रकृत्या । भूम्ना वन्धुनीका-शाः । ब्रह्मवनि त्वा क्षत्रवनि । वार्घ्रीनसस्ते । प्रपी-नमग्ने ॥ श्रीमना इत्येके । ६५ । एकशब्दो मुख्य-वाची । अयं च निपात्यते । श्रीमनाः शतपयाः ॥ इ-न्द्राग्नी चित्रभानो वार्त्रघ्नदुः स्थाम्यं ध्रुवयोनिः पुरो-

नुवाक्याभिःपुरोऽनुवाक्याभ्यश्वर्मन्नम् । ९७ । एतान्यष्टौ निपात्यन्ते । इन्द्राग्न्योरुज्जितिम् । इन्द्रायाहि चित्रभानो सुताः । इन्द्रस्य वार्त्रघ्नमसि । दुःष्वप्न्यहं सुव । ध्रुवक्षितिर्ध्रुवयोनिः । स्तुचः पुरोऽनुवाक्याभिः । पुरोऽनुवाक्याभिः । पुरोऽनुवाक्यायाज्याभिः । साक्षोऽभ्यश्वर्मन्नम् ॥ तवर्गे च । ९८ । ऋषयेभ्यः परो नकारः प्रकृत्या पवर्गे परे । ट्वम्नु होत्राः । अवक्षाम्देन ताव । क्रन्दते ॥ षादन्तस्त्वकारे । ९९ । षात्परो नकारः प्रकृत्या त्वकारे परे । उग्रस्त्वेष नृम्णः ॥ निषण्णाय रथवाहनमिन्द्रऽएणां परिणीयते समिन्द्रणऽउरुष्याणो रक्षाणः सुषः सूषःसुणा सख्या स्वर्णायुरिणौ प्रणऽआयूंषि । १०० । एतानि नयोरेषां निपात्यन्ते । निषण्णाय । रथवाहनम् । इन्द्रऽएणाम् । परिणीयते कविः । समिन्द्र णो मनसा । उरुष्याणोऽअघायतः । रक्षाणो ब्रह्मणस्पते । मोषूणऽइन्द्र । अभीषुणः । गोमदूषुणा सख्या । स्वर्णं घर्मः । अस्थूरिणौ । निसन्नायेतिनि । सन्नाय । रथवाहनमितिरथ । वाहनम् । इति णत्वप्रकरणम् ॥

दीर्घम् । १०१ । अधिकारोऽयम् ॥ अश्वरश्मिस्त मति सुमति चारय इविमोदिमेन्द्रय धारय चित्रभङ्गुरवयुनाश्वस्य हृदयपुण्यतीर्थवताव्यचर्वान्ता पुरुश्चि-

वकारे । १०२ । एते पञ्चविंशतिर्ह्रस्वा दीर्घमापद्यन्ते वकारे परे । अश्वावतीम् । रश्मीवतीम् । मतीविदे । सुमतीवृधः । स्वाविद्भौमी । सुतावतः । स्वारयावृषन् । सेदिमावयम् । इन्द्रियावान् । धारयाव्यहूनि । चित्रावसो । भङ्गुरावताम् । वयुनाविदेकः । अश्वस्याविशस्ता । ऋतावानम् । अभीवर्त्तः । प्रावतावचः । अधीवासम् । अग्नौ विश्वानराय । शक्तीवन्तो गभीराः । इमाऽउत्वा पुरूवसो । स्थितोपस्थिते तु अश्ववतीमित्यश्व । वतीम् । रश्मिवतीमिति रश्मिवतीम् । मतिविदऽइतिमति । विदे । सुमतिवृधऽइतिसुमति । वृधः । स्वविदिति स्व । वित् । सुतवतऽइति सुत । वतः । इषिणवानिति इषिण वान् । इन्द्रियवानितीन्द्रिय । वान् । चित्रवसो ऽइति चित्र । वसो । भङ्गुरवतामिति । भङ्गुर । वताम् । वयुनविदिति वयुन । वित् । हृदयविधऽइति हृदय । विधः । ऋतवानमित्यृत । वानम् । अभिवर्त्तऽइत्यभि । वर्त्तः । अधिवासमित्यधि । वासम् । शक्तिवन्तऽइति शक्ति । वन्तः । पुरुवसोऽइति पुरु । वसो । शचीवसो । अन्यशाखीयमिदमुदाहरणम् ॥ नाश्ववद्विरण्यात् । १०३ । हिरण्यवच्छब्दात्परमश्वइति शब्दरूपं वदित्येतस्मिन्परे न दीर्घमापद्यते । हिरण्यवदश्ववत् ॥ अभिनिकव्ययेषु स्वो-

रविश्वग्रसह्नवाजयन्तेषु। १०४। अभीत्ययं ह्रस्वो विक्षयेष्वित्यादिषट्सु न दीर्घमापद्यते। अभि विक्षयेषम्। अभि वीरोऽअभिसत्वा। अभि विश्वे गृणन्तः। अभि वत्सन्। अभिह्नम्। अभिवाजयन्तः॥ अश्वस्य व्वाजिन इति च। १०५। अश्वस्येति ह्रस्वो वाजिन इत्येतस्मिन्परे न दीर्घमापद्यते। अश्वस्य व्वाजिनः। इति चेत्येवं विधान्योदाहरणसूचनार्थम्। तेनाधिवक्तेति न दीर्घः॥ विश्वसहभुवपुषवसुषु। १०६। नेति नानुवर्त्तते। विश्वेत्ययं ह्रस्वः सहादिषु चतुर्षु दीर्घमापद्यते। विश्वासाहमवसे। व्विश्वानराय व्विश्वाभुवे। उत व्विश्वापुषम्। गन्धर्व्वस्त्वा व्विश्वावसुः। स्थितोपस्थिते तु। व्विश्वसहमिति विश्व। सहम्। व्विश्वभुवऽइति विश्व। भुवे। व्विश्वपुषमिति विश्व। पुषम्। व्विश्ववसुरिति विश्व। व्वसुः॥ तिष्ठाद्युदात्तम्॥ १०७॥ आद्युदात्तं तिष्ठेतिपदं दीर्घमापद्यते। तिष्ठा रथमधियम्। तिष्ठा देवो न सविता। आद्युदात्तं किम्। आतिष्ठ व्वृत्रहन्॥ प्रवणह्रङ्गयासेषु॥ १०८॥ प्रेत्ययं ह्रस्वो वनादिषु त्रिषु दीर्घमापद्यते। प्रावणेभिः सजोषसः। प्राह्रङ्गा साह्नेन्द्राः। प्रायासाय। स्थितोपस्थिते प्रवणेभिरिति प्र। वणेभिः। प्रह्रङ्गाइति प्र।

ष्टङ्गाः । प्रयासायेति प्र । यासाय ॥ धारयास योजा-
व सचस्व नुद मोषु जयतोरुण्य रक्ष यज यच्छ म-
त्स्व पिबत गायता तु येन नकारे ॥ १०९ ॥ धारया-
सेत्यादयः षोडशहस्वा नकारे दीर्घमापद्यन्ते । धार-
यासा नमोभिः । योजान्विन्द्र । अवानो देव्या धि-
या । सचस्वानः स्वस्तये । प्रणुदानः । मोषूणः । मो-
षु किम् । ऊर्ध्वऽऊषुणः । जयता नरः । उरुण्याणः ।
रक्षाणः । यजानो मित्रावरुणा । यच्छानः शर्म ।
मत्स्वा नो विहव्यम् । पिबतानिरवहत्यात् । गायता
नरः । आतूनः । आतुकिम् । तु चेतुनो भवन्तु । ये-
ना नः पूर्वे ॥ अत्र च ॥ ११० ॥ अयं ह्रस्वो दीर्घमाप-
द्यते नकारे परे । अत्रानः ॥ सखावरुत्य्यवाजस्य
पायुषु च ॥ १११ ॥ अवेत्ययं ह्रस्वस्सखादिषु चतुर्षु
दीर्घमापद्यते । अवासखा । अवा व्याजस्य । अवा पा-
युः ॥ नावनयामि ॥ ११२ ॥ अवेत्ययं ह्रस्वो नयामि-
शब्दे परे न दीर्घमापद्यते । अवनयामि ॥ उरुक्तः
सौ ॥ ११३ ॥ उकारः सौ परे दीर्घमापद्यते । मक्षूमू
षु ॥ रथितकारनकारयोः ॥ ११४ ॥ रथेत्ययं ह्रस्वस्त-
कारनकारयोर्दीर्घमापद्यते । रथीतमम् । रथीनांवा-
जानाम् । स्थितोपस्थिते रथितममिति रथि । तम-
म् । रथिनामितिरथि । नाम् ॥ अथोदात्तियशोच

पनय सादयञ्जु इषयन्तु सखाघाघारातृतभवता यकारे ॥ ११५ ॥ पनयादयस्तुर्दश ह्रस्वा यकारे दीर्घमापद्यन्ते । अश्वम९ पनाय । उशादिया यज । वृहच्छोचा यविष्ठ्य । पनया युजम् । सादया यज्ञम् । ऋञ्जूयताम् । इषायमाणाः । मन्तूयन्तो हन्ता । सखाया यत् । आघाये । अघायतः । अरातीयतः । ऋतायते । स्थितोपस्थिते तु पथयेति पथय । ऋञ्जुयतामित्यृञ्जु । यताम् । इषयमाणऽइति इष । यमाणाः । मन्तुयतऽइति मन्तु । यतः । अघयतऽइत्यघ । यतः । अरातियतऽइत्यराति । यतः । ऋतयतऽइत्यृत । यते ॥ वृधवृजोः ॥ ११६ ॥ व इत्ययं वृधवृजोर्दीर्घमापद्यते । वावृधे । प्रवावृजे । स्थितोपस्थिते ववृधऽइति ववृधे । ववृजऽइति ववृजे ॥ अद्य तं॰ इन्नारचक्राश्मभवत इषीमहे देवेषु ॥ ११७ ॥ अद्येत्ययं तमित्यादिपदेषु दीर्घमापद्यते । अद्यातमस्य । तमिति किम् । अद्य तेऽअपरम् । अद्याऽऊवेम । इन्नमद्या च । अश्मा भवत । अद्या इषीमहे । अद्या देवाः ॥ न होतरि ॥ ११८ ॥ अद्येत्ययं न होतरि दीर्घं नापद्यते । अद्य होतारम् ॥ शृणुत त्विषि भजि भवत पिबत स्म तिष्ठ रक्षा मकारे ॥ ११९ ॥ शृणुतादि नव ह्रस्वा मकारे परे दीर्घमापद्यन्ते । शृणुत

ऽङ्गम् । अग्निम्ब्रुवाय त्विषीमते । व्रातऽइवप्रजीमान् । इदं शाखान्तरविषयम् । माध्यन्दिनानान्तु दीर्घत्वादेव मतुप् । अतएवाचान्तःपददीर्घीभाव इति स्थितोपस्थितं न । भवतामन्डयन्तः । पिबामित्रस्य । इता मरुतः । ह्रिष्मा मनवे । तिष्ठा मन्हाऽसि । रक्षा साकिः । स्थितोपस्थिते । त्विषिमतऽइति त्विषि । मते ॥ विश्वदेव्यसोमौ वत्याम् ॥ १२० ॥ एतौ ह्रस्वौ वतीशब्दे दीर्घमापद्येते । विश्वदेव्यावती । सोमावतीम् । स्थितोपस्थिते विश्वदेव्यवतीति विश्व। देव्यवती । सोमवतीमिति सोम। वतीम् । वत्यामितिकिम् । सोमवताम् ॥ उषमन्होभिर्नक्तमीकारैकारौकारनकारेभ्यः ॥ १२१ ॥ मन्होभिरित्यादिनिभ्यईकारादिचतुर्भ्यश्च पर उष इत्ययं ह्रस्वो दीर्घमापद्यते । प्रकरणानुसारादन्यस्य व्याख्यानात् । मन्होभिः उषासा नक्ता । नक्तोषासा । आयतीमुषासम् । देवीऽउषासौ । उषाकेऽउषासा नक्ता । योनाऽउषासा नक्ता । नऽउषासः । अव्यवहितस्यासम्भवाद्व्यवधानेऽपि । स्थितोपस्थिते उषसानक्तेत्युषसा । नक्ता । नक्तोषसेति नक्तोषसा । उषसमित्युषसम् । उषसावित्युषसौ । उषसऽइत्युषसः । एतेभ्यः किम् । अग्रऽउषसाम् ॥ पूरुषोऽवसाने ॥ १२२ ॥ पूरुष इत्ययं

आदिर्दीर्घो निपात्यते अवसाने चेत् । सनवथ पूरूषम् । अवसाने किम् । उदैत्पुरुषः ॥ पूष्णो जहीमस्तेष्वत्र ॥ १२३ ॥ अनेत्ययं ह्रस्वः पूष्ण इत्यादिषु त्रिषु दीर्घमापद्यते । अत्रा पूष्णः । अत्रा ते भद्राः ॥ नरः सघ्न ऽरुषी-न्नत ऽआङ्क्तर्नियुद्धिष्षु यत्र ॥ १२४ ॥ यत्रेत्ययं ह्रस्वो नरइत्यादिषु पञ्चसु दीर्घमापद्यते । यत्रा नरः । यत्रा सघ्न ऽरुषीन् । यत्रा नक्षत्रा । यत्रात-ऽआङ्क्तः । त ऽआङ्क्तः किम् । यत्र ते ययुः । यत्रा नियुद्भिः ॥ अभिमातिपृतनासु सपत्नभूर्विश्वसमत्सु पृ-तना व्रातेभ्यः सहेः ॥ १२५ ॥ अभिमातीत्यादिभ्यः सह धातोर्ह्रस्वो दीर्घमापद्यते । अन्त्यस्यासम्भवादन-न्त्यस्य । तत्र द्वयोः प्राप्तौ "सन्निकृष्टविप्रकृष्टयोः स-न्निकृष्टस्येत्यादेः । अभिमातिषाहः । पृतनासु सास-ह्मिम् । सपत्नसाही । इतं भूर्षाहौ । विश्वासाहम-वसे । समत्सु सासहः । पृतनाषाह्याय च । व्रातसा-हाः । स्थितोपस्थिते अभिमातिसह ऽइत्यभिमाति । सहः । ससह्मिमिति ससह्मिम् । सपत्नसहीति सप-त्न । सही । भूः सहाविति भूः । सहौ । विश्वसह-मिति विश्व । सहम् । ससहऽइति ससहः । पृतनासह्यायेति पृतना । सह्य य । व्रातसहाऽइ-

उक्थशब्दात्परः शसेर्ह्रस्वो दीर्घमापद्यते । उक्थशासश्चरन्ति । स्थितोपस्थिते उक्थशस इत्युक्थ । शसः ॥ एवाच्छवक्षमाथ ॥ १२७ ॥ एतेषां चतुर्णां ह्रस्वा दीर्घमापद्यन्ते । संहिताऽधिकारादवसाने न । एवा नो दूर्वे । गिरिभ्राच्छाश्वदामसि । चक्षमा वयम् । अथा नऽइन्द्रः । एवशब्दोऽत्रोपमार्थ एव व्याख्यानात् । अवधारणार्थस्य तु न । तदेव शुक्रम् । सऽएव जातः । अवसाने तु तानो ऽअच्छ ॥ विदुष्मा सौत्रामण्याम् ॥ १२८ ॥ विदुष्मेत्ययं ह्रस्वो दीर्घमापद्यते सौत्रामणीमन्त्रान्वर्जयित्वा । विदुष्मा तेऽअग्ने । असौत्रामण्यां किम् । विदुष्म यं २ ॥ ऽउ च न ॥ अधायत्स्वग्नावायुषु ॥ १२९ ॥ अधेत्ययं ह्रस्वो दीर्घमापद्यते यत्स्वग्नावायु एतान्वर्जयित्वा । अधा सपत्नान् । अयाह्यग्ने । अयदित्यादि किम् । अधयत् । अधस्य ते व्रजनम् । अधाग्नाः । अधव्यायुम् ॥ पिबासोमं पिबासुतस्य श्वासयो भुवो नूरणे शमीष्व मासहानो मामहन्तामभीतस सीरिषो सीरिषत यामयन्ति हि ष्मा ते वर्द्धयारयिं सुधीह्वञ्चरा सोम स्वयवसिनी सोताग्रावाणो धर्त्ता मानुषः पाद्या दिवो युद्वा हि गमया तमः सिञ्चता सुतं परीवापऽउकथा शस्त्राण्यत्ता हवीष्प्याच्या जानु क्षामाहे-

[illegible]

श्याम पितरा ऽधो बोधा मे विचृता बन्धमवता हवेषु
शृणुधी गिरो रक्षा तोकं चर्षणीसहा चर्षणीधृतो
येना समत्सु सनेमा तेऽङ्कुशामा ते शिक्षास खिद्व्यस्तना
रथं दीया रथेनेता जयत वर्द्धया त्वं प्रब्रवामा घृतस्ना-
जगन्था पारयारश्मिमाहि पुरीतता लोहाकर्णशुण्ठाक-
र्णौ प्रकृतिदीर्घावित्येके नौकाशा अनूकाशेन चक्रा-
जरत्सम्मिगृकस्तरता सखायः सासह्वानपामार्गाभि-
याद्तऽष्टीहमभीषु सुष्टीमा जुषाणो यजा देवान्ये-
ना पावकाम्वायन्तो यदी सरमा स्वदया सुजिह्व नि-
पद्या दधिष्व सदतना रणिष्ट न मरा चिकि[illegible]त्साद-
यागविष्टावदादद्दृशा चायुनक्तृजा ररणः सादन्य-
मिति च ॥ १३० ॥ पिबासोममित्यादीन्यष्टसप्ततिरूपा-
णि कृतदीर्घाणि निपात्यन्ते। यत्र तु पदद्वयपाठस्त-
त्र यथोक्ते दीर्घः। अन्यत्र तु एकपदस्थः। लोहाकर्ण-
शुण्ठाकर्णौ प्रकृतिदीर्घौ। इति चकारोऽनुक्त-
समुच्चयार्थः। तेन यच्छ देवायुवम्। यच्छेति किम्।
यज्ञपतिं देवयुवम्। पुरीततेति विभक्तिरविवक्षिता।
पुरीतत् इत्यपि भवति। स्थितोपस्थिते शमिष्वेति
शमिष्व। ममहानऽइति ममहानः। ममहन्तामिति
ममहन्ताम्। अशितमेत्यशितम। रिरिषऽइति रि-

रिषः । रिरिषतेति रिरिषत । सुयवसिनीऽइति सु । यवसिनी । परिवापऽइति परि । वापः । चर्षणि सहामिति चर्षणि । सहाम् । चर्षणिधृतऽइति चर्षणि । धृतः । पुरितेति पुरि । तता । पुरितद्धिति पुरि । तत् । लोहकर्णऽइति लोह । कर्णः । मुण्ड-कर्णऽइति मुण्ड । कर्णः । बभ्रुनिकाशाऽइति बभ्रु । निकाशाः । अनुकाशेनेत्यनु । काशेन, अश्वयन्तऽइत्य-श्व । यन्तः । अयुनगित्ययु । नक् । सदन्यमिति स-दन्यम् । देवयुवमिति देव । युवम् । आकारोपधो यकारमिति सूत्र एतदध्यायस्याप्येतदध्यायस्थत्वात् । स्थिकोर्ध्यस्थिते दृष्टिमानिवेति दृष्टिमान् । इव ॥ स्व-रात्संयोगादिर्द्विरुच्यते सर्वत्र ॥ १३१ ॥ स्वरात्परः संयोगस्यादिवर्णः पदान्तमध्यादिषु द्विरुच्यते । अनु-ष्टुप्ते । इषे त्त्वा । आच्छ्या जानु । स्वरादिति किम् । श्रुधि श्रुत्कर्ण ॥ परन्तु रेफहकाराभ्याम् ॥ १३२ ॥ तु एवार्थः । रेफहकाराभ्यां परं व्यञ्जनमेव द्विरुच्यते न रेफहकारौ । सूर्यः । पूर्व्वः । प्रबाह्वाय । बाह्वोः । रेफहकारयोः प्रत्यक्षश्रुतिनिमित्तत्वेन सामान्यप्राप्त-कार्यित्वबाधः । तेन रहभिन्नस्यैवानेन द्वित्त्वम् । अ-ति ह्रस्वम् । अर्हतः । अत्रैतयोर्न्न द्वित्वम् । स्वरे परे रेफात्परेषामूष्मणामनेन द्वित्त्वम् । तत्र रेफस्य ए-

कारसहितोच्चारणविधानाद्रेफधर्माभावात् । दर्शितम्। वर्षा, यत्र तुल्यरत्वं तत्र विधानाभावाद्द्वित्वं भवत्येव। वर्ष्यैः। व्यध्याय। अत एव पाणिनिना "शरोऽचीति" द्वित्वनिषेधः कृतः। परं रेफहकाराभ्यां व्यञ्जनं तूष्मवर्जितम्। द्वित्वमापद्यते रेफहकारौ तु न कुत्रचित् ॥ १ ॥ ऊष्मान्तस्थाभ्यश्च स्पर्शः ॥ १३३ ॥ च एवार्थो भिन्नक्रमः। ऊष्मभ्योऽन्तस्थाभ्यश्च परः स्पर्श एव द्विरुच्यते न ऊष्मान्तस्थाः। अश्मन्नूर्ज्जम्। पूष्णः। हस्ते। दधिक्राव्णः। शल्मलिः ॥ विसर्ज्जनीयाद्व्यञ्जनपरः ॥१३४॥ विसर्ज्जनीयात्परः स्पर्शो द्विरुच्यते व्यञ्जनपरश्चेत्। विष्णोः क्रमः। हिरण्यपाणिः प्रति गृभ्णातु। व्यञ्जनपरः किम्। न्यङ्कुः। गौरश्मगः पिट्टक्ः ॥ ङ्नौ चेद्ध्रस्वपूर्वौ स्वरे पदान्तौ ॥ १३५ ॥ पदान्तस्थौ ङकारनकारौ स्वरे परे ह्रस्वपूर्वौ द्विरुच्येते॥ युङ्ङसि। अघन्नमीमदन्त। ह्रस्वपूर्वौ किम्। सुप्राङ्जः। कुटरूनालभते॥ नास्वरपूर्वा ऊष्मान्तस्थाः॥ १३६ ॥ अस्वरेति पर्य्युदासः। तेन स्वसदृशस्य वर्णस्य ग्रहणम्। ये ऊष्माणोऽन्तस्थाश्च व्यञ्जनपूर्वास्ते द्विर्वचनस्य निमित्तं न भवन्ति। व्य्स्मान्। पार्ष्ण्यां वा। व्यञ्जनेति किम्। अप्से ॥ येस्तु परं तैर्न्न पूर्वम् ॥१३७॥ यैर्हेतुभूतैः परस्य द्विभावः क्वचिदुक्तास्तैः सह संयुक्तं

पूर्वं तद्व्यञ्जनं न द्विरुच्यते । कृत्स्नहृदयेन । सकारस्य ऊष्मत्वात्स्पर्शद्विर्भावस्य निमित्तत्वं तेन संयुक्तः पूर्वस्पर्शः तकारो न द्विरुच्यते । अत्र पूर्वस्थानेन निषेधः परस्य पूर्वेण । यत्र चोभयतः स्पर्शैः संयुक्ताः शषसाः सहः ॥ तत्र नाद्यः क्रमो ज्ञेयो नापरो बोधितो बुधैः ॥ २ ॥ प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः ॥ १३८ ॥ द्वितीयाः प्रथमैश्चतुर्थास्तृतीयैः सह द्विरुच्यन्ते । परिभाषेयम् । यत्र द्वितीयानां चतुर्थानां च द्विर्भावः प्राप्तस्तत्रेदमुपतिष्ठते । विकख्याय । शीघ्घ्राय । परमेष्ठी ॥ विष्णक्रुरन्ती ॥ अन्तःपदेऽपञ्चमाः पञ्चमेषु विच्छेदम् ॥ १३९ ॥ पदमध्ये विद्यमानाः पञ्चमभिन्नाः स्पर्शाः पञ्चमेषु यममापद्यन्ते । विच्छेद इति यमसंज्ञा । रुक्क्मः । अग्ग्निः । वाक्ग्मम् । तनच्छ्म । आज्ञीं । विद्म ते । सिद्ध्मलम् । पाप्मने । अत्र "स्वरात्संयोगादेरिति" द्वित्वे जाते "विकारी यथासन्न" मिति प्रतिवर्गमाद्यानां जित्सञ्ज्ञकत्वात्प्रथमो यमः । द्वितीयानां जित्सञ्ज्ञकत्वात्सोष्मसञ्ज्ञकत्वाच्च द्वितीयः । तृतीयानां धिसञ्ज्ञकत्वात्तृतीयः । चतुर्थानां धिसञ्ज्ञकत्वात्सोष्मसञ्ज्ञकत्वाच्च चतुर्थः । एवं चत्वारः । अत एव चत्वारश्च यमाः स्मृता इति पाणिनीयशिक्षायामुक्तम् । एते ज्ञेयाः । न त्वेषामुच्चारणम् ॥ अशरीरं यमं

प्राङ्गरिति भिन्नाग्रामुक्त्वाऽकेवलं ज्ञानमात्रफलम् । नानुस्वारः ॥ १४० ॥ अनुस्वारो न द्विरुच्यते । इम ँ स्तनम् ॥ सवर्णे ॥ १४१ ॥ सवर्णे परे व्यञ्जनं द्विर्न भवति । संय्योमि । यन्ते ॥ ऋ-वर्णे ॥ ॥१४२ ॥ ऋवर्णे परे न द्विरुक्तिर्भव-ति ।, अनिष्टृतः । ऊष्मान्तस्थाभ्यइति प्राप्तम् । यमे ॥ १४३ ॥ यमे परे न द्वित्वम् । यक्क्ना । अत्र अन्तः-पदइति ककारात्परे यमे जाते ककारस्य संय्योगा-दित्वात्प्राप्तं द्वित्वन्न ॥ विसर्ज्जनीयः ॥ १४४ ॥ न द्वि-रुच्यते । दिवः ककुत् । स्वरात्संयोगादिरिति प्राप्तम् ॥ स्ववर्गीये चानुत्तमे ॥ १४५ ॥ उत्तमभिन्ने स्ववर्गीये वर्णे परे द्वित्वन्न । यत् ते । तत् देवानाम् । अनुत्तमे किम् । तन्नः ॥ अवसितं च ॥ १४६ ॥ अवसानगतं व्यञ्जनं न द्विरुच्यते । ऊक् । 'परन्तु रेफहकाराभ्या'-मिति 'ऊष्मान्तस्थाभ्यश्चेति' वा ककारस्य द्वित्वप्राप्तिः ॥ द्वियकारम् ॥ १४७ ॥ इत्यधिकारः ॥ आप्याय्यमानो यमो रय्यै धाय्या रूपं य्यवाय्यं नपाय्यं पौरुषेय्या हृदय्याय सह रय्या निचाय्य मन्नाय्येति च ॥ ॥ १४८ ॥ इमानि दशरूपाणि द्वियकाराणि निपात्यन्ते, चका-रोऽनुक्तमसुच्चयार्थः । तेन रय्या पोषेण । आप्याय्य-मानो यमः । यम इति किम् । आप्यायमानो ऽग्न-

स्ताग्र सोम, रय्यै त्वा । यज्ञेति धाय्या रूपम् । त-न्नो गीर्भिः श्रवाय्यम् । वर्त्तीं रुद्रा नृपाय्यम् । पौ-रुषेय्या गृभः । नमो हृदय्याय च । सह रय्या निवर्त्त-स्व । अग्ने ज्योतिर्न्निचाय्य । असि सन्नाय्यमा-ने ॥ द्विसकारठं० शास्स्वरास्स्वेति ॥ १४९ ॥ इमे द्वे द्विसकारे 'स्वरात्संय्योगादिरिति' द्वित्वे प्राप्ते द्विसकार-त्वविधानं ज्ञापकम् । सामान्यतः अन्तस्थासु सकारस्य द्वित्वन्न । उक्तं च शिक्षायाम् । सकारस्य द्विरुक्तिर्य्या सा द्वयोरेव नान्यतः ॥ आ च शास्स्वा च रास्स्वेति स-कारोऽत्र द्विरुक्तिजः । १ । अत एव केशवेनापि "न सो व्योम्नेति सूत्रमकारि ॥ न क्षट्चिम्त्रिसतयेभ्यस्त्वेकम् ॥ १५० ॥ क्षादिभ्यः सप्तभ्यस्त इत्यत्र एकमेव व्यञ्जनं न द्वे ॥ क्षत्रस्य योनिः । इत्रत्वधेत् । चित्रन्देवानाम् । म्त्रिनऽआदित्यानाम् । सत्रस्याऽऋद्धिः । लोके तत्र । स-चन्त यत्र पूर्व्वे ॥ वीद्ध्राय वार्द्ध्रीनसोद्राम्नरास्नेत् ॥ १५१ ॥ एतेषां त्रयाणां द्वित्वं न प्रातिशाख्यकास्नेत् । नमो वीद्ध्राय च । वार्द्ध्रीनसस्ते मत्यै । अपां रुद्रो मा-साम् । चराः किम् । समुद्राय शिशुमारान् । एतत्प्र-करणं ज्ञानार्थं क्वचिदुच्चारणार्थम् । न व्यञ्जनपरस्यैक-स्यानेकस्य वोच्चारणे विशेषोऽस्तीति श्रीभाष्योक्तेः ॥ स्वरोऽक्षरम् । सहाद्यैर्व्यञ्जनै, रुत्तरैश्चावसितैरित्युक्तम् ।

तत्र स्वरयोर्मध्ये यत्रानेकं व्यञ्जनं तत्र किं पूर्वस्याङ्गं किं परस्येति निर्णयार्थमाह ॥ सँय्योगादिः पूर्वस्य ॥ १५२ ॥ सँय्योगस्यादिवर्णः पूर्वस्याङ्गम्भवति । इषेत्त्वा । अत्र द्वित्वे द्वौ तकारौ । तत्र प्रथमस्तकारः पूर्वस्य द्वितीयस्तकारो वकारश्च परस्य ॥ यमश्च ॥ १५३ यमश्च पूर्वस्याङ्गम् । रुक्मः । अत्र ककारो यमश्च पूर्वस्याङ्गं मकार उत्तरस्य ॥ क्रमजं च ॥ १५४ ॥ सँय्योगादेः परस्य द्वित्वेन जातं व्यञ्जनं क्रमजं तच्च पूर्वस्याङ्गम् । पार्श्श्व्यम् । रेफः एकः शकारः पूर्वस्य द्वितीयशकारवकारयकारा उत्तरस्य । वर्ष्ष्याय । रेफः एकः षकारः पूर्वस्य द्वितीयषकारयकारौ परस्य । बाह्व्वोः । हकार एको वकारः पूर्वस्य । द्वितीयो वकार उत्तरस्य । तस्माच्चोत्तरꣳ स्पर्शे ॥ १५५ ॥ क्रमजादुत्तरं व्यंजनं स्पर्शे परे पूर्वाङ्गं भवति । पार्ष्ष्ण्यां वा । रेफो द्वौ षकारौ पूर्वस्य णकारयकारौ परस्य । वर्ष्ष्मन् । रेफो द्वौ षकारौ पूर्वाङ्गं मकारः पराङ्गम् । यदर्थं पूर्वाङ्गपराङ्गत्वविचारस्तदाह ॥ व्यञ्जनꣳ स्वरेण सस्वरम् ॥ १५६ ॥ यद्व्यञ्जनं यस्योदात्तादेः स्वरस्याङ्गं तत्तत्स्वरयुक्तं स्यात् । उक्तान्युदाहरणानि । उक्तं च, स्वरउच्चः स्वरो नीचः स्वरः स्वरितएव च ॥ स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥ सँय्योगपूर्वा व्यञ्जनान्ता अवसानगताः स्वरा द्विमा-

त्राः ॥ १५७ ॥ द्विमात्रा इति ह्रस्वापेक्षया किञ्चित्काला-धिक्यस्योपलक्षणं न तु दीर्घत्वस्य । उक्तं च प्रातिशाख्याम् । स्वराः संयोगपूर्वा ये व्यञ्जनान्तास्तथान्तगाः । एषां कालो द्विमात्रः स्यान्न तु दीर्घा हि ते स्मृताः । १ । अग्निः । तत् । जातः । तन् । उत । च । इति सामान्यविकाराः ॥ स्वरितवर्जमेकोदात्तं पदम् ॥ १५८ ॥ स्वरितमक्षरं अस्ति यस्मिंस्तत्स्वरितवत्पदं वर्जयित्वा एकोदात्तं पदं स्यात् । एकः स्वरः पदे उदात्तः स्वरितो वा भवति । उत्सर्गोऽयम् । द्व्युदात्तानि तु वाचकानि वक्ष्यति । अवशिष्टं तु ॥ अनुदात्तम् ॥ १५९ ॥ अनुदात्तोऽस्त्यस्मिंस्तदनुदात्तं स्वरविशिष्टं स्यात् । सादन्यम् । वीर्यम् । अनमीवाः । अनुदात्तमित्यधिकारः ॥ नो नौ मे मदर्थे त्रिद्व्येकेषु ॥ १६० ॥ नः नौ मे एतानि पदानि अनुदात्तानि स्युः । आ नः । तन्नौ । यन्मे । त्रिद्व्येकेष्विति स्पष्टार्थम् । मदर्थ इत्युत्तरार्थम् । संदेहे साहचर्यं नियामकमिति सर्वादेशस्यैव ग्रहणं तेन मे इत्यादेशविशिष्टस्य न । रायो मे ॥ मा च ॥ १६१ ॥ मा इत्येतत्पदं अस्मदर्थे विद्यमानं अनुदात्तं स्यात् । प्रमातिर । मदर्थे किम् । मा नो मित्रः ॥ वो वान्ते त्वदर्थे ॥ १६२ ॥ वः । वाम् । ते । इमानि पदानि युष्मदर्थे वर्तमानानि अनुदात्तानि स्युः । देवो वः । सं वाम् । मा ते ।

त्वदर्थे किम्। ते नोऽअर्व्वन्त॥ ॥ त्वा च॥ १६२॥ इद-मनुदात्तं स्यात्। भूताय त्वा। गन्धर्व्वस्त्वा॥ पूर्ववानन्वादेशः॥ १६३॥ पूर्वोक्तार्थवाचकं यत्पश्चादुच्चारितं पदमनुदात्तं स्यात्। घासमस्मै। एषाङ्कृणुहि। आस्मिन्। पूर्ववानिति किम्। अस्मै जनाय। एषाम्पशूनाम्। अस्मिंत्सधस्थे॥ असि॥ १६४॥ इदमनुदात्तं स्यात्। वेदोऽसि। कृष्णोऽसि॥ यथा गृभो भुवोऽग्निभ्यः॥ १६५॥ गृभ इत्यादिभ्यो यथेति पदमनुदात्तं स्यात्। जीवगृभो यथा। अग्निभुवो यथा। अग्नयो यथा। एभ्यः किम्। करद्यथा॥ गिर्व्वणः॥ १६६॥ इदमनुदात्तं स्यात्। परिस्त्वा गिर्व्वणः॥ अग्ने छतेनेति च॥ १६७॥ अग्ने इत्येतत्पूर्वं छतेनेत्येतत्पदमनुदात्तम्। अग्ने छतेन। अग्ने किम्। अङ्गिरो छतेन॥ प्रचिकितश्च॥ १६८॥ प्रेत्येतत्पूर्वकं चिकित इत्येतत्पदमनुदात्तम्। प्रचिकितो मनीषा। एनोऽपापे॥ १६९॥ एन इत्येतत्पदमनुदात्तं पापेऽविद्यमानं चेत्। उदेनम्॥ मैनाम्। अप्येनत्। अविशेषात्सर्वलिङ्गं गृह्यते। अपापे किम्। एनस्कृतम॥ इह पूर्व्वं श्रुतम्॥ १७०॥ इहेत्येतत्पूर्व्वं श्रुतमित्येतदनुदात्तम्। ममेदिह श्रुतम्। तस्याख्यातत्वादनुदात्तमाख्यातमित्यनेनानुदात्तत्वे सिद्धे विधानं ज्ञापक-

म् । अथातो व्याख्यातस्य तेन नानुदात्तत्वम् । तेन वद्वया अधोह्वयमित्यस्य न निघातः । इह किम् । युवाना श्रुतम् ॥ मन्ये पदपूर्वं० सर्व्वत्र ॥ १७१ ॥ पद पूर्व्वमान्ये इत्येतदनुदात्तम् । होतारम्मन्ये । सर्वत्रेति यद्वृत्तोपपदाच्चेति निषेधबाधनार्थम् । तम्मन्ये यः ॥ वा च कमुचितत्समस्माद्वहस्मावर्द्धमथ्यो अरे स्विन्निपापातास्चेत् ॥ १७२ ॥ वा इत्यादयस्त्रयोदशशब्दा अनुदात्ता निपातास्चेत् । व्यातो वा ॥ अग्निश्च । इमा नु कम् । य॒ऽउसम्भूत्याम् । हृदया विधश्चित् । अघायतः समस्मात् । आघा ये । दधे ह गर्भम् । हि ष्मातें । पीयति त्वोऽअनुत्त्वः । काऽईं मरे १ आविर्मर्य्याः । अजारे पिशङ्गिला । कः स्वित् । निपाताः किम् । चिदसि । द्रविणमद्दु यज्ञम् । अन्ये निपाता आद्युदात्ता इति । अन्ये निपाता आद्युदात्ताइत्युक्तत्वात् ॥ पदपूर्व्वमामन्त्रितमनानार्थे पादादौ ॥ १७३ ॥ पादादौ अविद्यमानं पदपूर्वं सम्बोधनविभक्त्यन्तमनुदात्तं स्यात् तत्पदमामन्त्रितं च परस्वरानन्वितं । अरातिमग्ने । रोदसी विष्णो । नियुद्भिर्व्वायो । तव पूषः । पदपूर्व्वं किम् । अग्ने व्रतपते । वायोऽअस्मिन् । पूषन्तव । अनानार्थे किम् । अग्निश्चेह देवाः । अपादादौ किम् । इषन्नग्ने ॥ तेनानन्तरा षष्ठ्येकपदव-

त् ॥ १७४ ॥ आमन्त्रितेन अर्थतो देवतश्च सम्बद्धं प-ष्ठ्यन्तमेकपदवत्स्यात् । विश्वासां भुवां पते । उत्ति-ष्ठ ब्रह्मणस्पते । देवता: पूर्वं परञ्च । अत एव "न पृथिवीत्यादिनिषेधः कृतः। अनन्तरं किम्। पतीत्वमस्य। यस्यौषधीः प्रसर्पथ । अत्र यस्येति अङ्गमङ्गमित्यनेन सम्बध्यते ॥ न पृथिवि दिवयजन्योजध्या देव भूवः प-वित्रपते पवित्रपूतस्यापान्नपात्तृशान्नपते सोमाग्नेः सोमेन्द्रस्य सोम सुगीर्ष्व्यस्य सोम विश्वेषान्देवानां प्र-जापते यस्य यस्य देवागी तवाग्ने वाजस्याग्ने वक्ष-सखापे ऽअस्माकम् ॥ १७५ ॥ एतानि पञ्चदश ष-ष्ठ्यन्तानि नैकपदवत्स्युः । प्रतिरचन्निति किम् । अ-पान्नपाद्यो वः ॥ सुमङ्गल सत्यराजन्विकिरिद्र विलो-हित दरिद्र नीललोहित ऋषस्कार भूयस्काराव्ऽअ-ग्निकेवालिके यारठ्ये वहव अंहसि ऽस्मिते मरुतो ऽअश्वि-ना यव्व्यैगःव्ये द्यावापृथिवी ऽउरो ऽअग्ना ३ इपत्नीवँ-स्सोमो ३ न्मा चीश्मी दुष्टम शिवतम सहस्राक्ष शतेषुधे व्वसुपते व्वसुदावन् ॥ १७६ ॥ एतान्येकोनत्रिंशदा-मन्त्रितानि नानुदात्तानि । अत यानि अपूर्वाणि पा-दादीनि वा तेषामनुदात्तत्वाभावः सिद्ध एव । अन्ये-षामनेन निषेधः ॥ दुडोत्तराणि नव स्वानोत्तराणि षडग्न्युत्तराणि चत्वारि भगोत्तराणि चेन्द्रोत्तरमेक-

ठं० सिनीवाल्युत्तरं च प्रजापतये ब्रह्मन्निति च ॥ १७७ ॥ इडशब्दादुत्तराणि नव । स्वानशब्दादुत्तराणि षट् । अग्निशब्दादुत्तराणि चत्वारि । भगशब्दादुत्तराणि चत्वारि । इन्द्रशब्दादुत्तरमेकं । सिनीवालिशब्दादुत्तरमेकं, प्रजापतये शब्दादुत्तरे ब्रह्मन्निति । एतानि षड्विंशतिरामन्त्रितानि नानुदात्तानि स्युः । इडे । रन्ते । हव्ये । काम्ये । चन्द्रे । ज्योते । अदिति । सरस्वति । महि । विश्रुति । स्वान । भ्राज । अङ्घारे । बम्भारे । हस्त । सुहस्त । कृशानो । अग्ने । इन्द्र । वरुण । मित्र । देवाः । भग । प्रणेतः । भग । सत्यराधः । । भग । इन्द्र । गोमन् । सिनीवालि । पृथुष्टुके । प्रजापतये । ब्रह्मन् ॥ भूतिराद्युदात्तम् ॥ १७८ ॥ अथाद्युदात्ताधिकारः । भूतिरित्येतदाद्युदात्तं स्यात् । भूतिश्च मे । नमो भूत्यै येदम् ॥ कदा नरिष्येम पूर्वम् ॥ १७९ ॥ नरिष्येमेत्येतत्पूर्वं कदा आद्युदात्तं स्यात् । नरिष्येम कदाचन । नरिष्येम किम् । कदाचन स्तरीः ॥ आमन्त्रितं च ॥ १८० ॥ सम्बोधनविभक्त्यन्तमाद्युदात्तम् । अग्ने गृहपते ॥ "तेनानन्तरेत्येकपदातिदेशात् ऊर्ज्जो नपादित्यत्र ऊर्ज्जः शब्द आद्युदात्तः । वस्तुत ऊर्ज्जः शब्दस्तु अन्तोदात्तः । ऊर्ज्जो नपातम् । "पदपूर्वमिति तु एतस्यापवादः । तस्याम-

प्तिनिषेधविषयस्यानोदाहरणम् ॥ कृष्णो ऽमृगसँयोगे । १८१ । कृष्णशब्द आद्युदात्तः स्यात् । पशुवाचकस्य विशेषणं न चेत् । कृष्णोऽसि । कृष्णो रात्र्यै । अमृगेति किम् । श्वा कृष्णः । अत्र श्वेत्यस्य कृष्णइति विशेषणम् ॥ व्ययवाँश्चान्तः । १८२ । विकारवानन्तःशब्द आद्युदात्तः स्यात् । परोऽन्तः । व्ययवानिति किम् । अन्तर्भूति । अयमव्ययम् अतो वचनादिकृतो विकारो न ॥ परः प्रधाने ॥ १८३ ॥ अयमाद्युदात्तः प्रधानवाचकश्चेत् । जातः परोऽन्यः । प्रधाने किम् । परो दिवा । अत्र परशब्दोऽन्यवचनः ॥ मात्रा च परिमाणे ॥ १८४ ॥ मात्राशब्द आद्युदात्तः परिमाणवाचकश्चेत् । कस्य मात्रा । परिमाणे किम् । विभृत्वोत्रा । इदं मातृशब्दस्य तृतीयैकवचनम् ॥ दक्षिणा च ॥ १८५ ॥ अयमाद्युदात्तः । दक्षिणामारोह ॥ न दर्शविश्वकर्म्मनिषद्येन्द्रस्य पातु सदः सहस्रेषु ॥ १८६ ॥ दर्शेत्यादिसप्तसु दक्षिणाशब्द आद्युदात्तो न । निषद्यादिषु त्रिषु अव्यवहितस्यासम्भवेऽपि निषेधो भवत्यत्र । तस्मिन्निति वर्णसप्तमीनिर्देशविषयं "पदे चेति ज्ञापकात् । दक्षिणा दर्श । दक्षिणा विश्वकर्म्मा । दक्षिणतो निषद्य । दक्षिणतऽइन्द्रस्य । दक्षिणतः पातु ॥ तसिलादि"ष्विति पुंवद्भावः । अत्र दीर्घान्तत्वाभावात्पूर्वसूत्रस्याप्राप्तौ निषेधो ज्ञा-

पकः । यत्किञ्चिद्वयवभेदेऽपि कार्यं प्रवर्तत एवेति । अतएव "एनोऽपापे" इति आत्वेनद्दित्यत्र भवत्येव । दक्षिणासदः । दक्षिणासद्भ्यः ॥ कर्णः स्वाङ्गे ॥ १८७ ॥ कर्णशब्द आद्युदात्तः स्वाङ्गवाचकश्चेत् । कर्णौ ते दन्ती । स्वाङ्गे किम् । कर्णो गर्द्दभः ॥ मह्रो नपुं० सके ॥ १८८ ॥ मह्र इत्येतदाद्युदात्तं नपुंसकलिङ्गं चेत् । मह्रस्त्य । मह्रश्च मे । नपुंसके किम् । मह्रोऽयमग्निः । अयं पुंल्लिङ्गः । श्रवश्च ॥ १८९ ॥ अयं चाद्युदात्तो नपुंसकश्चेत् । तत्र श्रवः । नपुंसके किम् । श्रवश्च मे । अयं पुंसि ॥ अन्धो वीर्ये ॥ १९० ॥ अन्धशब्द आद्युदात्तो वीर्यवाचकश्चेत् । अन्धस्त्य । वीर्ये किम् । अन्धन्तमः । अत्रान्धशब्दो निविडार्थः ॥ एता वर्णे ॥ १९१ ॥ अयमाद्युदात्तो वर्णवाचकश्चेत् । एताऽऐन्द्राग्नाः । एताश्चित्राः । वर्णे किम् । एता मे ॥ रोहितश्च केवलः ॥ १९२ ॥ केवलरोहितशब्द आद्युदात्तः । रोहितो धूम्ररोहितः । केवलः किम् । धूम्ररोहितः ॥ यन्त्री राट् ॥ १९३ ॥ यन्त्रीशब्द आद्युदात्तो राट्शब्दपरश्चेत् । यन्त्री राट् । राट् किम् । यन्त्र्यसि ॥ ओषधीरनामन्त्रिते ॥ १९४ ॥ अनामन्त्रितओषधीशब्द आद्युदात्तः । याऽओषधीः । अनाम-

स्वाहा वाजः पशो नमः ॥ १९५ ॥ सर्वादिष्टशब्दा आद्युदात्ताः । सर्व्वँ व्यत् । यत्र विश्वम् । यपीमानुषः । विश्वा ऽआशाः । स्वाहा यज्ञम् । वाजश्च मे । पयः पृथिव्याम् । नमः पशीय ॥ असि शिवासुपदा पयस्वतीयत्ते मधुमतीर्व्वर्च्चस्वानोजिष्ठभ्राजिष्ठशुष्मिणी महद्रवाच्याय वन्द्यो मेद्यो यम आदित्यक्षितः सोमेन स्वसेत्येतेषु ॥ १९६ ॥ शिवादिषु समस्तेषु असिशब्द आद्युदात्तः स्यात् । असि शिवा । असियत्ते । भागोऽसि । मधुमतीन्नः । असि वर्च्चस्वानहम् । असोजिष्ठोऽहम् । असि भ्राजिष्ठोऽहम् । असि शुष्मिणी । असि महद्रवाच्याय । असि वन्द्यश्च । असि मेद्यश्च । असि यमः । असयादित्यः । असि क्षितः । असि सोमेन । असि स्वसा अत्र "सन्निकृष्टविप्रकृष्टयोरि"त्यनेन व्यवहितस्य असि स्योनेत्यसिशब्दस्य सुपदाशब्दपरत्वेऽपि आद्युदात्तत्वं । न पयस्वती सहचरितत्वात्सुपदा चासिति सुपदा शब्दस्य आद्युदात्तत्वनिमित्तत्वं । तेनासहचरितस्य स्योनासि सुषदासि ॥ धनदारत्नधाभ्यां च ॥ १९७ ॥ भ्यां च परोऽसि शब्द आद्युदात्तः । धनदाऽअसि । रत्नधाऽअसि ॥ रायोऽपोषे ॥ १९८ ॥ रायइत्येतत्पदमाद्युदात्तं स्यात्पोषशब्दः परो न चेत् । रायो मे ।

तोतो रायः । अपोषे किम् । रायस्पोषम् ॥ न भागमीमिषयोः ॥ १९९ ॥ एतयोः परयो रायइत्येतदाद्युदात्तन्न । रायो भागम् । रायऽईमिषे ॥ त्रिधा बद्धहितयोः ॥ २०० ॥ एतयोस्त्रिधाशब्द आद्युदात्तः । त्रिधा बद्धः । त्रिधा हितम् ॥ सुकृतं भूते ॥ २०१ ॥ सुकृतपदमाद्युदात्तं भूतकालवाचकं चेत् । पृथुः सुकृतः । भूते किम् । सुकृतं च मे । अयं पुण्यवाचकः ॥ द्विरुदात्तानि ॥ २०२ ॥ अधिकारोऽयम् ॥ बृहस्पतिर्वनस्पतिर्नराशꣳसस्तनूनपान्नक्तोषासोषासानक्ता द्यावापृथिवी द्यावाक्षामा क्रतूदक्षाभ्यामेतवाऽअन्वेतवा इति च ॥ २०३ ॥ चकारादुक्तसूत्रादनामन्त्रितानीत्यपकृष्यते । अनामन्त्रितानि बृहस्पतिरित्यादिद्वादशपदानि द्विरुदात्तानि भवन्ति । अनामन्त्रितानि किम् । तनूनपात्पथः । बृहस्पतेऽअति । वनस्पते वीडुङ्गः । द्यावापृथिवीऽउरो ॥ देवताद्वन्द्वानि चामन्त्रितानि ॥ २०४ ॥ आमन्त्रितानि वर्जयित्वा देवताद्वन्द्ववाचकानि पदानि द्विरुदात्तानि । अग्नीषोमौ । मित्रावरुणौ । देवतेति किम् । दीक्षातपसोः । अनामन्त्रितानि किम् । धेनुर्मित्रावरुणा ॥ इन्द्राबृहस्पतीभ्यामिन्द्राबृहस्पती इति नीचि ॥ २०५ ॥ अनयोः शब्दयोस्त्रीण्यक्षराण्युदा-

त्तानि स्युः । इन्द्राबृहस्पतिभ्यान्त्वा देवाव्व्यम् । इ-न्द्राबृहस्पती ऽऊरुभ्याम् ॥ सर्व्वमग्ना ३ इ त्वाजी-ऽऋचोनिति त्रिमात्राणि च ॥ २०३ ॥ अग्ना इत्या-दिपदत्रयं सर्व्वमुदात्तं स्यात् । त्रिमात्रोऽस्ति येषु तानि त्रिमात्राणि त्रिमात्रस्वरविशिष्टानि निपात्यन्ते । अग्ना ३ इ । त्वाजी ३ न् । शाची ३ न् ॥ प्रणवश्च ॥ २०४ ॥ अयं च सर्वोदात्तस्त्रिमात्रश्च स्यात् । मादयन्तामो ३ म्प्रतिष्ठ ३ । ओं ३ क्रतो ॥ विवेशा ३ इति चानुदात्त-म् ॥ २०५ ॥ उत्तरम्पूर्वं इत्युत्तरसूत्राभ्यामपकृष्यते । अवसाने विद्यमानमनुदात्तं विवेशा ३ इति पूर्वं त्रिमा-त्रस्वरविशिष्टं निपात्यते । विश्वम्भुवनमाविवेशा ३ । उत्तरं किम् । आविवेश कान्यन्तः । अनुदात्तं कि-म् । येषु विश्वम्भुवनमाविवेश । हिरण्यगर्भ ऽइत्य-ध्याये विवेशपदस्य चतुर्वारमेकस्मिन्दर्भे पठितत्वात्पू-र्वत्वस्य सापेक्षत्वात्तदध्यायस्यस्यैव सुतत्वम् । तेनान्य-त्र अत्रर्ता२ ॥ ऽआविवेश । अभिसँव्विवेशेत्यादौ न ॥ आसीदितिचोत्तरँव्विचारे ॥ २०६ ॥ विचारे वर्त्त-मानमवसानस्थं आसीदितिपदमनुदात्तविशिष्टं नि-पात्यते । उपरि स्विदासीत् । विचारे किम् । स्वि-त्कथाऽसीत् ॥ पूर्व्वमन्तोदात्तम् ॥ २०७ ॥ विचारे वर्त्तमानं पूर्वमन्त्रमध्यस्थमासीदितिपदमन्तोदात्तं स्या-

त् । त्रिमात्रं च निपात्यते । अथ: स्विदासी३त् । विचारे किम् । का स्विदासीत् । अन्तोदात्तमित्यधिकार: ॥ द्वन्द्वञ्चेन्द्रसोमपूर्व्वं पूषाग्निवायुषु ॥ २०८ ॥ पूषादिषु त्रिषु उत्तरपदभूतेषु इन्द्रसोमपूर्वपदकं द्वन्द्वमन्तोदात्तं स्यात् । इन्द्रापूष्णो: । इन्द्राग्नी तमप । इन्द्रवायुभ्याम् । सोमापौष्ण: ॥ अग्निश्चेन्द्रे ॥ २०९ ॥ इन्द्रशब्दे उत्तरपदे सति अग्निपूर्वो द्वन्द्वोऽन्तोदात्त: स्यात् । ऋक्सामयो: शिल्पे ॥ यतो गतौ ॥ २१० ॥ यतइत्येतत्पदमन्तोदात्तं स्याद्गत्यर्थकं चेत् । स्वर्य्यतो धिया । गतौ किम् । यतो जात: प्रजापति: ॥ पायोर्व्विश: ॥ २११ ॥ पायुशब्दाद्विश-इत्ययमन्तोदात्त: । पायुर्व्विश: ॥ पायो: किम् । दैवीर्व्विश: ॥ आयुरर्य्यमोर्व्विश्वश्च स्तिभ्य: ॥ २१२ ॥ अर्य्यमादिभ्यस्त्रिभ्य: पर आयु:शब्दोऽन्तोदात्त: । अर्य्यमायु: । ऊर्व्वरश्वायु: । विधानसामर्थ्याद्व्यवधानेऽपि । कृष्णमस्ति । आयोद्धा । एभ्य: किम् । आयुर्मे ॥ अस्य रोचनासौ बोधा मे पारम्पुरऽएतारो दिव: कोऽहन्त्वमहीँय्याऽईशाऽईशानेभ्य: ॥ २१३ ॥ रोचनादिद्वादशभ्य: परोऽस्य शब्दोन्तोदात्त: । रोचनाऽस्य । असावस्य पिता । बोधा मेऽअस्य । तमसस्पारमस्य । पुरऽएतारोऽअस्य । दिवोऽअस्य पृष्ठम् । कोऽअस्य ।

श्वेराहमस्य । त्वमस्य यन्ता । महीमस्य स्तोत्रे, यऽईमे-ऽअस्य । ईशानमस्य ॥ प्रत्नाँ यज्ञस्य हविषः पाही-त्यातं मद्ध्वो यजमानस्य होतुरजरासो लोकेषु च ॥ २१४ ॥ प्रत्नामित्याद्येकादशसु अस्येत्यन्तो-दात्तं स्यात् । अस्य प्रत्नाम् । अस्य यज्ञस्योद्दचः । अस्य हविषस्तमना । सुमनाऽअस्य पाहि । अस्येदिन्द्रो वावृधे । अस्य यन्ता । अस्य मद्ध्वः पिबत । अस्य यजमानस्य । अस्य होतुः प्रदिशि । अस्याजरासः । अस्य लोकः सुतावतः । अनुदात्तमन्यत् ॥ २१५ ॥ उक्तान्यं यदस्येति पदमनुदात्तम् । कण्वस्य विष्ठाः । षडस्य विष्ठाः ॥ अनुदात्तमाख्यातमामन्त्रितवत् ॥ २१६ ॥ तिङन्तमामन्त्रितवत्पदं पूर्वमपादादौ विद्यमानं परस्परान्वितार्थकं चेदनुदात्तम् । पशून्पाहि । हव्यं रक्ष । पदपूर्वं किम् । व्यन्तु व्ययः । व्विदेदग्निः । अपादादौ किम् । अरातीः सहस्व । परस्परान्वितार्थकं किम् । व्विष्णो पाहि । पाहि यज्ञम् ॥ पराऽपावप्रतिपर्यन्वप्यत्यध्याङ्प्रसन्निर्दुर्न्युद्विस्वभि ॥ २१७ ॥ परा । उप । अव । प्रति । परि । अनु । अपि । अति । अधि । आङ् । प्र । सम् । निर् । दुर् । उत् । नि । वि । सु । अभि । एते विंशतिरुपसर्गाः । तथा चोक्तम् । विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव । आ-

द्युदात्ता इत्येतेषामन्तोदात्तमभिस्वयम् । १ । उपसर्ग उपसर्गे ॥ २१८ ॥ उपसर्ग उपसर्गे परेऽनुदात्तः । सम्प्रच्यवध्वम् । सम्प्रयात ॥ आम्रेडिते चोत्तरः ॥ २१९ ॥ द्विरुच्चारणे पर उपसर्गोऽनुदात्तः । प्रप्र यज्ञपतिम् । सꣳसमित् ॥ कृदाख्यातयोश्चोदात्तयोः ॥ २२० ॥ उदात्तोऽस्ति ययोरुदात्तवति कृदन्ते उदात्तवत्याख्याते परे उपसर्गोऽनुदात्तः । विभ्राजमानः । सम्भरन्ति । उदात्तयोः किम् । उपयुक्ति । अवधूतम् ॥ नाव्येकाक्षरस्य स्वरसन्धेयेऽकृति ॥ २२१ ॥ अभिरेकाक्षरश्चोपसर्गः स्वरात्मके उपसर्गेण सन्धिमति कृदन्तभिन्ने परेऽनुदात्तो न स्यात् । अभ्याऽऽधामि । अभ्यषिञ्चन् । व्याकरोत् । न्यमीदत्पिता नः । व्यदधुः । अकृति किम् । एज्याऽऽदूषः ॥ आपूतजातयोः ॥ २२२ ॥ आ इत्ययमुपसर्गः पूतजातयोः परयोरनुदात्तो न स्यात् । आपूतः । आजातः ॥ अधि नि प्र प्रति श्रितान्निर्णां प्रभानवः पचतेषु ॥ २२३ ॥ अधीत्यादयश्चत्वारो यथासङ्ख्यं श्रितादिषु चतुर्षु नानुदात्ताः । अधिश्रिताः । निश्श्रवन्न्यनिर्णाम् । प्रभानवः सिस्रते । प्रतिपचता गृभीषत ॥ उज्जेषमावर्त्तेऽऽपनीफणत्सꣳसनिष्यदत्संवर्तम्प्रयाणꣳसञ्चरन्तꣳसꣳरभध्वं प्रसितिँ व्विक्रमस्व-

त्येष्वनु ॥ २२४ ॥ उज्जेषमित्यादिष्वस्तु अनुरनुदात्तो न । अनूज्जेषम् । अन्वावर्त्ते । अन्वापनीफणात् । अनुसर्ठ०सनिष्यदत् । अनुसंव्रतम् ॥ अनुप्रयाणम् । अनुसञ्चरन्तम् । अनुसर्ठ०रभद्दम् । अनुप्रसितिम् । अनुविक्रमस्व ॥ ओपप्रोदात्ते ॥ २२५ ॥ आ । उप । एतौ उदात्ते प्रशब्दे नानुदात्तौ भवतः । आप्रयच्छ । उपप्रागात् ॥ अभि प्रेह्युपस्म प्रयात प्रयात्स्वनुष्वासुषाव ॥ २२६ ॥ अभिप्रेहीत्यादि चत्वारि निपात्यन्ते । प्रकृत्याऽऽख्यातमाख्यातपूर्व्वम् ॥ २२७ ॥ नानुदात्तम् । पिबन्तु मदन्तु व्यन्तु ॥ उदात्तोऽस्ति यस्मिन्नुदात्तवतः आमन्त्रितात्परमाख्यातन्नानुदात्तम् । अग्ने पवस्व । होतर्य्यज । एकान्तरादपि ॥ २२८ ॥ एकपदान्तरितादपि उदात्तवतआमन्त्रितात्परमाख्यातन्नानुदात्तम् । ब्रह्मन्त्वष्ट्वमन्स्यामि । अपिशब्दात्क्वचिदनुदात्तम् । इन्द्रायाहि । एतन्निर्णये सम्प्रदायएव शरणम् ॥ यद्वृत्तोपपदाव ॥ २२९ ॥ च अप्यर्थे । यदा यच्छब्देन इत्तं सम्पादितं यत् यदि यतः यत्र यथा ये इत्यादि सर्वविभक्त्यन्तं यद्वृत्तं तदुपपदं अर्थतः सम्बद्धं येन पदेन

ऽअरोचथाः । यथा समुद्रद्रऽएजति । य्ऽउपरासऽ-ईयुः । दूरस्थस्यापि अर्थतः सम्बन्धो ग्राह्यः । तथा चोक्तम् । यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य तत् ॥ अर्थतो ह्यसमानानामानन्तर्य्यमकारणम् ॥ १ ॥ हेश्च ॥ २३० ॥ हिशब्दादुत्तरमाख्यातन्नानुदात्तम् ॥ आपो हिष्ठ ॥ उत्तरेऽपि ॥ २३१ ॥ हिशब्दे परं चाख्यातन्नानुदात्तम् । वामुशन्ति हि ॥ नेत् ॥ २३२ ॥ अस्मान्निपातसमुदायात्परमाख्यातं नानुदात्तम् ॥ नेत्त्वद्पचेतयातै ॥ समनसस्करत् ॥ २३३ ॥ समनसइत्यस्मात्परं करदित्याख्यातं नानुदात्तम् । असपत्नाः समनसस्करत् ॥ द्वयोः पूर्वं समुच्चये ॥ २३४ ॥ द्वयोराख्यातयोः समुच्चये वर्त्तमानयोः पूर्वन्नानुदात्तम् । शम्मि च स्त्यो व्वर्म्म च स्त्यः । शन्त्र व्वद च परि च व्वद । समुच्चये किम् । तन्नमितं व्वज्जनेण तन्तमिहतम् ॥ इति प्रकृतिस्वराः ॥ अर्थः पदम् ॥ २३५ ॥ अर्थोऽस्ति यस्मिन्नर्थवाचकः । अक्षरसमुदायो'ऽक्षरं वा पदं स्यात् । एषः । सः । तत् । उत । त्वा । आ । अस्तु ॥ तच्चतुर्द्धा ॥ २३६ ॥ तत्पदं चतुः प्रकारं स्यात् । उक्तं च । क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ॥ सत्त्वाभिधायकन्नाम निपाताः पादपूरणाः ॥ २३७ ॥ अपश्यतु । पाहि । इत्याद्याख्यात-

म् । परा । उप । इत्यादयो विंशतिरुपसर्गाः । देवः । सविता । इत्यादीनि नामानि । वा च उतेत्यादयो निपाताः ॥ पदविच्छेदेऽसंहितः ॥ २३८ ॥ पदे पदे विच्छेदे विलम्बेनोच्चारणं असंहितः । न संहिता यस्मिन्सः पदपाठः । विसन्धिकेषु विसर्गस्य लोपाद्वि-सर्गान्तत्वस्वरान्तत्वनिर्णयार्थं सन्दिग्धानि लिख्यन्ते । विप्रम्राजदजयस्पृधः । विप्रम्रा विराजति । इति पदद्वये ऊष्मान्तं ऊष्मा विसर्गः । अन्यत्र स्वरान्तम् । विश्वा रूपाणि ॥ २३९ ॥ पृथिव्यापदं मन्थीत्यस्मिन्स्वरा-न्तमन्यत्रोष्मान्तम् । इमा इदं विप्रम्रा । वः । ब्रह्म हरी युक्ता जज्ञानं नु कम् । इति सप्तसु स्वरान्तम् । अन्यत्रोष्मान्तम् । इमा रुद्रायेत्यादि । व्विष्णो बभूव नासत्या भिषजा न आत्रोढं या देवा हविषा नो मृडातः । नोऽअच्छ विश्-सुम्न इत्येतेषु दशसु ताइति स्वरान्तमन्यत्रोष्मान्तम् । ताः । नः । हिन्वन्तु । हविर्भ्यत्योः साध्यादा इति य-थासङ्ख्यं स्वरान्ते अन्यत्र विसर्गान्ते । आभिः द्यौः । वसुभिः ॥ २४० ॥ वरिवो विश्वदंष्युत्रमित्यनयोर्धिष्ण्यास्व-रान्तमन्यत्र विसर्गान्ते । ऊर्चिषे । धिष्ण्या । ये ॥ मर्त्तौ व्वृरीत मर्त्तं च्यविनः परोमर्त्ताः स्तेमर्त्तं इति च ॥ २४१ ॥ एते-षु चतुर्षु मर्त्तशब्दोऽयकारः । अन्यत्र मर्त्त्यः ॥ क्रमो-क्ताऽऽवृत्तिः पदेषु ॥ २४२ ॥ क्रमप्रकरणे उक्ता आवृत्तिः

पदपाठे स्यादवसानवर्ज्जम् ॥ तद्यथा॥ पूर्व्वस्योत्तरसंहितस्य ॥ २४३ ॥ स्थितोपस्थितमवगृह्यस्य ॥ २४४ अन्तःपदे दीर्घीभावे ॥ २४५ ॥ विनामे ॥ २४६ ॥ प्रगृह्ये ॥ २४७ ॥ रिफिते निरुक्ते ॥ २४८ ॥ तत्रावग्रहवतः पदस्य स्थितोपस्थितं स्यात् । ये विषयः स्थितोपस्थितो वेष्टने न भवन्ति ते तत्प्रकरणे एव दर्शिताः । कुत्रावग्रहः कर्त्तव्यस्तदाह ॥ समासेऽवग्रहो ह्रस्वसमकालः ॥ २४९ ॥ समास इत्यधिकारः । समासेऽवग्रहो ह्रस्वसमकालः एकमात्राकालो विरामः स्यात् । स च चर्चायां प्रदर्शनीयः सम्प्रदायात् ।अन्तःपार्श्वमित्यन्तः । पार्श्वम् ।अनुरूपमित्यनु । रूपम् । व्रतपतऽइति व्रत । पते । पुरोगाऽइति पुरः । गाः । मणिवालऽइति मणि । वालः । स्टक्सामाभ्यामित्यृक् । सामाभ्याम् । अवग्रह इत्यधिकारः ॥ तरतमयोश्चातिशये ऽदिवणप्रत्यासङ्गे ॥ २५० ॥ समासाभावादारम्भः । अतिशये विद्यमानयोस्तरतमयोरवग्रहः स्यात् । दक्षिणशब्दः प्रतियोगी न चेत् । पूर्णतरमिति पूर्ण । तरम् । प्रप्रितममिति प्रप्रि । तमम् । अदक्षिणेत्यादि किम् । द्यावापृथिव्योर्हदिशां पार्श्वं विविश्वेषां देवानामुत्तरमित्यत्रोत्तरमित्येव । अतिशये किम् । कारोतरः ॥ वीतमहूतमसूतमगोपातमरत्नधातमवसुधातमाः पू-

र्व्येण ॥ ३५१ ॥ एते शब्दाः पूर्वेणावगृह्यन्ते । देववीतममिति देव । वीतमम् । देवहूतममिति देव । हूतमम् । सुहूतममिति सु । हूतमम् । सुगोपातमऽइति सु । गोपातमम् । सुधातमऽइति सु । धातमः ॥ सर्प्पदेवजनेभ्यश्च ॥ ३५२ ॥ इदं च पूर्वेणावगृह्यते । सर्प्पदेवजनेभ्यऽइति सर्प्प । देवजनेभ्यः ॥ तूणवध्मसुत्तरेण ॥ ३५३ ॥ इदमुत्तरेणावगृह्यते तूणवध्ममिति तूणव । ध्मम् ॥ रायस्पोषदे विजावेति च ॥ ३५४ ॥ इमे चोत्तरेणावगृह्यते । रायस्पोषदऽइति रायस्पोष । दे । विजावेति विजा । वा ॥ बह्वप्रकृतावागन्तुना पर्वशः ॥ ३५५ ॥ बहुपदसमासे पाश्चात्कालिकेन पदेनावग्रहः स्यात् । प्रजापतिरिति प्रजा । पतिः । सुप्रजाऽइति सु । प्रजाः ॥ तद्वति तद्धिते न्यायसंहितं चेत् ॥ ३५६ ॥ वतीति तन्त्रेण द्विरुच्चारितं तदस्ति यस्मिंस्तः तस्मिन्नन्वर्थे विद्यमाने तद्धिते वति प्रत्यये च परेऽवग्रहः स्यात् । शास्त्रोक्तसन्धिमत्पदं चेत् । मधुमदिति मधु । मत् । सँव्वतमिति सम् । व्वतम् । न्यायसंहितमिति किम् । मरुत्वान् । अत्र "स्पर्शोऽपञ्चम" इति तृतीयः शास्त्रसिद्धोपि न कृतः । अतो न भवति ॥ शब्दान्ता-तातिषु च ॥ ३५७ ॥ शम्इत्यादिषु चतुर्ष्ववग्रहः स्या-

तृ । ऋतुथाऽइत्यृतु । थः । अमृतत्वमित्यमृत त्वम् । देवत्रेति देव । त्रा । ज्येष्ठतातिमिति ज्येष्ठ । तातिम् ॥ धात्वर्थे यकारे स्वरपूर्वे ॥ ३५८ ॥ धातुसञ्ज्ञानिमित्तभूतो यकारः क्यजादिः स्वरपूर्वे तस्मिन्परेऽवग्रहः स्यात् । इषयमाणाऽइति इष । यमाणाः । धात्वर्थे किम् । जायमानः ॥ वाꣳसौ च भूतकाले स्वरेण ह्रस्वादनुषि ॥ ३५९ ॥ स्वरेण तृतीया पञ्चम्यर्थे । ह्रस्वस्वरात्परभूते वांसशब्दे भूतकालार्थे परेऽवग्रहः स्यात्स उषरूपो न चेत् । यच्चिवाꣳसऽइति यच्चि । वाꣳसः । सस्वाꣳसऽइति सस्व । वाꣳसः । स्वरेण किम् । चिकित्वान् । ह्रस्वात्किम् । अन्यथाखीषम् । जिगीवाꣳसः । भूतकाले किम् । सुविद्वाꣳसऽइति सु । विद्वाꣳसः । अनुषि किम् । तस्थुषः ॥ प्रत्नपूर्व्वविश्वेमतुभ्यस्था ॥ ३६० ॥ एभ्यः पञ्चभ्यः स्थाप्रत्ययेऽवग्रहः स्यात् । प्रत्नथेति प्रत्न । था । पूर्व्वथेति पूर्व्व । था । विश्वथेति विश्व । था । इमथेतीम । था । ऋतुथेत्यृतु । था ॥ ह्रस्वव्यञ्जनाभ्याम्भकारादौ विभक्तिप्रत्यये ॥ ३६१ ॥ ह्रस्वाद्व्यञ्जनाच्च परे भकारादौ विभक्तिसञ्ज्ञे प्रत्यये परेऽवग्रहः स्यात् । अग्निभिरित्यग्नि । भिः । धावद्भ्यऽइति धावत् । भ्यः । तक्षभ्यऽइति । तक्ष । भ्यः । समिद्भिरिति

समित् । भिः । हलित्यादि किम् । व्रातेभ्यः ।
पत्नीभ्यः । विभक्तीति किम् । गर्द्दभः । स्विति चान-
न्तौ ॥ ३६२ ॥ हल्व्यञ्जनाभ्यामकृतषत्वे सुइति
विभक्तिप्रत्यये परेऽवग्रहः स्यात् हृत्स्विति हृत् ।
सु । अप्स्वित्यप् । सु । धामस्विति धाम । सु । अन-
न्तौ किम् । अग्निषु । स्नुषु । विभक्तीति किम् ।
असुम् । हल्स्वेति किम् । यासु । वर्णसङ्ख्येऽन्यत-
रतः ॥ ३६३ ॥ समासइति मण्डूकप्लुतिन्याये-
नानुवर्त्तते मध्ये त्वसम्भवान्न सम्बध्यते । वर्णवाच-
के सङ्ख्यावाचके च समासे विकल्पेनावग्रहः स्यात् ।
धूम्ररोहितऽइति धूम्र । रोहितः । पञ्चदशेति प-
ञ्च, दश । त्रयोदशेति त्रयः । दश । विभाषितत्वात् ।
त्रिनवत्रयस्त्रिंशाविति त्रिनवत्रयस्त्रिंशौ । अत्र
न । व्यवस्थितविकल्पः । सम्प्रदायानुसारेण पठनी-
यम् ॥ अनुदात्तोपसर्गो चाख्याते ॥ ३६४ ॥ अनुदा-
त्ते उपसर्गे आख्यातपरेऽवग्रहः स्यात् । उपधावती-
त्युप । धावति । सम्भरन्तीति सम् । भरन्ति ॥ गिरि-
त्रशयोः ॥ ३६५ ॥ गिरिशब्दोऽवगृह्यते त्रशयोः पर-
योः । गिरिशेति गिरि । श । गिरित्रेति गिरि । त्र ॥ इ-
वकाराम्रेडितायनेषु ॥ ३६६ ॥ इवकारादिषु चतुर्ष्वव-
ग्रहः स्यात् । सुचीवेति सुचि । इव । वषट्कारै-

भिरिति वषट् । कारेभिः । सꣳसमिति सम् । स-
म् । प्रायनायेति प्र । अयनाय ॥ एकात्समी-
ची ॥ ३६७ ॥ एकशब्दात्परः समीचीशब्दोऽवगृह्य-
ते । एकम् । समीचीऽइति सम् । ईची । एकात्कि-
म् । समीचीऽइति समीची । उरसा ॥ त्वायवः शँय्यो
र्बर्हिर्धाऽस्मयुम्मृन्मयीꣳसुम्नयाशुया साधुया धृ-
ष्णुया विशालमनुया ॥ ३६८ ॥ एतान्येकादशप-
दानि सावग्रहाणि स्युः । त्वायवऽइति त्वा । य-
वः । शँय्योरिति शम् । योः । बर्हिरिति बर्हिः । धा ।
अस्मयुमित्यस्म । युम् । मृन्मयीमिति मृत् । म-
यीम् । सुम्नयेति सुम्न । या । आशुयेत्याशु । या ।
साधुयेति साधु । या । धृष्णुयेति धृष्णु । या । वि-
शालमिति वि । शालम् । अनुयेत्यनु । या ॥ मृगयु-
मुभयादतोऽपामार्गं किम्पूरुषमिति च ॥ ३६९ ॥
एतानि चत्वारि पदान्यवगृह्यन्ते । मृगयुमिति मृ-
ग । युम् । उभयादतऽइत्युभय दतः । अपमार्गेत्यप ।
मार्ग । किम्पुरुषमिति किम् । पुरुषम् ॥ अधीवा-
समित्येके ॥ ३७० ॥ एकशब्दो मुख्यार्थः । एतत्सा-
वग्रहं स्यात् । अधिवासमित्यधि । वासम् ॥ प्रति-
षेधे नावग्रहः ॥ ३७१ ॥ प्रतिषेधवाचिनि पूर्वपदे-
ऽवग्रहो न स्यात् । अनसा । अनिरा । उत्तरेणचा-

कारेण ॥ ३७२ ॥ प्रतिषेधवाचिनः परेणाकारेणा-
वग्रहो न स्यात् । अनातताय । अनाधृष्या ॥ द्वापू-
र्व्वं च ॥ ३७३ ॥ द्वा इति पूर्वमस्य नावगृह्यते । द्वादश ॥
सङ्ख्यापूर्वश्च धा ॥ ३७४ ॥ सङ्ख्यावाचकपूर्व-
पदं धा इत्यस्मिन्परे नावगृह्यते । त्रिधा । सप्त-
धा । कतिधा ॥ द्वन्द्वानि द्विवचनान्तानि स्वरान्तपू-
र्व्वपदानि ॥ ३७५ ॥ स्वरान्तपूर्वपदमेषां तानि द्विवच-
नान्तानि नावगृह्यन्ते । मित्रावरुणाभ्याम् । अ-
ग्नीषोमौ । स्वरान्तेत्यादि किम् । ऋक्सामयोरित्यृ-
क् । सामयोः ॥ तद्धिते चैकाक्षरवृद्धावनिहि-
ते ॥ ३७६ ॥ तद्धिते सत्येकाक्षरस्य पूर्वपदस्य वृद्धौ
उत्तरपदे चाव्यवहितायामवग्रहो न स्यात् । सौभा-
ग्यम् ॥ सौभगेनेति सौ । भगेन । अनिहिते किम् । सा-
म्राज्यमिति साम् । राज्यम् । एकाक्षरे कि-
म् । आनुष्टुभमित्यानु । स्तुभम् ॥ अञ्चतिसहत्योः
छल्लोपे ॥ ३७७ ॥ छ्लोपे सति अञ्चतिसहत्योः प-
रयोर्नावग्रहः स्यात् । प्राङ् । प्रत्यङ् । ऋताषाट् ।
छल्लोपे किम् । आच्योत्या । अच्य । पृतनासह्याये-
ति पृतना । सह्याय । अनुरुसुभ्यां छल्लोपे ॥ ३७८ ॥
अञ्चतौ सहतौ च परेऽवग्रहनिषेधो न स्यात् । उरु-
व्यञ्चनित्युरु । व्यञ्चम् । सुमाहमिति सु । साह-

म् ॥ समिदाभ्यांव्वत्सरः ॥ ३७९ ॥ सम् । इदा
आभ्यां वत्सरेऽवग्रहो न स्यात् । सँव्वत्सरः । इदाव-
त्सरः । समिदाभ्यां किम् । परिवत्सरऽइति प-
रि । वत्सरः ॥ प्राग्निभ्यामनिन्धौ प्रश्ले-
षे ॥ ३८० ॥ प्र अग्नि इत्येताभ्यां इन्धधातुभिन्ने परे
एकीभावसन्धाववग्रहः स्यात् । प्राणः । आग्निध्र-
म् । अनिन्धौ किम् । प्रेद्धऽइति प्र । इद्धः । प्राग्नि-
भ्यां किम् । अपानऽइत्यप । आनः । वीध्यायेति वि ।
इध्याय ॥ जनयत्याऽओषधयो हृषायिषत नहि च
नास्मभ्यमजावयो व्वलगम् ॥ ३८१ ॥ जनयत्या इ-
त्यादीन्यष्टौ नावगृह्यन्ते ॥ जनयत्यै त्वा । ओषधयः
प्रति । मागमाहृषायिषत । नहि तेषाममा च न ।
कदा चन । पावकोऽअस्मभ्यम् । उपहूताऽअजाव-
यः । अहंव्वलगमुत्किरामि ॥ समानोऽनश्वमेधे ॥
॥ ३८२ ॥ समानशब्दो नावगृह्यते । अश्वमेधे न चे-
त् । ये समानाः । अनश्वमेधे किम् । समानऽइति
सम् । आनः । तेजोऽसीत्यध्याये एतदारभ्याध्यायच-
तुष्टयमश्वमेधसञ्ज्ञकम् ॥ वायुरसजातः समुद्रोऽहो-
रात्रे व्विश्वानरो व्विश्वाहायहायनोऽसपत्ना गो-
धाग धूमाऽआशुशुक्षणिर्न्यग्रोधः पुरोडाशः प्रावणे-
भिरगोतमतस्करान्मसम्मसाश्वत्थऽउपस्तिम्भीकिव्वि-

श्वामित्रो गोपाम्प्रऽउगमङ्गानि कक्षीवन्तमदधा-
त्पत्नीरवन्नीहारेण प्रावृता घनाघनऽईहङ्ङन्याहङ्-
शूघनासः कुरवङ्कुचरः प्रियङ्गवो नीवारा एकादश
षोडश चन्द्रमाऽआयुवो व्याघ्रोऽनड्वान्गविष्ठि-
रः कपर्दिने पुलस्तये निषङ्गिणे कुलालेभ्यः क-
र्मारेभ्यः पुञ्जिष्ठेभ्यो ह्रीप्याय नीप्याय किꣳशि-
लायैलवृदाः शूकाराय शूकृताय चराचरेभ्यः पाराव-
तान्गोलत्तिकाऽऽखुरजगरो विपन्न्यवो दाक्षायणाऽ-
आयुꣳ सुरामं बृहस्पतिर्व्वनस्पतिर्न्नराशꣳ सुर-
भिर्न्नरिष्ठायै ॥ ३८३ ॥ एतानि सप्ततिपदानि नावगृ-
ह्यन्ते । इदं दिक्प्रदर्शनार्थम् । अन्यान्यप्येवंविधानि
द्रष्टव्यानि । उत्तम्भनम् । आदिसंशयात् । विशौजाः
अन्यायसमासात् । उगणाः । उपसर्गैकदेशलोपात् । पुँ-
स्तूम् । अनुनासिकोपधत्वात् । अवत्तानाम् । धात्वे-
कदेशलोपात् । इत्यादीनि । तथा चोक्तम् । आदिम-
ध्यान्तलुप्तानि समासान्न्यायभाञ्जि च ॥ नावगृह्णन्ति
कवयः पदान्यागमवन्ति च ॥ १ ॥ चकारोऽनुक्तसमुच्चया-
र्थः । तेन ध्रजीमानित्यत्र नावग्रहः । अत्र सम्प्रदाया-
नुसारेण व्यवस्था ॥ अनितावन्तर्व्विकारागमप्रागु-
रुका ॥ ३८४ ॥ इतिरहितं पदं मध्यस्थविकारागम-
सहितं पूर्व्वमुच्चार्य्य स्थितोपस्थितं कार्य्यम् । श्रेयस्कर ।

श्रेयः करेति श्रेयः । का । आयुष्पाः । आयुःपाऽइत्या-
युः । पाः । ऋतस्पते । ऋतपतऽइत्यृत । पते । अहर्पं-
तये । अहःपतयऽइत्यहः । पतये । दुदुत्त्वन् । दुधुक्ष-
न्निति दुधुक्षन् । विश्प्पतीवेति च ॥ ३८५ ॥ इदं च पू-
र्व्वमुक्ता स्थितोपस्थितं कर्त्तव्यम् । विश्प्पतीवोप-
स्थिते ॥ ३८६ ॥ विश्प्पतीदमिवे परे प्रकृत्या भव-
ति । उपस्थिते विद्यमानं चेत् । विश्प्पती व । वि-
श्प्पतीवेति विश्प्पती । इव । संहितावदवग्रहः
स्वरविधौ परश्च सर्व्वश्चेदनुदात्तम् ॥ ३८७ ॥ अवग्र-
हयोग्यं पूर्वं पदं स्वरविधौ संहितावद्भवति परं च स
र्वश्चेत्संहितावत्सर्वमनुदात्तश्चेत् । आस्वरं स्त्यऽइत्या-
स्वरे । स्त्यः । "नोदात्तस्वरितोदय"मिति निषेधात्प्र-
चयो न । प्रजावतीरिति प्रजा । वतीः । अत्र "दात्ता
दनुदात्त"मिति वकारस्य स्वरितः । वह्नितममिति
वह्नि । तमम् । अत्र "स्वरितात्पर"मित्यनेन तममित्य
स्य प्रचयो भवति । स्वरविधौ किम् । धावद्भ्यऽइति धाव
त् । भ्यः । अत्र संहिताया अभावा "त्स्पर्शोऽपञ्चम"
इति तृतीयो न । सर्वानुदात्तत्वाभावे विशेषमाह ॥
इति परस्तिर्य्यङ्नीचान्तोदात्ते मध्योदात्तेपर्व्वणि का-
लवस्य वा ॥ ३८८ ॥ परमित्यनुवर्त्तते । अन्तोदात्ते-
मध्योदात्ते वा पदे इतेः परभूते चर्च्चापदे परो

भागस्तिर्यङ्नीचोऽविकृतोऽनुदात्तो यस्मिन्नेतादृशः स्यात् । व्विकक्चुरिति वि । कक्चुः । सान्तपनेभ्यऽइति साम् । तपनेभ्यः । अन पूर्वसूत्रेण कक्चुरित्यनयोः प्रचये प्राप्तेऽनेनानुदात्तएव विधीयते ॥ अन्तःपददीर्घीभावे ॥ २८९ ॥ पदमध्यस्थं दीर्घत्वं यस्य पदस्य तस्मिन् स्थितोपस्थितं स्यात् । मामहन्ताम् । ममहन्तामिति ममहन्ताम् । पूरुषः । पुरुषऽइति पुरुषः । इदं पदान्तस्थत्वाभावोपलक्षणम् । आयुनक् । अयुनगित्ययुनक् । अन्तःपदे किम् । पिब सोमम् । पिबा सोमम् ॥ विनामे ॥ २९० ॥ अन्तःपदइत्यनुवर्त्तते । अन्तः पदे दन्त्यस्य मूर्द्धन्यभावे सति स्थितोपस्थितं स्यात् । सुषाव । सुसावेति सुसाव । सीसधाम । सीसधामेति सीस । धाम । अन्तःपदे किम् । आपो हि ष्ठ । हिस्थ ॥ प्रगृह्ये ॥ २९१ ॥ प्रगृह्ये पदे स्थितोपस्थितं स्यात् । द्वेऽइति द्वे । द्यावापृथिवीऽइति द्यावा । पृथिवी । इन्द्रवायूऽइतीन्द्र । व्वायू । चमूऽइति चमू । अस्मेऽइत्यस्मे । त्वेऽइति त्वे ॥ मे ॥ २९२ ॥ इत्युदात्तस्य प्रगृह्यत्वात् । मेऽइति मे । रायः । उदात्तं किम् । मे व्वरुण । अमीऽइत्यमी ॥ प्लुतमितौ ॥ २९३ ॥ प्लुतमक्षरमितौ प्रकृत्या । एतस्योदाहरणं क्रमप्रकरणे वक्ष्यते ॥ "पदान्तपदाद्योः सन्धिरिति नियमात्

प्लुतस्य इतौ परे एकपदस्थत्वा"त्कारव्यादिवर्णे ए-
कार" इत्यस्य प्राप्तौ प्रकृतिभावविधानं व्यर्थमाशङ्का-
पद्यति । इतौ पदान्तकार्यं भवति तेन दुरोणसदिति
दुरोण । सत् । इत्यादौ "नान्तःपद" इति निषेधाभा-
वा"त्स्पर्शोऽपञ्चम" इति तृतीयादि भवति । परेषा
सन्धिस्तु उभे संहिते स्यादित्युक्तत्वात्स्थितस्य भिन्नप-
दत्वाद्भवति । अपहतमित्यप । हतम् । प्रतिज्ञासूत्र-
स्य धर्मा न भवन्ति । प्रतिज्ञासूत्रशेषभूतास्यामोघ-
नन्दिन्या "अवग्रहः पदान्तव" दिति सिद्धेऽपि त्ववग्र-
हे पुनर्जकारविधानात्तेन यज्ञोऽइति यज्ञो ॥ ओका-
रश्च ॥ २८४ ॥ अथमितौ प्रकृत्या । वायोऽइति वा-
यो । "ओकारश्च पदान्ते" इत्यनेन प्रगृह्यत्वे स्थितो-
पस्थिते सति प्रगृह्यत्वात्प्रकृतिभावे सिद्धे पुनर्विधा-
नं नियमार्थं इतावेव नान्यत्र । विष्णावेते । वायवि-
ह । अनवग्रहः किम् । गविष्ठाविति गो । इष्टौ ।
अत्र गोशब्दे स्थितोपस्थिते मा भूत् । "उकारो-
ऽपृक्त" इत्यनेन प्रगृह्यत्वात्स्थितोपस्थिते ॥ उकारोऽ-
पृक्तो दीर्घमनुनासिकम् ॥ २८५ ॥ इतौ परे उइ-
तिपदं दीर्घमनुनासिकं ऊँ इति रूपमापद्यते । इति
पदं परे स्थितेऽपि । ऊँऽइत्यूँ इति सिद्धम् । अन्तरि-

ष्व्यः । सद्ध्यक्षः । क्षरिति क्षः । "अनुदात्तमित्युक्तत्वात् । क्षः । स्वित् । स्वरिति स्वः । स्वभितम् । पदमित्युक्तत्वात्परावयवे न । राजस्वऽङ्गुलि राज । स्वः । आवरित्याव: । वरिति वः । "समानस्त्रीत्युक्तत्वात् । सन्तु । वः । अन्तः श्लेषऽइत्यन्तः । श्लेषः । अत्र पूर्वभागेऽवग्रहः पदान्तवदिति स्थितं प्राप्तं "नद्विवतिकारणमित्युक्तत्वान्न भवति ॥ त्रिपदाद्यावर्त्तमाने सङ्क्रमः ॥ २८६ त्रिपदादीनां पुनरावृत्तौ सत्यां सङ्क्रमः सङ्क्रम्यते इति सङ्क्रमः । आवृत्तानि पदान्यतिक्रम्याग्रिमपरपदं न कर्त्तव्यम् ॥ अनन्तरे ॥ २८७ ॥ ग्रक्तस्यार्थस्यानन्तर्यें सङ्क्रमः स्यात् । ग्रक्तस्यानन्तर्ये गन्धर्वस्त्वा विश्वावसुरित्यत्र विश्वस्यारिष्ट्यै इत्याद्येकशेषारितं पुनरिन्द्रस्य बाहुरित्यादौ सङ्क्रम्यते । अर्थतो मधुश्च माधवश्चेत्यत्रोच्चारितस्य परसमुदायस्य शुक्रश्च शुचिश्चेत्यादौ सङ्क्रमः ॥ द्विपदैकपदान्यप्यनुवाके ॥ २८८ ॥ द्विपदं एकपदं च एकस्मिन्ननुवाके पुनरावृत्तौ सङ्क्रम्यते । अनाप्यगन्तरइति वर्त्तते तेन याऽओषधीरित्यत्रैकदोच्चारितस्य याइत्यस्य याःफलिनीरित्यत्रोच्चारणम् ॥ त्रिरावृत्ते ॥ २८९ ॥ त्रिरावर्त्ततेऽयं संङ्क्रमः स्यात् । वाजः । च । मे । प्रसवः । प्रयतिः । मा छन्दः ।

प्रमा । प्रतिमा । एकइत्यादि किम् । पवित्रम् । अ-
सि । घूः । असि । प्रभी । निराहत्तै किम् । व्रतम् ।
कृणुत । व्रतम् । कृणुत । इषे । त्वा । ऊर्जे ।
त्वा ॥ गूढे ॥ ३०० ॥ द्विरावर्त्तनेऽपि सङ्क्रमः स्या-
त् । गूढं नाम द्विवारमुच्चारणीयम् । उभयाभिप्रा-
येण मध्ये एकपदं पठ्यते । यन्ताऽसि यमनः । ध्रु-
वोऽसि धरुणः । अत्र यन्ता । असि । यमनः । ध्रु-
वः । धरुणः । संहितायां द्विराहत्तस्याप्यसीत्यस्य स-
ङ्क्रमो भवति । याः फलिनीरित्यत्र तु याः ।
च । पुष्पिणीः । अस्य याः शब्दस्य चतुर्वारमुच्चार-
णीयस्य त्रिवारमुच्चारणात् । अपुष्पा इत्यनेनापि
सम्बन्धं द्योतयितुं न संक्रमः ॥ पदसमूहे ॥ ३०१ ॥
पदानां बहुवारमुच्चारणे सङ्क्रमः स्यात् । व्राजश्च
मऽइत्यध्याये च मे इतिपदद्वयस्यानुवाकान्तरेऽपि स-
ङ्क्रमः ॥ अपराङ्गे ॥ ३०२ ॥ अपरस्याङ्गे अपराङ्ग-
त्वेनैव पुनराहत्तै संङ्क्रमः स्यात् । स्वाहा यज्ञमि-
ति मन्त्रे स्वाहा द्यावापृथिवीभ्याᳬ स्वाहा वातादि-
त्यनयोः स्वाहाशब्दयोः सङ्क्रमः स्यात् । रमे स्वा-
हेत्यस्य न सङ्क्रमः । अपराङ्गत्वाभावात् ॥ अस्वर-
विकारे ॥ ३०३ ॥ स्वरभिन्नत्वाभावे सङ्क्रमः स्या-
त् । सुक्ष्मा चासि प्रथमस्याप्यसिशब्दस्याद्युदा-

त्त्वात् । शिवा चासीत्यस्यानुदात्तत्वान्न सङ्क्रमः ॥ अलिङ्गविकारे ॥ ३०४ ॥ लिङ्गभिन्नत्वाभावे सङ्क्रमः स्यात् । भद्रो नऽइति मन्त्रे भद्रशब्दस्य भिन्नलिङ्गत्वान्न सङ्क्रमः । अग्निर्भागोऽसीत्यनुवाके नपुंसकस्य स्पृतशब्दस्य सङ्क्रमः । व्रातः । स्पृतः । गर्भाः । स्पृताः । दिशः । स्पृताः । इत्येतेषु पुंल्लिङ्गत्वस्त्रीलिङ्गत्वान्न सङ्क्रमः । सत्रे यथाऽसीति मन्त्रे प्रथमस्य समशब्दस्य नपुंसकविषयत्वाद्द्वितीयस्य पुल्लिङ्गविषयत्वान्न सङ्क्रमः ॥ असमाने ॥ ३०५ ॥ असमाने विषये पुनरावृत्ते सङ्क्रमः स्यात् । आयुर्यज्ञेनेत्यत्रायुरादिर्यज्ञक्लृप्तेरसमानत्वात्सङ्क्रमः । यज्ञस्य तु यज्ञक्लृप्तेः समानविषयत्वान्न सङ्क्रमः ॥ संहितायाञ्च ॥ ३०६ ॥ चार्थो । चसंहितायां पुनरावृत्तौ सङ्क्रमः स्यात् । हिरण्यगर्भऽइत्येषः । तत्प्रतूक्तेत्यादिप्रतीकपठितेषु सङ्क्रमः कार्यः । एषां मन्त्राणां ब्रह्मयज्ञादौ पठनं कार्यमिति केचित् । नेत्यपरे ॥ अवसानार्थम्पुनर्ग्रहणम् ॥ ३०७ ॥ समाप्तिद्योतनार्थं पुनरुच्चारणं स्यात् । आकूत्यै प्रयुजे इतिमन्त्रे द्वितीयादिस्वाहाकारस्य सङ्क्रमे पूष्णेऽग्नये स्वाहेत्यत्र न सङ्क्रमः ॥ अधिकारार्थम् ॥ ३०८ ॥ पदस्याधिकार्थज्ञापनार्थं च पुनरुच्चारणं स्यात् । व्राजश्चेति

मन्त्रे च मे इत्यनयोः सङ्क्रमेऽपि स्वरिति स्वः । च मे इत्यत्र रिफितत्वज्ञापनार्थं न सङ्क्रमः ॥ उदग्गं प्रय ॥ ३०९ ॥ पूर्वोक्तस्य परित्यागोऽपि क्वचित्स्यात् । व्यवस्थितविपर्ययोऽयम् । च शब्दोऽप्यर्थे । "द्विपदैकपदा नीत्यनेनोक्तः सङ्क्रमः । तद्देवाग्निरिति मन्त्रे न भवति ।" संहितायां चेत्यनेन विहितः सङ्क्रमः । लोकत्वाऽइन्द्र भत्यत्र न भवति । उक्तञ्च । पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः ॥ अलोपइति ~~यास्क~~स्य कात्यायनार्थवशादिति ॥ अत्र सम्प्रदायानुसारेण निर्णयः ॥ इति पदलक्षणम् ॥ अथ क्रमलक्षणम् । क्रमः स्मृतिप्रयोजनः ॥ ३१० ॥ संहितायाः पदानां च स्मृतिः स्मरणं प्रयोजनमस्य सः । संहिताया अवसाननिर्णयस्येत्यादि । एवं प्रयोजनमुक्त्वा तल्लक्षणमाह । क्रमइत्यधिकारः । अध्यायपरिसमाप्तेः ॥ द्वे पदे सन्दधात्युत्तरेणोत्तरमावसानादृक्क्रमं वर्जम् ॥ ३११ ॥ एतदुत्तरमवसानपर्यन्तं द्वे द्वे पदे संहितया उच्चारयति स क्रमः स्यात् । इषे त्वा । त्वोर्जे । एवं पाहीति पर्यन्तं यत्र सङ्क्रमस्तत्र गलत्पदानि त्यक्त्वाऽग्रिमैः पदैः सन्धानं कर्त्तव्यम् । सङ्क्रमे सन्धिशास्त्रस्याचार्येणाभिहितत्वात् । युनज्मि सः । सकस्मै ॥ सङ्क्रमे च वैष्णवात् ॥ ३१२ ॥

वैष्णवानयं नकारः स्वरे परे न यकारमापद्यते सङ्क्रमे चेत् । रक्षोहणो व इति यजुषि वैष्णवानव । अत्र नयामि । अत्र चाकारोपधत्वात् यकारः प्राप्तः ॥ सङ्क्रमे च सर्वत्र ॥ २१३ ॥ यजुःषु ऋक्षु च ए-दोद्भ्यां परोऽकारः पूर्वमापद्यते । प्राणश्च सङ्कृति यजुषि प्राणोऽपानः । यद्ग्रामे इति मन्त्रे शूद्रेऽर्य्ये । कन्याऽइवेति ऋचि यज्ञोऽसि इत्यादि भवति । अ-क्रमे किम् । उद्गुत्वा । ऊर्जमावद । अत्र पदद्वये न विरामः । एतद्विषयक्रमलक्षणमाह ॥ अष्टा-क्षराणि त्रीणि स त्रिक्रमः ॥ २१४ ॥ पूर्वस्मात्पदादष्टकं मध्ये उच्चार्य्य तदुत्तरे विरामः । एवं त्रीणि संहितया उच्चारयति स त्रिक्रमः स्यात् । उद्गुत्यम् । सोमेनातनच्मि ॥ पुनराकारेणोत्तरम् ॥ २१५ ॥ एवं त्रीणि पदान्युच्चार्य पुनराकारेण सहितं तृतीयपदमुच्चारणीयं स्यात् । ऊर्जमावद । आवद । वद त्वया ॥ मोषूणाभीषुणौ च ॥ २१६ ॥ मो षूणः । अभीषुणः । इमौ च त्रिक्रमौ स्याताम् ॥ चत्वार्य्यष्टपूर्वे नकारपरे सौ ॥ २१७ ॥ अष्टपूर्वे नकारपरे सुइतिपदे सति चत्वारि संहितया उच्चारयितव्यानि स चतुष्क्रम इति शेषः । ऊर्द्ध्वऽऊषुणः । एतावद्वा-सऽऊषुणः । गोमदूषुणासत्या ॥ पुनः सुपदेनोत्तर-

म् ॥ ३१८ ॥ एवं त्रीणि वा चत्वारि पदानि उच्चार्य पुनः सुपदेनाऽस्य सुच्चारणीयं स्यात् । अभीषुणः । सुनः । नः । सखीनाम् ॥ पूर्व्वस्योत्तरसंहितस्य स्थितोपस्थितमवगृह्यस्य ॥ ३१९ ॥ उत्तरेण संहितस्यावग्रहवतः पूर्वपदस्य स्थितोपस्थितं कर्त्तव्यम् । त्वा समिद्भिः । समिद्भिरङ्गिरः । इति पूर्वमुच्चार्य । समिद्भिरिति समित् । भिः । इति पठनीयं पूर्वस्योत्तरसंहितस्येत्य "वसाने चेति" यावदनुवर्त्तते ॥ [illegible]:पदद्दीर्घीभावे ॥ मामहस्रामादितिः । ममहस्रामिति ममहस्राम् । आयुर्निगन्धः । आयुर्निगित्ययुनक् ॥ विनामे ॥ ३२० ॥ सुषाव । सोमम् । सुसावेति सुसाव ॥ प्रगृह्ये ॥ ३२१ ॥ इन्द्रवायूऽइमे । इन्द्रवायूऽइतीन्द्र । वायू । त्रिधातवेति । त्रिधातोऽइति । उदुत्यम् । उँऽइत्यूँ । ओषधः । ओऽइति ओ । सुनः । ऊर्ध्वऽऊषुणः । ऊँऽइत्यूँ । सुनः ॥ रिफिते ऽनिवृत्ते ॥ ३२२ ॥ आवरुणे । अन्तरित्यन्तः । प्रातः सोमम् । प्रातरिति प्रातः ॥ अनुनासिके च ॥ ३२३ ॥ अर्द्धचार्द्धेः समाप्तौ विद्यमानस्य स्थितोपस्थितं स्यात् । पशून्पाहि । पाहीति पाहि । ऋक्स्य ऽ० रक्ष । रक्षेति रक्ष ॥ भुवनमाविवेशा ३ । आविवेशा ३ ॥ आविवेशा ३इति विवेशा ३ । अत्र 'प्लुतस्मिता'विति प्रकृतिभावः ॥ यथा समाम्नातक्रमावसान-

ठं० सङ्क्रमेषु ॥ ३२४ ॥ सङ्क्रमेषु पूर्वोक्तेषु यथासमाम्नातं क्रमपाठानुसारेणावसानं स्यात्। विभ्भ्वधाः प-रमेण। कार्षीच्छतधारम्। अत्र नावसानम्। ध्रुवेण धर्म्मणा। धर्म्मणेति धर्म्मणा। स्पशौर २ ॥ऽअनु। अन्विन्व-त्यनु। अत्रावसानं भवति। सङ्क्रमेष्वित्युपलक्षण-म्। अन्यत्रापि यथासमाम्नातमेव। अधुक्षः सा, सा॰अ-भ्याः। विभ्भ्वधायाऽइन्द्रस्य। अत्र नावसानम्। ह-व्यथं० रक्ष। रक्षेति रक्ष। यच्छन्ताम्पञ्च। पञ्चेति पञ्च। अत्रावसानम्। असन्देहार्थं प्रसङ्गात्क्रमसन्धा-नानि प्रदर्श्यन्ते। विभ्भ्वधाः परमेण। कार्षीच्छ-तधारम्। सहस्रधारन्देवः। अधुक्षः सा। विभ्भ्वधा-याऽइन्द्रस्य। राद्धतामिदम्। एमिकाः। तस्मै कर्म्म-णे। वायत्युष्टम्। सरातयऽउव। एमि घूः। धू-र्व्वीमो देवानाम्। देवहूतमसहुतम्। हविर्द्धानं-व्विष्णुः। हस्ताभ्यामग्नये। गृह्णामि भूताय। र-श्मिभिर्हीवोः। देवयुवंय्युष्माः। स्याग्नये। अग्नी-षोमाभ्यान्दैव्याय। व्वेत्त्वह्निः। व्वेत्त्वग्निः। प्रासी-दव्व हविष्कृत्। इहि कुक्कुटः। व्वह दृष्टवम्। वधायाग्ने। अन्तरिक्षन्धर्त्वम्। दिवंव्विभ्भ्वाभ्यः। व्वेत्तु धा-न्यम्। व्यानाय दीर्घाम्। रसेन देवतीः। पृ-च्यन्ताञ्जनयत्यै। व्वधः पृथिवि। मौगप। व्वद्या-

समरटी । स्कन्नगायत्रेण । जागतेन सुब्भा । मा-
ऽऽइर्म्यं निधिता । माऽऽइर्म्यं दिश्यै । पश्चश्याऽऽत्म्यग्ने: । य-
जुषे यजुषे सवितु: । त्वा तेजः ॥ ४२ ॥ इति द्विचत्वा-
रिंशत्क्रमसन्धानानि प्रथमाध्याये ॥ १ ॥ पतये गन्ध-
र्व्वः । ईडित ऽइन्द्रस्य । दक्षिणो मित्रावरुणौ । अ-
भिशस्त्यै सवितु: । ध्रुवा ध्रुवा । माऽऽइर्मे नमः । स-
चन्तामस्माकम् । यपन्नामध्येतम् । ब्रह्मणा तेन । ज-
ह्वाऽभ्यग्नीषोमौ । जहामीन्द्राऽग्न्योरिन्द्राग्नी । इ-
न्द्राग्नी व्वसुभ्यः । अवतांऽव्यन्तु । मरुद्भिरिन्द्रः ।
तस्मै पोषाय । व्वर्त्तेऽग्ने । हिमाऽअचारिषम् । व्वे-
दिषदो ये ॥ १९ ॥ इत्येकोनविंशतिर्द्वितीयाध्या-
ये ॥ २ ॥ उषसा सूर्य्यः । गृहपते पुरीष्य: । पति-
वेदनमितः ॥ ३ ॥ इतित्रीणि तृतीये ॥ ३ ॥ चतुर्थे क्र-
मसन्धानाभावः ॥ ४ ॥ पुरूरवा मन्थामि । रतःश-
या हविषया । देववीतये सिंहं हि । ध्रुवो व्वैष्णव-
म् । ध्रुवऽऐन्द्रम् । हव्यवाहन: स्वात्त: ॥ अभूद्य-
थायथम् ॥ इतिसप्त पञ्चमे ॥ ५ ॥ षष्ठे न सन्ति ॥ मादय-
स्वोदानाय । भूर्म्महेन्द्राय । इति द्वे सप्तमे । ७ ।
अष्टमे क्रमसन्धानाभावः ॥ इन्द्रस्य सत्यप्रसवः । इन्द्रं
व्वाजजितः । इति द्वे नवमे ॥ ९ ॥ दशमे क्रमसन्धा-
नाभावः ॥ १० ॥ जागतेन हस्ते । हिरण्ययीमानुष्टु

भेन । इति द्वे एकादशे ॥ ११ ॥ परिचित्स्लोकम् । १ । इत्येकं द्वादशे ॥ १२ ॥ द्विशामि सहस्रम् । गयस्फानः अयुम् । उग्रमजः । प्रसमन्त्वम् । इति चत्वारि त्रयोदशे ॥ अन्तरिक्षँव्वायुः ॥ वायूराज्ञी । वृहती नभः । इति त्रीणि चतुर्द्दशे ॥ १४ ॥ अग्निर्देवः । रथेखित्रो मेनका । असमरथः प्रम्लोचन्ती । अरिष्टनेमिर्व्विश्वाची । सुषेणाऽउर्व्वशी । शैशिरौ परमेष्ठी । दिवः सूर्य्यः । दिवञ्ध्रुवे । इत्यष्टौ पञ्चदशे । १५ । षोडशसप्तदशयोर्न्न सन्ति ॥ १६ । १७ स्वतोसः । रथन्तरँव्वैट् । १८ । इति द्वे अष्टादशे । १९ । एकोनविंशतिमेऽभावः । २० । व्वायुज्जीग्रत् । स्वाणे सूर्य्यः । शूद्रेऽर्य्ये । आपोऽयत्त्वि । इति चत्वारि विंशतिमे । २१ । एकविंशतिमेऽभावः ॥ २१ ॥ प्राणाय सूक्ते । इति द्वे द्वाविंशे । २२ । चतुष्पात्पदप्रसन्द्रमाः । चन्द्रमा राज्ञो । व्वायुः सूर्य्यः । इति त्रीणि त्रयोविंशे । २३ । चतुर्व्विंशतिपञ्चविंशतिषड्विंशतिसप्तविंशत्यध्यायेषु क्रमसन्धानाभावः । २४ । २५ । २६ । २७ ॥ शुचिसुर्म्याहा । देवौ निष्टुभा । इति द्वे अष्टाविंशे । २८ ॥ ऊनत्रिंशत्त्रिंशदेकत्रिंशद्द्वात्रिंशत्त्रयस्त्रिंशच्चतुस्त्रिंशत्पञ्चत्रिंशत्स्वध्यायेषु क्रमसन्धानाभावः । २९ । ३० ।

। ३१ । ३२ । ३३ । ३४ । ३५ ॥ ऊतिभिः कया ।
ईचामहे । इति द्वे षट्त्रिंशे । ३६ । पाहि म-
धु । स्वाहा रात्रिः । इति द्वे सप्तत्रिंशे ॥ ३७ । सर-
स्वत्यसौ । इत्येकमष्टत्रिंशे । ३८ । एकोनचत्वारिंशे
क्रमसन्धानाभावः । ३९ । अविद्वाँश्चिद्वाया-
म् । ओम् ३ क्रतो । स्मर क्लिबे । क्लिबे कृतम् ॥ ४० ॥
इति चत्वारि चत्वारिंशे । ४० । इति पञ्चदशा-
धिकैकशतं क्रमसन्धानानि । ११५ । एभ्योऽन्यत्र
संहितावसानानुसारेण पाराशरीयचरणानुसारेण
च निर्णयः कर्त्तव्यः । इति क्रमसन्धानानि समाप्ता-
नि ॥ अथोष्मऋकारोपरितनरेफोच्चारणविषयो व्या-
ख्यायते । उक्तं च प्रतिज्ञासूत्रे । अथापरान्तस्थस्या-
युक्तान्यहलः संयुक्तोष्मऋकारैरेकारसहितोच्चारणमे-
वं तृतीयान्तस्थस्य क्वचित् । अस्यार्थः । अपरान्त-
स्थस्य रेफस्य अन्यहला असंयुक्तस्य ऊष्मभिर्ऋकारेण
संयुक्तस्य एकारसहितं रे इत्युच्चारणं कर्त्तव्यमिति शे-
षः । उदाहरणम् । दर्शतमित्यत्र दरेशतमित्ययं पाठो
न रेफसहितः । एवमन्यत्र । व्वर्षो व्वर्षीयसि । वर्हिः ।
निर्ऋते । सकारोदाहरणे षकारोदाहरणमेव भव-
ति । अयुक्तान्यहल इति किम् । व्वर्ष्याय । १ अत्र
माभूत् । संयुक्तस्येति किम् । ऊर्ज्जंत्वा । एवं संयुक्ता-

संयुक्तस्थले तृतीयान्तस्थस्य जकारस्य क्वचिल्लक्ष्यानुरोधेन पूर्वोक्तमेकारसहितोच्चारणं कर्त्तव्यम् । क्वचिदित्युदाहरणानि लक्ष्यपरमितिज्योत्स्नाकारः । यथा शतवल्शाइत्यत्र वल्शाद्युदाहारः । सहस्रवल्शाः । उपवल्हामसि । अत्रास्मिन्सूत्रे ऊष्मऋकारोपरितनरेफस्य प्राक् एकारसहितोच्चारणं कर्त्तव्यमित्युक्तम् । तथा च प्रातिशाख्यसूत्रभाष्ये अनन्तयाज्ञिकैर्माध्यंदिनशिक्षाया वचनं गृहीतम् ॥ तदेवाह । शषसहा यत्र दृश्यन्ते रेफेणाक्रान्तमस्तकाः ॥ स्वरभक्तिं प्रयुञ्जीत सँय्योगे नैव कारयेत् । १ । अत्रोष्मणामेव ग्रहणं न ऋकारग्रहणम् । तथा च प्रातिशाख्ये । रलावृलृवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र । अस्यार्थः । रेफलकारौ ऋलृवर्णाभ्यां ऋलृसदृशश्रुतिभ्यां यथासंख्यं व्यवधीयेते । ऊष्मणि परभूते स्वरोदये स्वरपरे इत्यर्थः । सर्वत्र संहितायां पदे च । गार्हपत्यः । अत्र हकाररेफयोरन्तरापि स्वरभक्तिः सती रेफहकारयोः सँय्योगं न विहन्ति । एवमन्यत्रापि द्रष्टव्यम् । शतवल्शः । वल्हामसि । स्वरोदयइति किम् । ऋदँर्व्वर्षैः । पार्श्वतः । दिवो वर्षान् । अभ्रुभिर्हादुनीः । अत्रापि ऋकारान्तग्रहणं नास्ति । केवलोष्मणामेव ग्रहणम् । तथा च नवाङ्कसूत्रे । अह-

एअल्युर्ध्वरेफस्य सैकारः प्राक्च । अस्यार्थः । पदाद्य-न्तमध्ये हलिवहीनस्य अलि ऊर्ध्वरेफस्य सैकारः प्रागु-च्चारः स्याच्छन्दसि । अल्इति अपसञ्ज्ञा ज्ञेयाः । द-र्शतमिति नतु सोर्ध्वरेफोच्चारः । व्हार्षीत । षकार-स्योदाहरणमेव सकारस्य कथं इणकवर्गाभ्यां परस्य सस्य मूर्द्धन्यइति कृत्वा रेफस्त्विणमध्ये वर्त्तते तर्हि रेफात्परो यः सकारः स मूर्द्धन्य इति कृत्वोभयोरेकमे-वोदाहरणम् । बर्हिषे त्वा । अतवल्शोत्यत्र वल्शेत्यु-च्चारः । एवमन्यत्रापि । ऋऌवर्णयोर्मिथः सावर्ण्या-दृकारस्यापि प्राक्सैकारोच्चारः । न तु संयुक्तोच्चारः । अहलिति किम् । यज्ञपतिव्हार्षीत् । अलीति किम् । ऊर्ज्जे त्वा । अत्रापि ऋकारग्रहणाभावः । एतदर्थे के-शवीशिक्षायाम् । विहलअल्युर्ध्वरेफो यः सैकारः प्रा-क्समुच्चरेत् । अत्रापि ऊष्मणामेव ग्रहणमस्ति । त-था च लघुमाध्यन्दिनीयशिक्षायाम् । रेफो रेकारमा-प्नोति शषहेषु परेषु च ॥ ददर्श वर्षौ अर्हीच्च सँय्योगं नैरकारयेत् । १ । वर्ष्यन्वर्ष्यीयान्तर्हि दा चाद्यं प्रत्युदा-हृतिः । लकारोऽपि च सावर्ण्यादेकारसहितो भवे-त् । २ । अतवल्शा वल्हामसि तत्र तावदुदाहृतिः । अत्रापि ऋकारग्रहणं नास्ति । तथा च याज्ञवल्क्य-

याः ॥ स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते । ३ । स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत् । इकारं चाप्युकारं च ग्रस्तदोषं तथैव च । ४ । उभयोर्मध्ये हि एकारः सैव स्वरभक्तिः । अत्रापि ऋकारग्रहणाभावः । अमरीशिक्षाऽप्येतदर्थे । रकारोऽथ लकारो वा यत्रोष्मणि स्वरोदये ॥ स्वरभक्तिर्भवेत्तत्र पूर्वमाक्रम्य पठ्यते ॥ ५ ॥ ऊष्मणां स्वरभक्तिस्तु द्विर्भावं बाधते यथा । वर्षीं वर्षीयसि बर्हार्षीच्छतवल्शोऽपि सिध्यति । ६ । ऊष्मणामुपरिष्टस्तु रेफो याति रेवर्णताम् । रेफत्वं पुनरायाति यद्यूष्माणोऽन्यसँय्युताः । ७ । अत्रापि ऋकारग्रहणाभावः । अत्र सिद्धान्तः । रेकारोच्चारणे भगवता कात्यायनेन प्रातिशाख्यसूत्रे ऊष्मणामेव ग्रहणं कृतम् । तथा च याज्ञवल्क्यमाध्यन्दिनादयः शिक्षाकर्त्तार ऊष्मणामेव ग्रहणं कुर्वन्ति । एकस्मिन्नेव प्रतिज्ञासूत्रे ऋकारोष्मणां ग्रहणमस्ति। अतो वैदिका विकल्प इत्याहुः । तथा च कात्यायनेन प्रातिशाख्यसूत्रेऽप्याहृतं याज्ञवल्क्यमाध्यन्दिनादिभिः शिक्षासु च गृहीतं अनादिसम्प्रदायागतं यन्मतं तत्सर्वैर्वैदिकैर्ग्राह्यमिति स्पष्टं प्रतिभातीत्यलमतिप्रसङ्गेन । अत्र ऋकारोच्चारणे विशेषः । तथा च प्रतिज्ञासूत्रे"ऋकारस्य तु सँय्युक्तासँय्युक्तस्याविशेषेण

सर्व्वत्रैवम्" । अस्यार्थः । पदान्तमध्येषु सँय्युक्तासँयुक्तस्य ऋवर्णस्य रेकारः स्यात् । सर्वत्र संहितायां पदे च । यथा कृष्णोऽसीत्यत्र क्रेष्णोसीत्युच्चारः । ऋत्विजो यतः । अत्र रेत्विय इत्युच्चारः । एवं "ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यमिति" वार्त्तिकेन ऌकारस्यापि ले इत्युच्चारः । कॢप्तमित्यत्र क्लेप्तमित्युच्चारः । एतदर्थं केशवीशिक्षा । ऋकारऌलियुग्युक्च रेकारश्छन्दसि स्मृतः । इति ऋकारोच्चारणे विशेषः ॥ अथ जकारोच्चारणविषयः । तथा च प्रतिज्ञासूत्रे । "अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहल संय्युक्तासँय्युक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण च विशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणं द्विर्भावेऽप्येवम्" ॥ अस्यार्थः । अन्तस्थानामाद्यस्य यकारस्य पदादौ विद्यमानस्य अन्यहला अन्यव्यञ्जनेन असंयुक्तस्योच्चारणे जकारोच्चारणं स्यात् । रेफऊष्मणामन्त्यो हकारस्तु आभ्यां युक्तस्यापि अविशेषेणादिमध्यावसानेषु पदस्य जकारोच्चारणं स्यात् । ऋकारेण युक्तस्य अविशेषेण अन्यहला सँयुक्तस्य असंय्युक्तस्य वा आदिमध्यान्तेषु जकारोच्चारणम् । क्रमेणोदाहरणानि । यन्ते । युञ्जते । घृताचीर्य्यन्तु हर्य्यत । सूर्य्यः । कृणुह्यद्ध्वरम् । प्रवाह्याय । सदोऽस्यृतस्य । व्यृद्धे । पदादि-

स्थस्येति किम् । अयजन्त । अन्यद्धलीत्यादि किम् । अस्मिन्न्यज्ञे । एवं पदादिमध्यान्तेषु यकारद्विर्भावे द्वित्वे सति ज्ञेयम् नृपाय्यम् । भाय्या रूपम् । तँय्यज्ञम् । जराय्ग्वसि । अत्र स्वरात्संय्योगादिरिति द्वित्वम् । तथा च याज्ञवल्क्यः । पादादौ च पदादौ च संय्योगावग्रहेषु च ॥ जः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥ युक्तेन मनसा तद्वत्त्वा यामि तथा परम् ॥ अनूकाशेन बाह्यश्च योगे योगे निदर्शनम् ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥ ईषत्स्पृष्टो यथा वियत्पदच्छेदात्परं भवेत् ॥ तथा च कात्यायनशिक्षायाम् । आद्यान्तस्थस्य जोच्चारः पदादौ पठितस्य च ॥ उपसर्गपरो यस्तु तस्य छन्दसि नेष्यते ॥ पदस्याद्यन्तमध्ये स्याद्वर्णैः संय्युतस्य च ॥ द्विर्भावेऽप्येवमेव स्यादिति कात्यायनश्रुतिः ॥ उपसर्गात्परस्य न जकारोच्चारणम् । यथा अभियज्ञम् । द्विर्भावेऽयन्निषेधो न । संय्योमि । अतएव नवाङ्कसूत्रे केशवेन सम्पूर्वयोस्त्वयुक्तम् । यज्ञञ्च मानुषाणां तथा च योजान्निन्द्र, इत्यत्र पादादिस्थत्वात् । उपसर्गात्परत्वेऽपि जकारोच्चारः । उप यज्ञ ँ हविरित्यत्र पादादिस्थत्वाभावाद्यकारत्वमेव । पदादित्वेन सिद्धे पादादौ पुनर्जकारोच्चारणविधानम् । पादादौ च पदादौ चेति याज्ञवल्क्योक्तेः ॥ अतो

ज्योत्स्नाकृता स्तुतीरूप इ॒ज्यमेव गृहीतम् । अतएवामरेशीशिक्षायाम् । अनुयोजान्विवन्द ते तु उपयुज्यं विना तथा ॥ अथो पूर्वकस्य न । उक्तं च । अथ मासनशब्देभ्यो विभाषाऽऽम्रेडिते यवौ । यथा । अथो ये । मा यज्ञम् । स योजते । मनो न येषु अत्र यकारोच्चारणे विकल्पः ॥ विकल्पविषये सम्प्रदाय एव शरणम् । इति यकारोच्चारणविषयः । अथ वकारोच्चारणविषयः । तथा च प्रतिज्ञासूत्रे । अथान्त्यस्थान्तस्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणम् । अन्तस्थानामन्त्यस्य वकारस्य अपदादौ मध्ये अन्ते च विद्यमानस्य यथाक्रमं गुरुमध्यमलघुवृत्त्या चोच्चारणम् । यथा । व्वायवः । व्वायव्यतस्पते । तथा च याज्ञवल्क्यः । वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः ॥ आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूतरः ॥ सन्धिजौ तु पदान्तीयावुपसर्गपरौ लघु ॥ अथ मासनशब्देभ्यो विभाषाऽऽम्रेडिते यवौ । ये ये पदादिस्थयकारविषये निषेधास्ते वकारेऽपि ॥ अथा वयम् । तथा च माध्यन्दिनशिक्षायाम् । गुरुर्वकारो विज्ञेयः पदादौ पठितो भवेत् । द्विरभ्यासुदाहृतिर्ज्ञेया सविताऽन्त्ये लघुस्स्मृतः । पदान्ते वै लघुतरस्तव व्वायव्यतस्पते । उपसर्गपरो यस्तु स वकारो

लघुर्मतः । वो वां वा वै मन्त्रपाठे लघवो गुरवः पदे ॥ तथा चामोघनन्दिन्यमरेश्वरशिक्षयोः । त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ ॥ आदेशाश्च विकल्पार्था ईषत्स्पृष्टा इति स्मृताः । देवो वः सविता यां वाँ व्वातो वेति तथा न वै ॥ अत्रापि सम्पूर्वकस्य वकारस्य द्वित्वमेव । यथा सँव्वास् ॥ इति वकारोच्चारणविषयः ॥ अथ षकारोच्चारणविषयः । तथा च प्रतिज्ञासूत्रे । अथो मूर्द्धन्योष्मणोऽसँय्युतस्य टुक्ते सँय्युक्तस्य च खकारोच्चारणम् । अथान्तस्थकथनानन्तरं मूर्द्धस्थानस्योष्मणः षकारस्य असँय्युक्तस्य टवर्गं विना अन्यहला संयुक्तस्य च खकारोच्चारणम् । इषे त्वा । व्विभर्ष्यद्भुतवे । शुष्क्याय । टुक्ते किम् । प्रत्युष्टम् । श्रेष्ठतमाय । कृष्णः । क्षकारे षकारवत् । अवयवसम्भावनेऽपि मातृकादौ गणनात् । एकवर्णत्वात् । अवयविभागाभावेन खकारोच्चारणम्भवति । ककारयोगे खकारोच्चारणाभावइति नियमस्तु न शुष्क्कमित्यादौ विपरीतसँय्योगे ककारयोगेऽपि खकारोच्चारणं भवति । तथा च कात्यायनशिक्षायाम् । असँय्युतस्य मूर्द्धन्योष्मणः खोच्चारणम्मतम् ॥ टुक्ते सँय्युक्तस्यापि कस्य योगे ष एव हि ॥ छन्दसीत्येव खोच्चारो लोके प्रकृतिरिष्यते ॥ इति षकारोच्चारणविषयः । इमे सर्वे

नियमो ब्रह्मयज्ञादौ अर्थविचारे तु प्रकृत्या ये वर्णा-स्त एव नत्वर्थभेदः ॥ परसवर्णोपत्प्रकृत्या चान्यत्र । शषसहेभ्योऽन्यत्र तु मकारस्य परपञ्चमविधानात्स्य-ष्टमनुस्वारत्वे प्राप्ते परस्य वर्णस्य सवर्णो यः पञ्चम-स्तस्येषत्साहश्येनोच्चारणं स्यात् । तज्ञानम् । इत्यादौ वाजाञ्जयतु इत्यादिवत् अकारादेर्न स्पष्टमुच्चारणम् । विसर्गेष्वीषद्विरामः ॥ विसर्गेषु नान्तरीयकार्द्धमात्रा-कालापेक्षया किञ्चिदधिककालो विरामः । अवसानं कृत्वाऽग्रिमवर्णोच्चारणं कार्यम् । व्वसोः पवित्रम् । याः फलिनीः ॥ पदाद्यस्य सँय्युक्ताकारस्येषद्दीर्घता च भवति ॥ परस्यादिभूतस्य हल्सँय्युक्तस्य अकारस्य ह्रस्वस्येषद्दीर्घता च एकमात्राकालापेक्षया किञ्चि-दधिककालोच्चारणं स्यात् । व्वसोः पवित्रम् । पदा-दिस्थस्येति किम् । व्वायवः । हल्संयुक्तस्य किम् । अनुनः । अकारस्येति किम् । ध्रुवाः ॥ अथ जटा-द्यष्टविकृतीनां लक्षणान्युच्यन्ते । तत्र विकृतीनां पा-ठे फलं पङ्क्तिपावनत्वम् । जटादिविकृतीनां ये पा-रायणपरायणा ॥ महात्मानो द्विजश्रेष्ठास्ते ज्ञेयाः प-ङ्क्तिपावना इत्यादित्यपुराणात् । अन्यान्यपि वि-ष्णुलोकानि फलानि वाराहपुराणपाराशरस्मृत्यादि-षु । तासान्नामानि प्रदर्श्यन्ते । जटा माला शिखा रे-

खा ध्वजो दण्डो रथो घनः ॥ अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः । तत्र प्रथमत्वाज्जटालक्षणम् । क्रमं यथोक्तं प्रब्रूयाद्व्युत्क्रमेण क्रमेण च ॥ सलक्षणं सर्वसन्धौ जटा सा प्रोच्यते बुधैः ॥ अस्यार्थः । क्रमं यथोक्तं द्वित्रिचतुष्क्रमात्मकं पुनश्च तमेव वैपरीत्येन पुनश्च क्रमेण एवं त्रिवारं सर्वसन्धिषु लक्षणयुक्तं पठेत्सा जटा इति तत्त्वज्ञैरुच्यते । व्वायवस्थ स्थ व्वायवो व्वायवस्थ । इत्यादि । अथ जटायां पठ्यमानाङ्क्रमान्नामतो निर्दिशति । अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा ॥ सङ्क्रमश्चेति पञ्चैते जटायां कथिताः क्रमाः ॥ व्वायवस्थ । इत्यनुक्रमः । स्थस्थ । इत्युत्क्रमः । स्थव्वायवः । इतिव्युत्क्रमः । व्वायवो व्वायवः । इत्यभिक्रमः । इमे पञ्चक्रमा एव पृथक्पृथक् पठनेन पञ्चसन्धिरिति वैदिकैः पठ्यते ॥ स्वापूर्वाणां पदद्वन्द्वं स्वागर्भे त्रिचतुष्क्रमे ॥ पुनरुक्तमसन्देहार्थं जटात्वं न चार्हति ॥ सुआ इति पदद्वयगर्भे त्रिक्रमे सोमपूणः सोमेनानञ्चिम इत्यादौ तथा चतुष्क्रमे गोमदूषुणा सत्या इत्यादौ सुआ पूर्वाणां पदद्वयं असन्देहार्थं द्विपदत्वभ्रमवारणाय सुनः आतनञ्चिम । इति पुनरुच्चारितं जटाभावं नार्हति । असन्देहार्थमिति हेतुगर्भं विशेषणम् । यथा उदुत्यमित्यादौ द्विपदत्वभ्रमवार-

णाय ओँइत्यूँ । इति मध्यस्थस्य वेष्टनम् । तथा इदं न तु क्रमः । अतो जटा न कार्या ॥ अथ माला सा द्विविधा पुष्पमाला क्रममाला च । पुष्पमाला लक्षणमाह । मालामालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ॥ आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः ॥ सुसमिद्धाय शोचिषे । शोचिषे सुसमिद्धाय । इत्यादि । अथ क्रममाला । नूयात्क्रमविपर्यासावर्द्धर्चस्यादितोऽन्ततः ॥ अन्तं चादिं नयेदेवं क्रममालेति गीयते ॥ अर्द्धर्चस्यादितः क्रमं अंततो विपर्यासं क्रमेण पठेत् । अनेन प्रकारेण क्रममन्तं नयेत् । विपर्यासमादिं प्रापयेत्सा क्रममालेति ऋषिभिरुच्यते । त्रिꣳशद्धाम । धीयतऽइति धीयते । धाम व्वि । धीयते पतङ्गाय । व्विराजति । पतङ्गाय व्वाक् । राजति व्वाक् । व्वाग्राजति । व्वाक्पतङ्गाय । राजति व्वि । पतङ्गाय धीयते । व्विधाम । धीयतऽइति धीयते । धाम त्रिꣳशत् । इत्यादि । अथ शिखा । पदोत्तरां जटामेव शिखामार्याः प्रचक्षते ॥ पूर्वोक्तां जटामेव अन्ते एकपदाधिकां शिखां विकृतिं मुनय आहुः । अन्तश्चरति चरत्यन्तरन्तश्चरति रोचना । इत्यादि ॥ अथ रेखा । क्रमाद्द्वित्रिचतुष्पञ्चपदक्रममुदाहरेत् ॥ पृथक्पृथग्विपर्यस्य रेखामाहुः पुनः क्रमात् ॥ क्रमेण द्विपदत्रिपद-

चतुष्पदपञ्चपदक्रमानुक्का प्रतिक्रमे पृथक्पृथक्विपर्यासेन पठित्वा पुनः क्रमं पठेत्तां विकृतिं रेखामाहुः । व्विद्वन्नाते । तेव्विद्म । व्विद्वन्नाते । तेऽअग्ने त्रेधा । त्रेधाग्ने ते । तेऽअग्ने । अग्ने त्रेधा । त्रेधा त्रयाणि व्विद्म ते । ते व्विद्म त्रेधा त्रयाणि । त्रयाणि व्विद्म । व्विद्मते । ते धाम व्विभृता पुरुत्रा । पुरुत्रा व्विभृता धाम ते । ते धाम । धाम व्विभृता । व्विभृता पुरुत्रा । व्विभृतेति वि । भृता । पुरुत्रेति पुरु । त्रा । व्विद्मते । ते व्विद्म । व्विद्मते । ते नाम परम् । परमन्नाम ते । ते नाम । नाम परमम् । परमङ्गुहा यद्विद्म । व्विद्म यद्गुहा परमम् । परमङ्गुहा । गुहा यत् । यद्विद्म । व्विद्मा तमुत्सँ्यतऽआजगन्थ । आजगन्थ यतऽउत्सन्तं व्विद्म । व्विद्मातम् । तमुत्सम् । उत्सँ्यतः । यतऽआजगन्थ आजगन्थेत्या । जगन्थ ॥ अथ ध्वजः । ब्रूयादादेः क्रमं सम्यगन्तादुच्चारयेदिति ॥ वर्गे वा ऋचि वा यस्य पठनं स ध्वजः स्मृतः ॥ वर्गे ऋचि वा आदेः क्रमं अन्तपर्यन्तं ब्रूयात् । अन्तात्सम्यग्यथोक्तं क्रममेवोच्चारयेत् । आदिपर्यन्तं पठेत् एवं यस्य पठनं स ध्वजनामा विकृतिः । व्विष्णोः कर्माणि । सखेति सखा । कर्माणि पश्यत । युज्यः सखा । पश्यत यतः । इन्द्र-

स्य युज्य. । य॒तो व्र॒तानि । पस्पशऽइति पस्पशे । व्रतानि पस्पशे । व्रतानि पस्पशे । पस्पशऽइ-ति पस्पशे । य॒तो व्रतानि । इन्द्रस्य युज्यः । पश्यत यतः । युज्यः सखा । कर्म्माणि पश्यत । सखेति सखा । विष्णोः कर्म्माणि ॥ अथ दण्डः । क्रममुक्त्वा विपर्य्यस्य पुनश्च क्रममुत्तरम् ॥ अर्द्धर्च्ची-देवमुक्तोऽयं क्रमदण्डोऽभिधीयते ॥ क्रममुक्त्वा अर्द्ध-र्चात् । अर्द्धर्चादिपर्यन्तं पुनः पुनर्विपर्यस्य पुनः क्रमं अर्द्धर्च्चसमाप्तिपर्य्यन्तं पठेत् एवमुक्तो विकृति-विशेषो दण्ड इत्युच्यते॥ य॒ज्ञानः । नो यज । यज्ञा-नः । नो मित्रावरुणा । मित्रावरुणा नो यज । यज्ञा-नः । नो मित्रा वरुणा । मित्रावरुणा नो यज । य॒ज्ञा-नः । नो मित्रावरुणा । मित्रावरुणा यज । यज । मित्रावरुणा नो यज । य॒ज्ञानः । नो मित्रावरुणा यज । यज्ञा देवान् । अनेन प्रकारेण अर्द्धर्चसमाप्ति-पर्य्यन्तं पठेत् ॥ अथ रथः ॥ समे ऋचौ गृहीत्वा च रथवच्चलति क्रमः ॥ पादशोऽर्द्धर्च्चशो वाऽपि सहोत्तया दण्डवद्रथः ॥ ऋचि अर्द्धर्चि पादे वा क्रम-विपर्यासौ दण्डवत्सहोक्तौ चेत्स विकृतिविशेषो रथ इ-त्युच्यते। धानानाᳪ रूपम्। सक्तूनाᳪ रूपम्। रूपन्धाना-नाम। रूपᳪ सक्तूनाम धानानाᳪ रूपम सक्तू ᳪ-

रूपम् । रूपङ्कुवलम् । रूपम्बदरम् । कुवलꣳ रूपन्धानानाम् । बदरꣳ रूपꣳ सक्तूनाम् । धानानाꣳ रूपम् । सक्तूनाꣳ रूपम् । रूपं कुवलम् । रूपम्बदरम् । कुवलम्परीवापस्य । बदरमुपवाकाः । परिवापस्य कुवलꣳ सक्तूनाम् । धानाꣳ रूपम् । सक्तूनाꣳ रूपम् । रूपङ्कुवलम् । रूपम्बदरम् । कुवलं परीवापस्य । बदरमुपवाकाः करम्भस्य । गोधूमाः परिवापस्य कुवलꣳ रूपन्धानानाम् । करम्भस्योपवाका बदरꣳ रूपꣳ सक्तूनाम् । धानानाꣳ रूपम् । सक्तूनाꣳ रूपम् । रूपं कुवलम् रूपम्बदरम् । कुवलं परीवापस्य । बदरमुपवाकाः । परीवापस्य गोधूमाः । उपवाकाः करम्भस्य । परिवापस्येति परि । वापस्य । उपवाकाऽइत्युप । वाकाः । गोधूमाऽइति गोधूमाः । करम्भस्येति करम्भस्य । ज्योत्स्नायां प्रकारत्रयेण रथउक्तः स तत्रैव द्रष्टव्यः । अथ घनः स द्विविधः । अन्तात्क्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् ॥ आदिक्रमन्तयेदन्तं घनमाहुर्मनीषिणः ॥ अतिथिमित्यतिथिम् । बोधयतातिथिम् । घृतैर्बोधयत । दुवस्यत घृतैः । अग्निन्दुवस्यत । समिधाग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यत घृतैः ॥ घृतैर्बोधयत । बोधयता तिथिम् । अतिथिमित्यतिथिम् । इत्यादि ॥ अथ द्वितीयः । शिखासूत्रा

विपर्य्यस्य तत्पदानि पुनः पठेत् ॥ अयं घनइति प्रोक्त इत्यष्टौ विकृतीः पठेत् ॥ शिखां पूर्वोक्तामुच्चार्य्य विपर्यासेन तानि पदान्युच्चार्य पुनः क्रमेण तानि पदान्युच्चारयेत् । अयं घनइत्यृषिभिः प्रोक्तः । दस्रा युवाकवो युवाकवो दस्रा दस्रा युवाकवः सुताः सुता युवाकवो दस्रा दस्रा युवाकवः सुताः । इत्यादि । शेषं ज्योत्स्नादिषु ज्ञेयम् ॥ शाके द्व्यभ्राष्टभूमिते शुभे विक्रमवत्सरे ॥ माघे मासि सिते पक्षे प्रतिपद्भानुवासरे ॥ १ ॥ प्रातिशाख्यप्रदीपाख्या शिक्षेयं रचिता शुभा ॥ गोडशे इत्युपाह्वेन बालकृष्णेन धीमता ॥ २ ॥ श्रीसदाशिवपौत्रेण श्रीप्रभाकरशर्मणा ॥ कृपया मह्यमादत्ता मुद्रायन्त्रे प्रकाशिता ॥ ३ ॥ युगलप्राक्किशोरेण पाठकेनानुजेन च ॥ विश्वेश्वरस्य पुत्रेण श्रीव्यासोपाधिधारिणा ४ ॥ सरयूपारिणा सत्स्वग्वेदविद्यालयस्य च ॥ अध्यापकेन छात्राणां शीघ्रं सम्बोधनायच ॥ ५ ॥ शिक्षासङ्ग्रहमध्ये तु ह्येतस्याः सङ्ग्रहः कृतः ॥ एतदग्रे तु वेदस्य श्रीमाध्यन्दिनशाखिनः ॥ ६ ॥ परिभाषाख्यसूत्रं तु श्रीमद्रामस्य निर्मितम् ॥ तदग्रे सूत्रशेषस्य कारिका सुप्रकाशिका ॥ ७ ॥ अथ वेदपरिभाषासूत्रशिक्षां व्याख्यास्यामः ॥ इषे त्वा १ । अनुवाकः । पदानि । ३५ ॥

शुठिघस्वः । १ । व्सोः पवित्रम् । ३ । ४२ । घाढ्भाचा । २ । अग्ने व्रतपते । ७ । १०६ । अैभातङमीः । ३ । पवित्रे स्थः । २ । ५४ । ङीणङाङी । धर्म्मोऽसि । ३ । ६३ । जीवतिढः । १३ । ध्रुष्टिरसि । २ । ४४ । घीचक्छ । २ । ध्रिषणाऽसि । २ । ६६ । गृधागङिः । ७ । सँव्वपामि । ङगेन चभ्कि । २ । आददे । ५ । १०२ । आभुठुघीः । ७ । अनिशितोऽसि । ३ । ५१ । ङजञ्जि । ७ । ऋचः । ३१ । अनुवाकाः । १० । पदानि । ६१४ ॥ कृष्णोऽसि । ६ । १२४ । ढीवाद्दिप् । १२ । अग्ने व्वाजजित् । ३ । ६५ । चुढाचीपः । १ । मयीदम् । ५ । १०८ भौघाक्ष्मयीः । ५ । अग्नीषोमयोः । ५ । १२२ । ठामाढ्पूः । २ । अग्ने दब्धायो । ४ । ७६ । कोभटाङः । ३ । सँव्वर्चसा । ४ । ८६ । जोवङतुः । ४ अग्नये कव्यवाहनाय । ६ । जोर्ढ्वठङुः । १ । ऋचः । ३३ । पदानि । ६६८ ॥ समिधाग्निम् । ४ । ३६ । गृत्राङक्कि । ३ । भूर्भुवः । ४ । ५० वौङाजिच्चे । अग्निर्ज्योतिः । २ । ३७ । गेमगअः । १ । उपप्रयन्तः । २६ । ३६७ । ले । १४ । सः सुप्रजाः । ३ । ४२ । घाशिणाक्षी । ४ । गृहा मा । ३ । ५३ । ङनीक्षाजा । २ । प्रघासि-

नः ॥ ५ । ७२ । छाभिढाकुः । १ । पृणीं द-
र्वि । २ । ३३ । गिकङ्घः । १ । अच्छन्नसीमद-
न्त । ६ । ६८ । वैधोचिमा । ४ । एषते । ७ । ८६ ।
क्षोमाफशे । ४ । ऋचः । ६२ । अनुवाकाः । १० ।
पदानि । ८ । ५६ ॥ एदम् । २ । चादिक्षाढी । ४ ।
हृन्नस्यासि । ४ । ४५ । घृत्तजघः । ३ । आकूत्यै प्र-
युजे । १२ । ३६ ॥ गूजगिखः । ३ । ऋक्सामयोः
शिल्पे । २ । ४७ ॥ घेटघीगुः । ५ । व्रतं कृणु-
त । ६ । १३६ । ङूत्सुधुघुः । ५ । एषा ते । ५ । ६७ ।
छेथञटि । ४ । वस्व्यसि । ३ । ६३ । चिणाङूक्षाः ।
३ । एष ते । २ । ५५ । ङुनभिभिः । ३ । भुवना-
न्वा । ४ । ८१ । जणुञिठी । २ । अदित्या-
स्त्वा । ८ । १४० । डौभुनार्धं । ६ । ऋचः । २७ ।
अनुवाकाः । १० । पदानि । ७४२ ॥ अग्नं स्तनूः ।
ङीताञञ । २ । आपतये त्वा । ४ । १०८ । ञै-
रिनिदिः । ५ । ताम्रायणी मे । २ । ४८ ॥ ढेडघ-
चे । ४ । इन्द्रघोषस्त्वा । ३ । ४८ । घैपाटक्षृ । ४ ।
युञ्जते मनः । ८ । १५७ । णोभ्रर्दभै । २ । नारि-
रसि । ४ । ७४ । क्षीधिघिदै । ४ । ध्रुवोऽ-
सि । ५ । ८१ । जफाठाडी । ८ । विभूर-
सि । ४ । ७८ । छैक्षिरणाच् । २ । ज्योतिर-

सि । ५ । १०४ । ओवोडाने: । ७ । वक्त्वि- ष्णो । २ । ५४ । डोटिचटा । ऋच: । ४१ । अनु- वाका: । १० । पदानि । ८०६ ॥ अग्रेणीर- सि । ५ । ८८ । औवक्षठ: । ५ । उपावीर- सि । ४ । ८८ । जैमिजाठ । ४ । माह्नि: । ६ । ११२ । टावाग्निनौ: । ३ । सन्ने । ३७१ । छभातटै: । ५ । समुद्रं गच्छ । २ । ५७ । डंनागिटा । ४ । हवि ष्मतीरिमा: । २ । ३५ । गुधीखग: । ३ । हृदे त्वा । ५ । ५० । जौसुटथ् । ६ । रावाऽसि । ८११७ । घेसुणीभै । २ । ऋच: । ३५ । अनुवाका: । ८ । पदानि । ६५८ ॥ वाचस्पतये । ३ । ५८ । डो- हजाडी । २ । उपयामगृहीतोऽसि । २ । ३० । खोटछिखा: । १ । आवाहो । २ । ४ । गौटछी- छ । अयंवाम् । २ । ३३ । गिचवडा । या वा- म् । १ । १३ । किअगङ । तमप्रत्कथा । ४ । ८१ । भ्रणीनतो: । ५ । अयंवेन: । ३ । ६६ । चूयाथटा: । ३ । ये देवास: । ३ । ५३ । डिठडजा । २ । इन्द्राय त्वा । २ । २८ । खोगचछी । मूर्द्धानन्दिव: । २ । ४२ । घाठा डणी: । १ । यस्ते । १ । २५ । घुजघ- घु: । १ । प्राणाय मे । ३ । ३५ । गुकन्वघा: । ३ । मधवे त्वा । १ । १५ । कुखञअ: । ३ । इन्द्राग्नी

ऽआगतम् । १ । १३ । किगखाङ । आघ । १ । १४ ।
ओमासश्चर्षणीधृतः । १ । १० । औचकक । प्रगु-
तामे । १ । ६ । ओकअगा । इन्द्रमरुत्त्वः । १ । २२ ।
खाघाखक । मरुत्त्वन्तम् । १ । १७ । केकगाङः ।
मरुतान्वा । १ । ३० । इइअअकः । १ । सजोषाऽ-
इन्द्र । १ । १६ । कोचिघखा । मरुत्वाँ २ ॥ ऽइ-
न्द्र । १ । २० । कौभाछाई । यओयक्षा । १ । ६ ।
ओगाकाअ । उडच्युम् । ६ । १०२ । भालठौफिः । ३ ।
ऋचः । ४६ । अनुवाकाः । २५ । पदानि । ९८८ ।
आदित्येभ्यस्त्वा । ४ । ७० । चौतीचिजे । २ । वा-
समद्य । २ ३५ । गुटङाच । २ । सुशर्म्मासि । १ । ६ ।
ओगगआः । बृहस्पतिसुतस्य । २ । ५१ । ङणि-
आठेः । १ । हरिरसि । ३४५ । घुतिर्थबिः । ३ ।
समिन्द्र । ६ । १११ । टरैधानी । उरुर्टंन्हि । ४ । ८७ ।
जैपिणिते । २ । एजतु दशमास्यः । ५ । ७१ । छभ-
ठथाः । १ । आतिष्ठ । १ । १८ । कैकाकाखः । १ ।
युद्धाहि । किखगख । इन्द्रमित् । १२ । काखकाः-
ङा । यस्मान्न । २ । ४३ । घिठपङचीः । १ । अ-
ग्ने पवस्व । १ । २३ । खिगकिङा । २ । अद्दश्रम-
स्य । १ । २३ । खिचाअघः । १ । आजिघ्र । २४९ ।
घचगगिः । १ । विनऽइन्द्र । १ १७ । केङाखक । वा

वस्प्रतिम् । ६ । १६ । कोडङगा । १ । विश्वक-
र्मन्हविषा । १ । १७ । केडाखड । अग्नये
त्वा । ४ । ५२ । डाञीअटै । इह रतिः । ३ । ६७ ।
चेतुक्रणौः । परमेष्ठ्यभिधीतः । १० । १९५ । शुम्यै
न्नीमौ । ऋचः । ५७ । अनुवाकाः । २२ । पदा-
नि । १०१६ ॥ देवसवितः । ४ । ७६ । छोधया-
म्णि । २ । इन्द्रस्य वृष्णः । युङ्येदनौः । ३ । देव-
स्याहम् । ८ । १ । ६२ । ताभ्या भिज्नौ । ४ । आप-
ये स्वाहा । ३ । ६८ । चैयजेछा । ४ । वाजस्येम-
म् । ८ । १२३ । ठिफीशिशुः । ५ । अग्निरेकाक्ष-
रेण । ४ । ७२ । छाभूरयू । एष ते । ४ । ६६ । चू-
न्मारोधौः । १ । सविता त्वा । १ । ४३ । दिङघा-
ड । ऋचः ३६ । अनुवाकाः । ८ । पदानि । ९२८ ॥
अपो देवाः । ४ । ५६ । डूङमीडडः । १ । सोमस्य
त्विषिः । ५ । ८६ । जोषपिठी । ४ । कवेष्टा
दन्द्रशूकाः । ६ । १०७ । जेवटुवौ । ८ । सोमस्य
त्वा । ३ । ७८ । छैठीजठै । ४ । मित्रावरुणयो-
स्त्वा । ५ । ९२ । क्षादिन्ठै । ४ । स्योनाऽसि । ४ ।
चेवातक्ष । ४ । सवित्रा प्रसवितृना । १ । २४ ।
खिगगाअ । अश्विभ्यामपच्यस्व । ४ । ६५ । चु-
टाटठू । ऋचः । ३२ । अनुवाकाः । ९ । पदा-

नि । ५७८ ॥ युञ्जानः प्रथमम् । ८ । १३४ ॥ त्वी-
मिद्दारो । ६ । प्रतूर्त्तं वाजिन् ॥ १५ । २१८ ॥ पो-
न्वोऽडयीर्म्यूः । १ । अङ्गिरस्वत्खनामि । १० । ४४ ।
टीत्त्वेर्धखै । ४ । अपो देवीः । १२ । २०८ । नो-
न्द्दोशुन्र्यो । ६ । आपो हि । ११ । १५८ । शौन्वि-
नाहु । १२ । अदितिष्ट्वा । ४ । ७४ । चीपक्षजौ । ८
आकूतिमग्निम् । १७ । २४० । वोर्क्षीर्ज्वोस्यै । ४ ।
ऋचः । ७८ । अनुवाकाः । ७ । पदानि । ११७८-
इग्रानो रुक्मः । १६ । ३८७ । वेह्नेयाद्वोव्यीः । ५ ।
टीत्त्वेर्धखै । ४ । अपो देवीः । १२ । २० । नो-
न्द्दोशुन्र्यो । ६ । आपो हि । ११ । १५८ । शौन्वि-
नाह्नु । १२ । अदितिष्ट्वा । ४ । ७४ । चीपक्ष-
जौ । ८ । आकूतिमग्निम् । १७ । २४० । वौर्क्षी
र्ज्वोस्यै । ४ । ऋचः । ७८ । अनुवाकाः । ७ । पदा-
नि । ११२८ ॥ इग्रानो रुक्मः । १६ । ३८७ । येह्ने-
वाद्वोव्यीः । ५ । दिवस्परि । १० । १८२ । दान्यू-
लुर्ज्यैः । १ । उद्धृत्वा । १ । १७२ । याह्मानुफः । ७ ।
अपेत । १५ । २३३ । त्रिर्स्त्रिंहो स्यौ । अस्तुन्वन्त-
मयज्ञमानम् । ११ । २१७ । याऽओषधीः । २७ ।

दानि । १६७३ । मयि गृह्णामि । १३ । २३२ । वान्धमुवुन्मौ: । ५ । ध्रुवाऽसि । ११ । १७२ । थावालैतः । ६ । मधु व्वाता: । ९ । १२५ । टुष्णौघड । ८ । सय्यक्स्रवन्ति । ८ । १२४ । ठोषोऽह्ला । ४ । ढूमम्मा । ६ । १२ । भ्राती जरामु । २ । अपाञ्च्वा । १ । २० । कौङ्कक: । ९ । अयम्पुर: । ५ । १०९ । ओर्म्नसुर्फम् । ऋच: । ३ । अनुवाका: । ६ । पदानि । ८०७४ ॥ ध्रुवक्षितिर्द्ध्रुवयोनि: । ५ । ८२ । भ्राथटिता: । ५ । सजूर्ऋतुभि: । २ । ३८ । गैद्भ्रङती । मूर्द्धा व्वय: । २ । ४३ । घिशातची । इन्द्राग्नीऽअव्यथमानाम् । ३ । ३५ । गुडङिष्कु: । ३ । आयुर्मे । ६ । ७९ । क्षोमकूजौ २ । आशुस्त्रिटत् । १ । ४१ । घड्यवगि: । अग्नेर्भाग: । ३ । ५९ । डोध्रढणौ: । १ । एकया स्तुवत । ४ । ७८ । क्षेविधलिङा । ऋच: । २६ । पदानि । ४६५ । अनुवाका: । ८ । अग्ने जातान् । ५ । १६६ । रश्मिनासत्याय । ४ । ८० । क्षौतिथर्ठि । २ । राज्ञासि । ५ । ८७ । जेभ्रडुद: । २ । अयं पुर: । ५ । ७५ । क्षुत्लामाघे । ६ । अग्रमग्नि: । २४ । ३२० । षोढव्यौभ्रैथच्चौं । ४ येनऽऋषय: । ७ । १२० । ठौञमेदिल्ले: । १ । तपस्तपस्य: । ४ । ६२ । चाटा: । ऋच: । ५४ । अनुवाका: । ७ । पदानि । ८३३ । नमस्ते । २३३ । विभ्र-

क्षीमूपृगे । ४ । हिरण्यवाहवे । ५ । ६५ । नुभफची । उष्णीषिणे । ५ । ४३ । धिम्नवर्क्ष । तच्चक्षुः । ५ । ४२ । घाटभञः । १ । ज्येष्ठाय । ५ । ४१ । घग्रतस्र । स्तुत्याय । ४ । ३५ । गुखभ्माक । २ । घुम्मवाय । १ । ७ । एगङ्ख । पार्याय । ५ । ४६ । घोटदक्कु । द्रापेऽन्न-न्वसः । ७१ । १८८ । दात्मीहामैः । ७ । क्टचः । ६३ । अनुवाकाः । ९ । पदानि । ७०३ । अश्मन्नूर्ज्जम् । ९ । घोटदक्कु । ९ । १५४ । योन्यःखु । ६ । नमस्ते । ५ । ६३ । चिपिडक्काः । ३ । अग्निनस्तिग्मेन । ७ । १५४ । ठिमेर्द्रूपैः । २ । चक्षुषः पिता । ८ । ४६ । ढुमीथीश्चुः । १ । आशुः शिशानः । १३ । २८१ तग्चश्न्चौचिर्मीः । १३ । उद्देनम् । १४ । २०८ । नैलिवज्युर्ल्लेः । १ । क्रामदुध्वसग्निना । १३ । २०९ । नोष्कुविश्नौः । १ । शुक्रज्योतिश्च । ७ । ७२ । छान्दुलाःक्लोः । १ । द्रुमठे० स्ताग । १३ । २०८ । नैःहैमून्यौं । ४ । ऋचः । ६२ । अनुवाकाः । ९ । १४६५ ॥ व्याजश्च । ४५६ । उत्तेक्राजा । सत्यं श्रद्धा । ४ । ४८ । वैश्वसनो । उर्क् सूनृता । ४ । ४८ । घैसजतु । आप्स्म । ३२३ । गिपखच । अग्निरिन्द्रः । २० । कौटवक्क । अएशूरश्मिः । ५८ । डेम्पथिकि । एका तिस्रः । ४ । ४१ । घगामीडू । व्याजाय स्वाहा । ३० ।

। ३० । खौचङ्गू: । १ । क्रिश्च्स्वेऽग्रद्द्य । ६ । १०१ ।
अनिटाशि । ६ । ऋटताघाट् । ११ । १२१ । ठश्नीद-
क्षू । २ । अग्निँव्युनदिक्ष्म । ७ १०७ । अग्निप्रता-
गि: । ५ । यद्वाकृताम् । ८ । १ । ११४ । टिलोया-
भ्नीः । १ । ब्वार्त्रहत्याय । ८ । १२३ । टिज्यिद्वांमः ।
ऋटचः । ६२ । अनुवाकाः । १३ । पदानि । ६०० ॥
खःहोन्त्वा । ८ । १५१ । याङ्किताद्दे । ६ । देवा
यज्ञम् । २ । २३५ । दुश्चवेत्वनीं । स्तुरावन्तस्बर्हि-
षदम् । १७ । २२७ । केक्षीषीर्म्नी । ६ । उद्दीरता-
म् । १३ । २२२ । भारतवौद्रुखे । १२ । आबन्ध्या ला-
नु । १० । १७८ । थैश्चोधिफौः ३ । सोमो राजा ।
जंद् यीर्प । सीसेन तन्त्रम् । १६ । २८२ । लाभ्नी-
मीज्नं । २ । ऋटचः । ८३ । अनुवाकाः । ७ । पदा-
नि । ३७६ ॥ जनस्य योनिः । १२ । १६० । दौर्म्नी
षूर्नी । ६ । यद्देवाः । ६ । १०६ । ओमोडोर्भीः । ७
अश्याश्वमि । ८५ । भ्रमानाच्छयिः । १ । यो भूता-
नाम् । ३ । ४२ । याटिठउ । १ । समिद्धऽइ-
न्द्रः । ११ । १७२ । टात्मौञ्जके: । ३ । आया-
तु । ८ । १३६ । डेघमूर्षीर्फी । ११२ । समिद्धोऽअ-
ग्निः । १२ । १५४ । खीलीसुमि । २ । अग्निश्च-
ना । १२ । १४८ । हैङ्यीफाहिः । १ । अग्निश्चना ते-

जसा । ११ । १०४ । श्रीरुद्रघाणे, ऋचः ८१

अनुवाकाः । ६ । पदानि । १९४ ॥ इमस्मे । ८, ११८

दैव्याढावृ । ४ । समिद्धोऽअग्निः । ११ ६८ । श्रौ-

म्नोमीर्क्षं । वसन्तेनऽऋतुना । ६ । ४४ । घीतक्षुष ।

होता यक्षत् । १२ । १४८ । भैमूधुश्वं । २ । अग्निश्च-

नौ छागस्य । ६ । १४६ । दस्मिमर्होँ । ६ । देवस्ब-

र्हिः । १४ । २८१ । लोम्यामणीर्काः । ६ । ऋचः । ५७

अनुवाकाः । ६ । पदानि । ८४२ ॥ तेजोऽ-

सि । ५ ८० । छौफुटथ । २ । अपाम्मोदाय । १ । ८ ।

ओअमक । १ । हिङ्काराय । २ । ५४ । ङौअवङौ ।

हिरण्यपाणिमूतये । ८ । ८४ । नौधादप् । विभू

र्मात्रा । ८ । ३७ । नेथचङः । १ । काय का-

स्मै । १ । २४ । खौकभख । आब्रह्मन् । घापिजन्वः ।

१ । चक्षुषे श्रोत्राय । ८ । १४ । ईअअ-

अः । १ । प्राच्यै दिशे । १ । ८ । ओअअअः । अद्भ्यो

ध्वाऽर्य्यः । १ । १२ । काभखअा । वाताय धूमा-

य । १ । १८ ॥ कौखङखि । इन्द्राय पृथिव्यै । १ । ८ ।

ओखअआ । नक्षत्रेभ्यो नक्षत्रियेभ्यः । १ । २४ ।

खौनचका । १ । परिप्लवेभ्यः । १ । ३ । इगकअ । अ-

सवे व्वसवे । १ । १५ । कुअचक । दूषायोर्ज्जाय । १ । २ ।

आअलअ । स्वः स्वाहा । १ । ४ । ईकाअ । प्राणो-

ऽपानः। १। ५। ङङचका। एकस्मै द्वाभ्याम्। १। ६ ऊक्रागक। १। ऋचः। २६। अनुवाकाः। १६। पदानि। ४४१ ॥ प्रजापतये त्वा। १। २३। खिगागत्व। युः प्रागातः। १। २३। शिवङ्घकाः। १। युञ्जन्ति ब्रध्नम्। ८। १०८। ऐभीछते। २। वायुष्ट्वा। ५। ६३। भिडमुडाक्षै। ६। अश्वोऽग्निके। ३। ४४। घीतटाढ। २। उत्सक्त्याऽअव। १२। ४४। ठीकटाभूः। १। गायत्री त्रिष्टुप्। ५। ५६। डहटकेः। ३। कस्त्वा। ६। ८४। जुयक्षिग। १२। किंस्वित्। ६। १०७। अयिजुते। ४। काऽङ्कम्। ८। १३८। डैडयणीवि। २। सुभूः स्वयम्भूः। २। २३। खिभाव-चाः। ऋचः। ५७। अनुवाकाः। ११। पदानि। ८४४। अश्वस्तूपरः। १०। १६६। तौह्रसम्तङ्। धूम्रानव सन्ताय। १०। ११६। दृहत्वद्रिः। १। समुद्राय शिशुमारान्। १०। १३७। हेर्हयार्ङ। मयुः प्राजापत्यः। १०। १८२। घल्लिन्नयू। ऋचः। ४०। अनुवाकाः। ४। पदानि। ५१४। शादन्दद्भिः। १। ४०। गौठिक्षाणि ॥ स्वाहा प्राणेभ्यः। १। ४१। घचाडादि। मशकान्केशैः। ६। खघीचता। अग्निः पशुरासीत्। १। ३०। गायगच्छ। मरुतां स्कन्धाः। १। २४। स्रीगगाङ। पूषणं वनिष्ठुना। १। २२। स्वाङचहः। इन्द्रस्य क्रो-

ङः । ८ । ३५ । गुञ्जेङ्का । विष्टतिन्नाख्या । १ । ९६ । ख्वजगङ्गा । यद्यंमे । खैक्षक्षामे । आनः । १० । १९१ । घक्षोभाद्रिः । ७ । मानः । ८ । १४८ । ठैद्दियाभीः । ३ यऽश्म्वस्य । ८ । ८३८ । डैमफाद्वः । ३ । यूते । ६ । १८४ । ञियठुद्दे । २ । ङ्कमा नु । १ । ३० । ब्बौक्षगिङी । ऋचः । ४४ । अनुवाकाः । १५ । पदानि । ८१२ ॥ अ गिनश्च । १४ । २१८ । पैक्षोड्मिर्भू । १० । उम्बा ते । ११ । १३६ । उड्माघितो । ४ । ऋचः । २५ । अ नुवाकाः । ५ । पदानि । ३५४ । समास्त्वा । ८ । १७३ । थिघ्नीरवो । ४ । जहृद्वाऽश्वस्य । १२ । १३७ । हेवग्न- दृथे । ४ । पीवोऽअन्ना । १२ । १७७ । थश्वहुर्वणो । ४ । अभित्वा । ११ । १६५ । तुर्भ्यपाशोः । ३ । ऋ चः । ४४ । अनुवाकाः । ४ । पदानि । ६५० । होता यक्षत् । ११ । १२४ । टिष्णुपुम्न । २ । ढेवम्बर्हिः । टोयेभीर्त्युं । २ । समिधानम्महत् । १३ । ११८२ । टैभा न्योष् । ढेवम्बर्हिः । २ । ४१ । घक्षुरुत्ति । ऋचः । २६ । अनुवाकाः । ४ । पदानि । ४२७ ॥ समिद्धोऽश्वाञ्ज- न् । ११ । १८६ । धूंच्छोक्ष्लुः । ८ । यदक्रान्दः । १३ । २३२ । वाराग्नीसुन्दैः । ५ । समिद्धोऽअद्य । १२ । २०२ । नक्षीचीकु । ८ । वीतुङ् छसायत् । २४ । ४४१ । ब्भष्टलैर्धर्वसलैभ्वें । १२ । ऋचः । ६० । अनुवाकाः । ४ ।

नदानि । १०७१ ॥ विश्वानि देव । ४ । ६१ । चच-
ड्यो । तपसे कौलालम् । १६ । ३५० । ज्य कुसङ्ग
व्याहृतग्रु । ८ । ऋचः । २० । अनुवाकाः । २ । पदा-
नि । ४११ ॥ सहस्रशीर्षा पुरुषः । १६ । २३७ । फो
ल्पिंर्दर्षि । १ । अद्भ्यः सम्भृतः । ६ । १०५ । जुलु-
टिपै । ऋचः । २२ । अनुवाकाः । २ । पदानि । ३३० ।
तदेव । ७ । १०३ । निभ्रयजैर्मि । वेनस्तत् । १ । १५ ।
योग्रुफीन्यु । ३ । ऋचः । १६ । अनुवाकाः । २ ।
पदानि । २६२ । अश्या जरासः । १४ । २०३ । नाहः-
ज्ञसोभुः । ५ । आपश्चित् । १२ । १४८ । दोदहोघु-
र्हं । ४ । विभ्राड्बृहत् । १२ । २०० । धांभ्रैगीवधा-
। १० । प्रवाहजे । १० । १५३ । शिव्रतोभु । २ । प्र-
वायुम् । १३ । १२० । यौष्योल्लुडमीः । ७ । प्रवीर-
या । १२ । १८६ । दोघ्यैकटुः । ३ । आनः । १३ ।
१८२ । धाव्याजुसै । ६ । ऋचः । ८७ । अनुवाकाः । ७
पदानि । १३०५ ॥ यज्ञ वधतः । १० । १४७ । डेभु-
भिर्यु १२ । पञ्चनद्यः । १० । १६१ । तेश्मिपाश्चो । ६
सोमो धेनुम् । १० । १६३ । तिथेनूशै । ४ । आरा-
त्रि । ८ । १६२ । ताम्पिविलो । ५ । पूषन्तव । १० ।
१४८ । ढोभ्नमेड्वेः । ३ । न तत् । ८ । १४६ । ढूग्धो-
ग्रहो । ५ । ऋचः । ५७ । अनुवाकाः । ६ । पदानि । ८३४ । अ

पेतः । ६ । ३८ । डोग्रेठियः । १ । अपाद्यम् । ८ । १३४ । डौनिज्य् । ४ । ऋचः । १८ । अनुवाकाः । २ । पदानि । २१२ । ऋचंश्यावम् । ८ । ६८ । कौच्चाक्ताद्दु । १० द्यौः शान्तिः । १५ । ७३ । छिपादाणा । ४ । ऋचः । १३ । अनुवाकाः । २ । पदानि । १७२ । नारिरसि । ३ । ३६ । गङ्गागिरवाः । १ । यमाय सखाय । १० । १६२ । ताप्वीनीलू । ऋचः । १२ । अनुवाकाः । २ । पदानि । १६८ । सरस्वत्यसौ । ६ । ७५ । कुणडिछौ । ३ । यमायाङ्गिरस्वते । १० । १२३ । ठमीतियीः । ३ । तत्त्वस्त्वा । ७ । १०७ । जमामीणो । १ । ऋचः । २३ । अनुवाकाः । २ । पदानि । ३०४ । स्वाहा प्राणेभ्यः । ६ । ४८ । जैधिगद्दू । उग्रश्च । ७ । ६१ । भामीताधु । २ ऋचः । १३ । अनुवाकाः । २ । पदानि । १७१ ईशा वास्यम् । ८ । १३२ । साद्मोडिघीं । १ । अन्धन्तमः । ६ । ७६ । कोमडिषे । ऋचः । १४ । अनुवाकाः । २ । पदानि । २११ ॥ इतिश्री पण्डितसिद्धेश्वरसूनुना पण्डितरामचन्द्रविरचिता वेदपरिभाषा शिक्षा समाप्ता ॥ अथ वेदपरिभाषा कारिका शिक्षा सटीका प्रारभ्यते ॥ श्रीरामं सद्गुरुं याज्ञवल्क्यं कात्यायनं तथा ॥ नत्वा पदानां वक्ष्यामि लक्षणं चतुरक्षरैः ॥१॥ अनुवाकेऽनुवाके चाम्नाये माध्यन्दिनीयके ॥ परिमा-

ओष्ठ्यौ इत्युक्तौ वैशवो वा स्वरोऽक्षरम् ॥ २ ॥ अ-
स्यार्थः । श्रीरामकृपाख्यदेवतां विद्याप्रदं सद्गुरुं प्रा-
णम्य प्रशान्ताय याज्ञवल्क्यं, स्वरकारं कात्यायनं च प्र-
णम्य अनल्पज्ञाय माध्यन्दिनीयके शाखाख्यस्यार्थं
अनुनासिकोऽनुनासिके पदानुनासिकं तस्मिन्ननुनासिके पदानां
चतुर्णां वै: अक्षरसमुदायेन लक्षणनिर्णयं वक्ष्यामि ।
कथयिष्यामि । तत्र परिभाषोच्यते । इति अङ्गु-
ल्याङ्गुष्ठा । अङ्गुल्याद्युक्तं शुक्लादि तद् अक्षरकर्णं क्रो-
शम् ॥ २ ॥ पदसङ्ख्याऽऽदिमेन स्याद्द्वितीयेन वि-
सर्जनी ॥ आवग्रहं यतिकारं तृतीयेन तु दीयते ॥ ३ ॥
प्राणां हादितलं च मिश्रितानां विसर्गतः ॥ एकाक्षरं
तु विपदं तद्भवेत्समस्ता वा ॥ ४ ॥ अनयोरर्थः । आदि-
मेनाङ्गुलेनाङ्गुष्ठाख्यपदसङ्ख्या ज्ञेया, द्वितीयेनाङ्गुले वि-
सर्जनीयपदसङ्ख्या, तृतीयेनाङ्गुलेनाव-
ग्रहयतिकारकाञ्छितपदसङ्ख्या । चतुर्थेनाङ्गु-
लेन पदसङ्ख्या ज्ञेया । मिश्रिते-
ति सर्वेषां विसर्गस्य । तेन मिश्रितानां तु प्रा-
णानां विपदसङ्ख्या बोधितं च विपदं बोध्य-
म् । यथा प्रथमाध्यायस्य पञ्चमेऽनुवाके भवन्तीत्यत्र-
मिश्रितानि अष्टौ तु गच्छन्ति पञ्च मिलि-
त्वा त्रयोदश १३ विपदसङ्ख्या ता तत्रोक्ताः । मि-

चतिष्ठः, इति विसर्गौ लिखितः । कति विसर्गावी-
ति निर्णयार्थम् । अङ्कोऽपि यथा तत्रैव १३ तदङ्कमार्के
मन्त्र विसर्गौ न लिखितत्वात् सन्ति अथवा न सन्ति ;
तयोर्निर्णयार्थं अत्र सन्ति तस्मादङ्क एव लिख्यते । यथा-
ऽष्टमाध्याये द्वितीयानुवाके वसोः पवित्रमित्यतस्ता-
त् चात्वमत्या इत्यन्तरान्ते तत्र अष्टाविंशं नवकमेकम्
इति लिखित्वा इयं सः अङ्क एव लिखितः । अधुना
तदङ्कपरिज्ञानार्थं वर्णानां व्यञ्जनानां च सङ्ख्यानि-
रूपणकर्मं चाह ॥ ककारादिहकारान्तास्त्रयस्त्रिंशद्व्य-
ञ्जनाः स्मृताः ॥ सङ्ख्या प्रतिस्तु नैकेन संयोगं तत्र कार-
येत् ॥ ५ ॥ अस्यार्थः । ककारमारभ्य हकारपर्यन्तं
त्रयस्त्रिंशद्व्यञ्जनानि यस्मिन्नन्ते यद्व्यञ्जनं लि-
खितं तस्य या सङ्ख्या सैव तदन्तरस्याङ्कस्य ज्ञेयाः ।
गकारे त्रयः, चकारे षडित्यादि । यथा प्रथमा-
नुवाके "गु" इत्यत्र गकारेण त्रयः । "ठि" इत्यत्र
ठकारेण द्वादश । यत्र तु एकेन व्यञ्जनेन सङ्ख्या-
पूरणं नास्ति तत्र सङ्ख्यापूर्तिपर्यन्तं व्यञ्जनानां सं-
योगं कृत्वा लेखनीयम् । यथा द्वितीयाध्यायस्यान्ति-
मेऽनुवाके । अग्नये कव्यवाहनायेत्यत्र जोङ्गीढङ् ।
इत्यत्र द्वितीयाक्षरे ङकारेण पञ्च वकारेण एको-
नत्रिंशत्, मिलित्वा चतुस्त्रिंशत्सङ्ख्या ज्ञातव्येति ॥

मंत्रं चैव ते वदन्तीति पूर्वार्द्धेन गन्धपुष्पतण्डुलाक्तं जुहु-
यादनकामो वीरकर्मेण शतपुष्पीं समिधः जुहुयाच्छत-
मल्पर्कं ० ग्रामसुमुत्पद्यते द्वितीयार्द्धेन भूपदरस्त्रोभो
त्पातो ग्राममध्ये बलिं निवेदयेत्पिष्टपूरिकामुपस्कारं-
सादिभिरुपशाम्यति ॥ ४ ॥ द्विपदचतुष्पदानामुपसर्गे
भेषजमसीति दधिमधुघृतं जुहुयाच्छान्तिर्भवति
त्र्यम्बकमित्यृचार्द्धेन शान्तिकामः पुष्टिकामो वा धा-
न्यसमिद्भिः समिधो जुहुयात् त्र्यम्बकमिति कन्यानाᳫ सौ-
भाग्यकामानां पतिकामानां भगकामानां वा सर्वा-
भिस्तोभिराज्यहोमः पुरुषस्य कन्याकामस्यानेनैव हो
मः कन्यानामग्रहणं कृत्तिवासा इति भयेषु जपेद-
भयं भवति जपेन सर्वोत्तरवादी भवति लोकस्य वचन-
विधेयो भवति त्र्यम्बकमित्यृगभयेन धत्तूरकपुष्पाणां घृ
ताभ्यक्तानां चतुष्पथे शून्यायतने वाऽग्निमुपसमाधाय श-
तसहस्रं जुहुयात्साक्षाद्भगवन्तं त्र्यम्बकं पशुपतिं दृष्ट्वैव
तेनेत्युपतिष्ठते ह्युपस्थानात्सोऽभीष्टान्कामाँल्लभत एते-
नैव गुग्गुलधूपो दीपश्च नवनीतेनाथ भगवन्तं त्र्यम्बकं
पश्यति चेत्सुवर्णरजतमिश्राणां भाजनानाᳫ सहस्रं ल-
भते ॥ ५ ॥ आकूत्याऽ इत्यष्टौ स्रुवाहुतीर्जुहुयाद्राज-
कुलेभ्यो भयन्न भवत्यन्वहं जुहुयात्काᳫस्यभाजना-
नाᳫ शतँल्लभते तिलाहुतीनामयुतं जुहुयाद्ग्रामे

स्यापगो न भवत्यकालेन कश्चिन्म्रियते । चिदसीति सहस्रं जपेत्सर्वोत्तरवादी भवति लोकस्य वचनविधेयो भवत्यनेनेत्यनूरिति मोदूिलरुग्तान्पयोऽयुतान्सहस्रं जुहुयात्सर्वातिथिर्भवति । युञ्जते मनऽइति वैष्णवानुवाकं जप्त्वा सायंप्रातः प्रयुञ्जानो दीर्घायुर्भवति भयमन्यताऽपि न भवति । दिवो वा विष्णऽइति महाव्याहृतिवत्कर्म । विष्णो रराटमित्ययुतं जप्त्वाऽष्टसहस्रं जुहुयात्पातालेऽपि भयन्न भवत्ययन्नोऽग्निरिति रात्रौ शरीरमायुश्चात्मानं चाभिमन्त्र्य संग्रामे प्रविशेज्जयो भवति ॥ ६ ॥ इदमापः प्रवहतेत्यप्सु निमज्ज्य जपेद्घोराघ्नोषितो यावज्जीवन्तातपापात्मक्षुच्यते । देवाग्नयोऽइति व्याधिघातकराजिकाभिरभिचारी यद्वा हि केशिनेत्युपश्रुतिरघोराघोषितो भूत्वोपश्रुतिं कुर्याज्जुहुयात्करऽआयुष्यमग्ने पवस्वेति ब्रह्माग्निसकाशस्याज्यहोमऽवदुत्यमिति मौद्गिलतण्डुलपयसा संयुक्ताञ्च्च सहस्रं जुहुयात्सर्वातिथिर्भवति । चित्रन्देवानामिति महाव्याहृतिवत्कर्म । बिन्दऽइन्द्रेति यस्मादधिको भवितुमिच्छन्ब्रह्मवर्चसेन विद्यया धनेन यशसा वा तस्य नामग्राहं जपेदधिको भवत्यनेनैवाज्याहुतीर्जुहुयाद्ब्रह्मविद्गच्छते । बिभ्रद्बृहत्पिबतीति यादेव कन्यामिच्छति तस्या

नामग्राहमायसीं सूचीं द्वादशाङ्गुलां सहस्राभि-
मन्त्रितां कृत्वा तस्या एव गृहद्वारे निखनेन्न म्रियते
न चान्यस्मै प्रदीयते ॥ ७ ॥ प्राणाय स्वाहेत्येतकाभ्या-
न्नित्यं जपेत्तेजस्वी भवति निरुजस्त्वा जिघर्मीति सहस्रं
घृतस्याऽग्नौ समिधोदुम्बरगोमयहोमः पशव्यं कर्म
गोमयेन गोः प्रकृतिं कृत्वा देवसवितरित्यन्नभाग्भ-
वति । वाजस्येममिति । सप्तभिर्ऋग्भिराज्याहुति-
सहस्रं जुहुयाद्यज्ञादन्यत्र यज्ञहोति तच्च मूल्यं सह-
स्रं गुणमुत्पद्यते तदक्षय्यं भवत्यग्नेऽच्छेति सहस्रनि-
ष्कारुन्यदुम्बरयवतिलधान्यापामार्गतण्डुलाञ्जुहुयाद्धन-
कामो वीरक्रयेण शतपुष्पीं क्रीत्वा जुहुयात्तन्मू-
ल्यसहस्रगुणमुत्पद्यते । उदुम्बरसमिधमयुतं जुहु-
यात्सुवर्णमुत्पद्यते । गोरोचनामष्टसहस्राभिमन्त्रितां
कृत्वा ललाटे तिलकं कुर्यात्सर्वजनप्रियो भवति ।
सोमँ राजानमिति मासं पौर्णमास्यां रुक्त्सर-
ँ सोममुपतिष्ठेत ब्राह्मणायाग्रं दत्वा भुञ्जीत क्षि-
प्रँ सोमयाजी भवति । प्रनो यच्छत्वित्यन्नकामो
होमद्रव्याणि जुहुयादयुतमर्यमणमित्यादित्याभि-
मुखः प्रतिदिनं काममभिसन्धाय जपेत्क्षिप्रमेव ल-
भते ॥ ८ ॥ एष ते निर्ऋतऽइति माषमङ्गृहीत्वा
जम्बुकास्थि वा शूर्पे न्यस्य चतुष्पथेऽहोरात्रोषितः शि-

रसि सहस्राभिमन्त्रितं कृत्वा क्षिप्रं जपित्वाऽप्रेक्ष-
माणो गच्छेद्यावत्क्षीतं तावदष्टगुणं भवत्यनेनैव तु-
षकण्टकहोमो गृहान्निर्गत्य स्थानं गत्वाऽभिचारेण
होमविधानेनाग्निमुपसमाधाय शतसहस्रं जुहुया-
च्छत्रुकुलमुद्धरति विषरुधिराक्तैर्ग्राममुद्धरति राजा-
नं नगरं वोत्सादयितुकामो वैकङ्कतकण्टकानां ती-
क्ष्णतैलाक्तानां विषरुधिरेण कटुतैलाक्तानां सहस्रद्वि-
गुणं शतसहस्रं जुहुयाद्धोमान्ते नदीं प्रस्रवणं
वा गत्वा कपिलागोमयेन लिङ्गं प्रतिष्ठाप्य पञ्चगव्येन
स्नापयेद्रुद्राध्यायं जप्त्वा शुक्लैः कर्तुं गीतिर्भव-
ति ह्यमोघं कर्मेत्याचक्षते ॥ ९ ॥ देवस्य त्वेत्यभिचर्य-
माणः स्रुवेणापामार्गतण्डुलाञ्जुहुयात्स्रुवं च तस्मि-
न्देशऽआगमने च प्रतिमन्त्रमेते च प्रत्यङ्गिरोऽपो दे-
वाऽइति देवं वर्षयितुकामऽऔदुम्बरबिल्ववेतसवारणा-
न्दधिमधुघृताक्ताञ्जुहुयात्प्रजापते न त्वदिति महा-
व्याहृतिवत्कर्म । कद्रुद्र यत्तऽइति पालाशसमिधो
जुहुयात्सुवर्णमुत्पद्यते पायसं जुहुयाद्घृतमधुमिश्र-
मथ इदमेवापामार्गौदुम्बरवारणानाममावास्यायामेत-
त्कर्म ॥ १० ॥ हꣳसः शुचिषदिति विरजो मन्त्रो
नाभिमात्रमुदकमवतीर्यादित्याभिमुखः शतसहस्रं
जपेदुपपातकेभ्यो मुच्यते द्विगुणेन महापातकेभ्य-

अनुष्ठत्वा सर्वान्वेदानवाप्नोति । चत्वारि शृङ्गेत्या-
र्षभो मन्त्रः सकृद्व्यसनाद्देवाज्ज्यो भवति द्रुपदा-
दिवेति त्रिरन्तर्जले जपेद्दशोऽवोषितो विपापो
भवत्यथ महापातकसंयुक्तः पञ्चगव्याहारो गोष्ठे-
ष्विनमुपशमाधाय गोमयेनानुलिप्ताङ्गोऽयुतं जप्त्वाऽष्ट-
सहस्रं जुहुयाद्विपापो भवत्युदयमिति पापप्रणाशि-
न्यादित्योपस्थानं कुर्यात्पापन्नाशयत्यादित्यस्य सायुज्य-
मतो याहुदुत्यं चित्रमित्याभिमुखो जपेदनेना-
होरात्रकृतं दुष्कृतमपहन्ति देवा यज्ञमिति ब्राह्म-
णानुवाकं जप्त्वा ब्रह्मलोके महीयते । सुरावन्त-
मिति चतुर्थेन पौर्णमास्याः संस्कारं० सोम-
सुतिष्ठत ब्राह्मणायान्नं दत्त्वा भुञ्जीत क्षिप्रं० सो-
मराजो भवत्यश्विना भैषज्येनेति देवताऽभिषेकं कुर्या-
द्यद्देवा इति ऋचं कूष्माण्डं० हिरण्यगर्भो यः प्रा-
णतो ब्रह्म यज्ञानं महीद्यौरुपश्वासयागन्नय याते घ
र्मा यमाय स्वाहेत्यष्टर्चं जप्त्वा सुरापानाद्ब्रह्महत्या-
याः प्रमुच्यते । पितृभ्यः स्वधायिभ्य इत्यनुवाकशेषे-
णोत्तरेणानुवाकेन पितृणामक्षय्यतृप्तिर्भवति व्यस-
नेनऽस्तुनेत्याज्याहुतिसहस्रं जुहुयात्सविता वरदो
भवति ॥ ११ ॥ इति यजुर्विधानशिक्षायां प्रथमोऽध्या-
यः ॥ १ ॥ शिवो भवेत्यग्न्युत्पाते सर्वौषधिरसवतीः

समिधः सहस्रं जुहुयादुपग्राममथोति हुत्वाऽष्टलौदुम्बरसमिधो जुहुयाद्धनकामः परस्याऽइति वैतसी-लीर्जुहुयादृत्तणे परमस्याऽइत्यौदुम्बरीर्जुहुयाद्धनसिद्धये। याः सेनाऽइति दुग्धमानीय क्षितौ जुहुयादभयन्न भवति प्रतिष्ठितं जुहुयाद्वज्र हैदश्वयामित्यग्रभयं जप्त्वा सर्वभयं नश्यति कृशकण्टकाग्नौ द्विषमोहनाय व्यत्राऽरेष्वन्नपतऽइत्यन्नं जुहुयादन्नमुत्पद्यते सर्वोपकरणमिथ्याशामन्वाद्याहुतीनां त्रिकटुकेनाभ्यज्य चतुष्पथे शून्यागारेऽथवा-सुतसमाधाय सहस्रं जुहुयादुग्राभ्यो भीतयोऽप्याभवन्ति ॥ १ ॥ सुपर्णोऽसीत्युभयस्य सहस्राहुतिवत्कर्म नमः सुतऽइति निगडबद्धो बन्धनाद्वापि निगडान्मुच्यते । अमो भूत्याऽइति वीरुधा शालपुष्पीं कृत्वा जुहुयाच्छतशो मृत्युकन्दते । काम-दुग्धानदुवऽइति कामधुङ्नत्या चतुष्पथेऽवोरालोपितः करीषतप्तायां भूमौ सहस्रं घृतस्नानेन जुहुयादुग्रामंत्रेणेदथ वा सुवर्णशतं गोप्रकेनाज्यान्तिसहस्रं जुहुयाल्लोककामोऽन्यच्च महाव्याहृतिवत्कर्म । सजूरब्दऽइत्याज्याहुतिसहस्रं जुहुयाल्लोककामः ॥ २ ॥ या

संस्थाप्य कपिलाहृतेनालोड्य पञ्चदशधाऽभिमन्त्र्य च-
न्द्रं दृष्ट्वा पिबेत्पयसा मासं भुक्त्वा श्रुतिधरो भवति या-
ऽओषधीरिति द्वाभ्यामोषधीरभिमन्त्र्य पाययेदगदो
भवति। अतश्चऽइत्याम्रसमित्पर्णफलानि जुहुयादारोग्य-
कामऽआयुष्मान्भवत्योषधीः प्रतिमोदध्वमिति बीजवापनं
कुर्यान्निष्पन्नसस्यो भवत्योषधीरितीति मातृनाम्न्योदु-
म्बरतिलयवापामार्गहोमो गोहिरण्यकामोऽश्वत्थे व-
ऽइत्यश्वत्थसमित्पर्णहोमो गोधनकामः पुरुषनाम्नी
चैषा यत्रौषधीः समग्मतेति रक्षोघ्नो यक्ष्मोऽन्यत्रापि राक्ष-
सपिशाचडाकिन्यादिभीतस्याज्यहोमोऽश्वावतीरित्य-
रिष्टनाम्न्या शान्त्यर्थं पयोऽन्नं व्रीहींश्च जुहुयादु-
च्छुष्माऽइति बन्धनस्थो बन्धान्मुच्यतेऽइष्कृतिरित्या-
त्मनिष्कृत्यर्थं होमोऽति विश्वाऽइत्यात्मशर्करे पावना-
य जपहोमौ रक्षणाय च, यदिमाऽइति व्रीहिहोमो-
ऽघनाशाय धान्यप्रतिकृतिनाऽभिचारे वशीकरणे च,
यस्यौषधीरिति स सर्पनाम्न्याऽऽत्मपावनाय च यवहो-
मोऽभिचारे, साकँयक्ष्मेति यस्मिन्काष्ठे चाष उपवि-
शेत्तदादाय शतसहस्रमभिमन्त्र्य शत्रुगृहे निखनेदु-
द्वसति शत्रुगृहं क्षिप्रं पदे निखनेत्कुष्ठी भवति चाष-
पक्षेण सहस्राभिमन्त्रितेन गृध्रपक्षेण वा प्रतिकृतौ
मर्मसु विद्धो म्रियते,ऽश्विन्यावऽइति वचो नाम्न्याऽऽ-

च्यते, श्रीकैर्गर्भेऽष्टसहस्राभिमन्त्रितां ब्रा-
ह्मीं वचां वा प्राश्नीयात्स मेधावी भवति तथा च
चत्वारो वर्णा वश्या भवन्ति, याः फलिनीरिति द्वा-
भ्यां सर्वौषधीमिश्रेणोदकेन सहस्राभिमन्त्रितेना-
त्मानं स्नापयेद्यावज्जीवकृतात्पापात्प्रमुच्यते ॥ ३ ॥
मुञ्चन्तु मेति रहस्यो मन्त्रः सर्वोपद्रवनाशःऽश्वा-
तुरमालभ्याष्टसहस्रमिष्टञ्जपेत्सर्वोपद्रवाञ्छमयति प्र-
तुभये चर्य्यमाणः करम्भाहुतीनां रक्षणाय ता-
नि द्रव्याणि जुहुयाद्यावज्जीवमन्नान्यक्षय्याणि भवन्ति,
यःऽश्रोषधीरित्यृगुभयेनौषधीमूलमुद्धृत्य कर्णे निधाय
सर्वजनप्रियो भवति । याञ्चेदमिति राजिकाभिः
प्रतिकृतिं कृत्वाऽभिचरद्रव्यहोमोऽभिचारजपहोमस्था-
नेनैव पात्ताश्वपतृनकालपाशग्रथितात्स न लोष्टप्रक्षे-
पऽश्चात्मरत्ना भिखावन्धस्त्वेति, नाशयित्री बलास-
स्येति तृषग्नवणभस्माभिश्चाणामन्नाद्याहुतीनां त्रिक-
टुकेनाभ्यज्य चतुष्पथे शून्यायतने वाऽग्निमुपसमाधा-
य शतसहस्रं जुहुयात्कृष्णाष्टम्यामारभ्य यावत्कृष्णा-
चतुर्दशीन्तावदुत्सादनं राज्ञो रङ्गद्यारिर्णिधनमु-
पयाति मा वऽइत्यनेनातुरमियादुद्दिष्यशान्तिकरणे प-
योऽन्नमश्नीत्वा जुहुयादोषधयः समिति सार्वका-

निकाय। मन्त्राभ्याहुतिवत्कर्म त्वाङ्कत्स्वतोऽइति पाप-
रोगमोचनाय होमः सहस्र सङ्ख्या द्विपञ्चीकवणे-
पनोऽल्पं नोदोल्वा जुहुयात् ॥ ४ ॥ मा मा हिं०
सीरित्यभिचर्यमाणोऽग्न्याज्यं जुहुयाच्छान्तिर्भवति, त्वमग्ना-
वरुणेति वरुणं कामपानानाय युतं तिलतण्डुलाञ्जुहु-
यादेवं च जातवेदसँङ्गमिते दधि मधुघृतं जुहुया-
द्धृष्टग्नी आङ्के तवेत्यन्नं जुहुया हृष्टिर्भवति, इष्णक्-
...रिति खनु वराहोमः स्त्रीपुरुषाणां सौभाग्य
कामः स्त्री पुरुषयोरनिच्छतो दधिमधुघृतं जुहु-
यात्सोतिर्भि...त्वनावानसिति व्रती भूत्वा, इमन्तहस्त्रमाभ्या-
... वत्स्याते वत्सऽइति तथैव कुर्या-
... व ... का ...नु...न्ताऽस्य...ग्निः प्रियेषु ...
... पिञ्चां दधि घुष्ट ...
युतं ...
...म् ॥ ५ ॥ ... इति दधिम्ना सप्त-
होमः पशुपुष्टिकामस्य च ...ऽस्त्विति घृतपायसं
नागस्यामे जुहुयात्सुवर्णमुत्पत्ते ...ऽइति विले
प्रविष्टं० सर्पं...हा तत्रैव...तसहस्रं जुहुया-
त्सुवर्णगतद्रव्यमुत्पद्यते सिद्धे तदर्थं नष्टे सुवर्णकमोघं
कर्मेत्याचष्टे कोटरावस्थितस्याप्येवं विधिमिष्यते वा-
सुध्व पावऽइति प्रत्यङ्गिरे जपेद्रुक्मऽइति मन्त्रोनौ-

मध्याह्ने तुषकम्बलकाञ्जिकासर्षपाणां विषकर्धिराक्ता-

नां जुहुयात्स्य वश्यो भवति शत्रोः क्रुद्धस्य चापि तुष-

कम्बलकाञ्जिकासर्षपाणां जुहुयाद्वशीकरणम् ॥ ६ ॥

कालाज्ञाकोत्थाग्नि दाघ्यां दूर्वाग्रवालानामयुतं जुहु-

याद्ग्रामे जनन्यरगसुपशाम्यति द्विगुणेन नगरे त्रि-

गुणेन देशे मधुमानाऽऽहूत्यष्टौ कुसुमोज्जुहुयाद्वासा-

ऽराऽऽभ्रमिति देवर्षिरिन्द्रं कामऽऽदृश्वानिलवेत-

नाराणानां पत्रैर्दुधिरमुह ाजाणामयुतं जुहुयाच्छा-

ह्राद ए निवर्नि हृदयेनेति यवमुष्टिमक्त जुहुयाद्भ-

तिहतनाश्यो भवत्यष्टमे जातानित्यचो येन ... ... ।

ह्रूतिवत्कामे द्विगो ... लगडीची यच्छुऽऽह्रत्यमेवा ... ...

पश्चे सा त्याहृतं कर्मया चधाते ऽथ वशीकर्तुं च्छनला-

शास्वरत्य पानागं निलावे समाक्ष्मीसजाभावो ... कामिनी

दधिमधुघ्र ा जुहुयात्सर्वं वशी भवति ॥

४ ॥ अथ राज्यकामः पद्मकुसुमकोनं सहस्त्रका-

ह्रीनि भगवतो मन्त्रेश्वरस्योभयानन्दन्तस्मानि श्रिय-

ति ध्यानमुद्रस्थानीपर्येत्सहस्रायास्य श्रीकण्ठयाद्ध-

हस्ताद्ध यात्पुत्रस्तोगाद्गा शिवस्ये । त्रिगुणेन साक्षात्कु-

पा ष्ठातेऽपत्यनिचायां वेति अश्वत्थराजवृक्षशाखिधा-

मयत्रएव विधिर्देवस्य दक्षिणायां मूर्तौ । सघृतं गुग्गु-

लमष्टसहस्रं जुहुयात्षट्सहस्राणि वा जन्यात्रूतं

कर्मेत्याचक्षते यथा सिद्धे मण्डलेऽनावृष्टमहम् जुहुयाद्दुर्भिक्षमव्यवच्छिन्नमघर्ष्यं भवति। मा नो महान्तमिति तिलाहुतीनामयुतं जुहुयाद्गृहे बालानां परिजनस्यारोग्यं भवति मा नस्तोके इत्यायुष्याणि कर्माणि भवन्ति ॥ ५ ॥ नमो हिरण्यबाहव इति षड्भिरनुवाकैः कटुतैलाक्तान् राजसर्षपाञ्जुहुयाच्छत्रुं नाशयति फट्कारेण दैवस्योपरि मालायामधः शिरमवलम्ब्य शस्त्रेण शिरसि रुधिरं स्राव्य स्वा येकिकटुकेनाभ्यज्य देवं करांगुलिनखेनोत्पाद्य ग्रावोर्णम सारण्योपेतं सर्वबलं ग्रामुत्साद्येद्देवं कृत्स्नं ग्रामं नगरं वैतान्हा राजानमहोरात्रेण ब्राह्मणमर्द्धेन क्षत्रियं त्रिभागेन वैश्यर्द्धं षड्भागेन शूद्रं स्त्रियं वा व्याहृतं कर्मेत्याचक्षते ॥ ६ ॥ अथ वशीकर्तुं कृष्णपालाशाश्वत्थापामार्गकांरतविल्ववेतसौम्बरादीनां प्रतिवर्णं प्रतिमन्त्रं दधिमधुघृतक्षाराक्तानामयुतं जुहुयात्क्रमशो वर्णचतुष्टयं वशमानयत्यथ राज्यकामः कुमुदसौगन्धिकनीलोत्पलादीन् पूर्वकल्पकारोपदेशात् स्वाध्यायोभिर्भगवती तूपतिष्ठते नमः सिकत्यायेति कलशमभिमन्त्र्याष्टशतेन राजानं स्नापयेत्सर्वविनायकेभ्यो भयं न भवति रोगाभिभूतं स्नापयेन्मुच्यते सर्वरोगैर्नमो वः किरिकेभ्य इति तिलाहुतीनामयुतं जुहु-

यात्कार्षापणानां सहस्रमुत्पद्यते पामार्गसमिद्भिः सु-
वर्णं गुग्गुलप्रतिमानां चतुरंगोत्कृत्याष्टसहस्रं जुहुयादल-
ङ्कृतां कन्यां लभते य वा सुवर्णशतं गोशफेनैका
दशसहस्रमाज्यहोमात्तावत्यो गावः स्युस्तिलतण्डुला-
नां शतसहस्रेण सर्वसम्पदस्य तिलयवधान्यशतपु-
ष्पमयीं प्रतिकृतिं कृत्वा जुहुयाद्ग्राममान्यथव्यौस्यात्ता-
मुत्पलपद्मानां शतसहस्रेण स्वरूपिणी राजलक्ष्मीर्भ-
वति चणकमिश्राणां गुग्गुलुगुटिकानां शतसहस्रं
जुहुयात्स्फीतसामन्तराज्यो प्राप्नोति देवस्य दक्षिणायां
मूर्तौ बिल्वसमिद्भिर्महाराज्यं रुद्राचतुष्पथे वल्मी-
कमृदा गोमयेन लिङ्गं प्रतिष्ठाप्य रुद्राध्यायेनाभि-
मंत्र्य इतया पायसमन्वहं बलिमुपहरेद्भूतेभ्यो भूति-
कामो देवस्य दक्षिणायां मूर्तौ वचाफलमर्धं वा सूक्ष्मं पि
ष्ट्वा ताम्रभाजने न्युप्य कपिलघृतेनालोड्य प्रादेशिन्या-
ष्टसहस्रमभिमन्त्र्य पिबेदप्रतिहतवाक्स्याद्वाक्सि-
द्धिश्चौदुम्बरसमिद्भिर्ध्यक्ताभिर्महाभोगस्वामी स्यान्न च
गावः क्षीयन्ते बिल्वफलैर्घृताक्तैः सुवर्णमासिद्धे रज-
तमेतेनैवौदुम्बरामलकी हरीतकिविभीतका व्याख्या-
ताः ॥ ७ ॥ अन्तर्धानमिच्छन्पर्वतशिखरमारुह्य क-
णगुग्गुलुं ताम्रं सहस्रमभिमन्त्र्य देवस्य हस्ते निवे-
द्य तावज्जलोद्भवहरूमादते पूर्णे शतसहस्रे ब्रह्मा-

यथापि ज्वलन्त्यपायमाणो सर्वलोकवशीकरणं धू-
माग्राने पादप्रसारित्वं ज्वलिते चाकाशगमित्व-
ं० क्रुद्धो भगांशाभः समुद्रान्तां पृथिवीं पर्यटेद्
ध्यानुचरो भवति पद्मपुष्पाणां सुरभिचन्दनाक्तानां
घृतपूर्णानां वा चतुष्पथे शून्यायतने वाऽग्निमुप-
समाधाय ग्रामसहस्रं जुहुयात्स्वयमेव श्रीरूपं तिष्ठ-
ते येन यथेच्छति तथा करोति द्वापञ्चाशत्सहस्राण्यर्थं
जुहुयाद्दासान्स्वस्त्ययनानि भवन्ति ॥ ८ ॥ इमा रुद्रा
येति तिलाञ्जुहुयादयुतमयुतं धनं स्यान्महारोगो-
पघाते दूर्वाग्रबालैस्तायुर्दीर्घीभवत्यथ जन्मानि पु-
ष्टिकामो दधिमधुघृतपायसं जुहुयान्महाग्रहभूत-
पिशाचादिभ्यो मोचयति वैकङ्कतपलाशसमिद्भिर्घृ-
ताक्ताभिरयुतं जुहुयाद्दाभिश्च रिपुभयं न स्यान्महा-
जनेनाभिभूयमानस्तुषान् जुहुयाच्छाल्मलीवैकङ्कतौ-
दुम्बरैर्यवतिलानां चायुतं जुहुयाद्दध्ये गवामुपहते
गोष्ठमध्येऽग्निमुपसमाधाय वैकङ्कतसमिधो जुहुया-
च्छान्तिर्भवति यावन्त चतुष्पदास्तेषामेष विधिर्जनमरणो
दये वाऽयुतं तिलाञ्जुहुयद्गृहग्रामनगरमध्येऽग्नि-
मुपसमाधाय श्मशानेषु चत्वरेषु दिक्षु देवबलीन्
दत्वा बलिभिर्रक्षितः कर्म क्षीरोदनघृततिलपिष्ट
माषान्नपरमान्नक्षीरादीनि देवबलिमुपहरेत्सर्वा-

पुष्पाणाऽऽ० रक्तचन्दनाक्तानां घृतपूर्णानां चतुष्पथे शून्यायतने वाऽग्निमुपसमाधाय च सहस्रं जुहुयाद्दु र्वे गोरीति भा कन्याच तोऽथ वा सुवर्णघृतमयमग्निः सहस्रिणऽइति सहा व्याहृतिवत्कर्म गवाऽऽ० शांति-र्भवति गोशकृनाज्याहुतिसहस्रं जुहुयाद्भूतं त-भेदनेनैव समिद्धोमो हिरण्यपशुकामस्य सहस्रेति सहाव्यहृतिवत्कर्म सहाव्याहृतिवत्कर्म ॥ ८ ॥ इ ति यजुर्विधाने द्वितीयोध्यायः २। नमस्तऽइति चतसृ-भिः प्रत्यृचं यव गोधूम गवेधुक जातिलान्वा दधि घृता-क्तानेकाहं जुहुयाद्धान्यं वृद्धं भवत्येतदष्टशतेन जन समागमुपशाम्यति पक्ष शतेन वा राष्ट्र पद्रवं छिद्रऽ० शतिरात्रेण देशोपद्रवं मासेन पृथिव्युत्पातं गवामु त्पाते गोष्ठेऽग्निमुपसमाधाय वैकङ्कतसमिधामयुतं जु-हुयाच्छान्तिर्भवति द्विगुणेन सहाशान्तिर्भवति ॥ १ याऽइषुरिति सर्वत्र रक्षा कर्तव्या उरगेभ्यश्च सर्षपा-न्सप्ताभिर्मन्त्रितान्कृत्वा चतुर्दिक्षु क्षिपेत्सर्वत्र रक्षा कृ-ता भवति पथि गच्छन्सर्षपान्क्षिपन्गच्छति सर्षपैर्ब्र-राक्षसभूतप्रेतपिशाचादिभ्यो न भयं तैः सर्षपैः स्क-न्दग्रहादिभ्यः शिखोपरिक्षिप्ता भवति विहाय राजा सर्पद्रोगभयं न भवेत्सर्व रोगशमनार्थं धर्माभिमन्त्र्य प्राशयेद्दुःखेन सर्वसत्वाऽऽ० सर्षपैः सर्पाणां भस्मना

सर्वभूतानाᳪ स्तनमाडन्तवन्ध्यादिभिर्होमेन लोहेन त्रिशतं० सहस्रमभिमन्त्र्य नागहूतिकुल-वान्वितो नागो नाशं गच्छति तालशब्देन भस्मनाऽती-वतास्मात्सादनं करोतीति ॥ २ ॥ असौ य इत्यृग्द्वयेनाहो-रात्रयोरादित्यमुपस्थायाक्षय्यमन्नं भवति एवं दधिदु-ग्धघृतेन स्नापयेद्रोगान्मुच्यते सविता प्रसन्नो भवति वर्षति वाऽतसीपुष्पाणामयुतं जुहुयाद्वश्यो वश्यो भवति सविता वरदो भवत्युदकसक्त्वाहारो वेतससमि-धां गुडगोलकानामयुतं जुहुयाद्भगवानादित्यो म-हाद्दृष्टं प्रमुञ्चति नमोऽस्त्विति घृतपायसं० स्थण्डि-लमुपलिप्य कंप्रस्तापद्मास्तरे वा कृष्णाष्टम्यामारभ्य यावत्कृष्णाचतुर्दशीं सहस्राभिमन्त्रितं कृत्वा निवे-दयेत्कपोपगानाᳪ सहस्रमुत्पद्यते सिद्धे शतम् ॥ ३ ॥ प्रजुह्वेति षड्भिरायुधान्यभिमन्त्र्य सङ्ग्रामोपनीताः शत्रवः पलायन्ते न चाभिमुखास्तिष्ठन्ते दर्भकण्टका-नामयुतं जुहुयादनामिकाङ्गुलिनखेनोत्पाद्य प्रा-चीनीम स्माद्गुपत्सवन्तं० शत्रुमुत्सादयेद्ग्रामं न-गरं वैकेनाह्ना राजानं प्रभूतशस्त्रवन्तं क्षत्रियं दिव-सत्रिभागेन चतुर्थेन वैश्यं षड्भागेन शूद्रं० स्तवं रक्षोभूतेभ्यो रुद्रेभ्यः पलाशपुटेष्वेवमर्द्धमासेन जनम-रणमुपसंयतीक्षत्तेनमुन्यन्तैः शान्तिषु यथोक्तेन व-

श्रीकरणमभिचारश्च शान्तिर्भवति ॥ ८ ॥ या ते रुद्रे-
ति जीवे गाथाः प्रतिसरं० सहस्राभिमन्त्रितमेका-
दशग्रन्थियुतं बालानां गुर्विणीनां च हस्ते बध्वा ता-
स्तु सुखेन वर्तते धनिकधारणिकेभ्यो भयं न भवति
परि नऽइति वटप्ररोहसमिधोऽयुतं जुहुयादायु-
ष्मन्तः पुत्राः स्युरच्छन्ने भीरुष्टेति महाभये चोरभये-
ऽग्निभये शास्त्रसं० भये सङ्कटे वा मनसा जपन् क्षेमे-
णागच्छत्यायाति च विकिर इति महाजनविरोधे रा-
जा वा प्रत्यनीकपरिचरतः सर्वैर्होमं जुहुयात्सर्वे
भज्यन्ते मम शत्रवः पन्नागन्ते सहस्राणीति महाज-
जनमरणे राज्ञोपद्रवे वा शाल्मलिविकङ्कत्यौदुम्बरस-
मिधो यवतिलाज्यैकादशसहस्रोऽभिमन्त्र्य शतसहस्रं
जुहुयात्क्षयरोगापायुषेन भूतेभ्यश्चेद्विडालमाऽसेन रा-
क्षसान्मुच्यतेऽसङ्ख्यातानीति रक्तवासा रक्तोष्णी रक्त-
माल्यानुलेपनो देवमभ्यर्च्य श्मशाने एकवृक्षे नदीपु-
लिने चतुष्पथेऽरण्ये वैकादशशरानर्कमूलपरिवेष्टि-
तान्महाजातैलाक्ताञ्छ्मशानाग्नौ प्रदीप्ते प्रक्षिपेद्दश-
दैवैकादशाभिमन्त्रितेन तद्भस्मना शत्रोः प्रतिकृ-
तिं कृत्वोरसि कटुतैलेनाभ्यज्य दक्षिणभूभागेऽवस्था-
प्य एकैकेन सहस्राभिमन्त्रितेन शरेणैकादशसु प्राणा-
यतनेषु विध्येदासहस्रयोजनगतं० मुञ्चान्तिकगतं वा

अनुमुत्पादयेद्देवासुरयक्षगन्धर्वरक्षोभूतपिशाचादीन् शा-
न्त्यर्थं देवं घृतक्षीरेण स्नापयेद्रुद्राध्यायेनाभिमन्त्र्य मा
नस्तोक इति वा घृतमधुपायसमयुतं जुहुयादघो-
देशमधिष्ठाप्य कर्पटशृङ्गादिषु मध्यतऽएषऽएव विधिर्द-
र्शादने फट्कारेण सर्वकर्माणि कारयेत् ॥ १० ॥
नमोऽस्तु त्रिकोण मध्याह्ने तुषकण्टकाञ्जुहुयात्सर्षपा-
न्वाऽहरहर्महाप्रत्यङ्गिरेऽष्टौ देवयोनयः सपिशाचास्तरन्-
ति निशाचराः भवन्ति ये यातुधानास्ते सर्वे भस्मी-
भवन्त्यथ प्रदीप्तेऽग्नौ स्वकेशानालुप्य जुयाद्राक्षसू-
लहस्तऽउपतिष्ठते यदुच्यते तत्करोति अथ वा ग्राम-
मुत्सादयति ॥ ११ ॥ अथ वा कृत्यामुत्पादयितुं कामो
रक्तवासा रक्तोष्णीषो रक्तमाल्यानुलेपनो देवमभ्यर्च्य
श्मशानाङ्गारेषु लोहकीलान्प्रादेशमात्रान्महातैलाक्ता-
नाष्टसहस्रं जुहुयादुत्तिष्ठति रक्ताङ्गी रक्तनेत्रोर्ध्वके-
शी कृत्वा तां क्षिप्रमेव रुधिरमांसेन पूर्णपात्रेण तर्पये-
दन्यथा कर्तारमेव हिनस्ति सा त्वरितापतेति नाम-
कर्तृतिकान्वधिष्यामीति वक्तव्या मुकं व्यापादयस्वेति
सा तूर्णं वधमुत्पादयति यामाज्ञापयति त्रैलोक्याव-
स्थितमप्युत्सादयत्यथ वैकैकस्य शरीरस्य ग्रामे गृहे न-
गरे वा व्याहृतं कर्मेत्याचक्षतेऽथ प्रयोगः शाकयाव-
कपयोभक्षो द्वादशरात्रमुपोष्य लघुभ्यो लघूनि गुरुभ्यो-

गृह्णीयात् सहस्रेषु महितेषु महाग्निं तुलापुरुषदानादौ यथाध्यत ऽएष ऽएव विधिः कल्पग्रहणे त्वाचार्यमभिवाद्यानुज्ञाप्य पठेन्न चैवान्यथा पठेदिति न चैवान्यथा पठेदिति ॥ १२ ॥ इति यजुर्विधाने तृतीयोऽध्यायः । ३ ।

परस्यात्मकरणं सङ्क्रामयितुमिच्छन्कर्तुं शिलां कृत्वा कुम्भं गोदकपूर्णेन सहस्राभिमन्त्रितेनात्मानं स्नापयेद्गच्छन्नूर्जमिति प्रदक्षिणं परिहृत्य कुम्भे शिलां कृत्वा अश्मेनमिन्याहं यं द्विष्मऽइति निरस्येत्कुले सर्वं कृतस्तस्य सङ्क्रामन्ति विश्वतश्चक्षुरिति महाव्याहृतिवत्कर्म देवस्य दक्षिणायां मूर्तौ मधुघृतपायसान्नानां पद्मानां सहस्रं जुहुयात् स्थण्डिलमुपलिप्यार्कप्रस्तरे कृष्णाष्टमीमारभ्य यावत्कृष्णाचतुर्दशीं सप्ताहं सुवर्णं लभते यो नः पितेति महाव्याहृतिवत्कर्म ॥ १ ॥ आशुः शिशान ऽइत्यनुवाकेनाप्रतिरथेन रथमायुधमात्मानं चाभिमन्त्र्य सङ्ग्रामे प्रविशेज्जयी भवति चौरमहिषव्याघ्रसिंहराक्षससर्पादिभयेषु मनसा जपंस्तेषामभवति यमिच्छेत्स्तम्भयितुं तमनेन स्तम्भयेदुदेनमित्युदुम्बरसमिद्धाज्यहोमः प्रजापशुपुष्ट्यर्थं सूर्यरश्मिरित्यर्कसमिद्भिः सुवर्णमुत्पद्यते विमानऽइति द्वयोर्महाव्याहृतिवत्कर्म मध्यन्दिने समुद्रगां नदीं गत्वा होममधोऽग्निमुपसमाधाय घृताक्तानां कृष्णतिलानाम-

ढं० शतसहस्रं जुहुयाद्विमानैरन्द्रवर्णैः समारूढाः स-
र्वालङ्कारभूषिताः सपरिच्छदा अप्सरसोऽभ्यागच्छन्ति त-
त्र सर्वालङ्करणानि वासांसि मुक्त्वा विवाससः स्वा-
नि गुह्यायतनानि दर्शयन्त्यो जले क्रीडन्ति यदि ता-
नि दृष्ट्वेन्द्रियविकारो भवेद्दृष्टैवपदं ददति तदा तस्मै
अथ दृढव्रतोऽग्रे महानीचमास्तावज्जपेद्यावदुदक-
मुत्तीर्य वासांसि परिधाय यावन्ति दिव्यैः सुगन्धि-
चन्दनैरङ्गानि विलेपयन्ति पाणौ गृहीत्वा विमाने स-
मारोपयन्ति तासां सर्वाधिपतिर्भवति ताभिः सह
लोकं गच्छति यं भोगं कामयते तं कुरुते मध्वन्दि-
ने चानुवर्तितैर्यवधान्यापामार्गहोमः सोऽर्थप्रदाना
य देवकन्यां पश्यति कन्याऽभवेत्यर्घं दद्यादनेनैव विधि-
ना महाव्याहृतिवत्कर्म प्रतिदिवसमित्याज्याहुति-
सहस्रं जुहुयात्प्राचीमनुप्रदिशमित्याज्यसहस्रं जु-
हुयाद्द्विपदश्चतुष्पदकामो गन्धद्वारेति सहस्रना-
म्ना पृथग्युक्तानि कर्माणि भवन्ति ॥ २ ॥ तां कविहृगिति
सहस्रधारया गोमयं सहस्राभिमन्त्रितं कृत्वा संस्थि-
तगरोस्तत्रायुध्याञ्जनमस्य गावो न क्षीयन्ते दुग्ध्वा-
नायास्तथा नाम गृहीत्वा परिवेषणं कृत्वोदककुवती-
यं तावज्जपेद्यावन्मुक्तो धेनुं लभते शमीसमिधो जुहुया-
द्वृषभादिकं० शतंलभतेऽथ वा गोघृतेनाज्यं जुहुया-

दृगोमतं लभेदेतेनैव हस्त्यश्वमहिष्याजाविका व्याख्या-
ताः घृतदुग्धाहुतीनां बालेन स्रुवेणाष्टसहस्रं जुहुया-
द्गोत्रां दशसहस्रीर्लभते विधेमतऽइति वैश्वक्तीभिः
सतिलब्रह्मः स्यादग्ने इति दध्योदुम्बरीभिर्हुमिर्द्धिर्दध्य-
क्तमयुतं जुहुयाद्गृहेऽन्नमक्षय्यं भवति ॥ ३ ॥ सप्ततऽ-
इत्याहुतिसहस्रेण तेजस्वी भवत्युदुम्बरपालाशार्गति-
लतयाऽऽत्ले सप्तदशसहस्राणि जुहुयात्सप्तसुवर्णं लभे-
त्सर्वकामिको वा स्रुक् सकृदुदुम्बरपात्रेण पूर्णाहुति-
होमेन यं लभते मनुजाते शुक्रज्योतिरिति सप्त-
वारं जपेच्छान्तिर्भवति इन्द्रं दैवीरिति जातिकलिका-
नाए सुरभिवल्कलानां घृतपूर्णानाए चतुष्पथे-
षु ग्रामान्ते,नि मुपसमाधाय शतसहस्रं जुहुयात्सर्वा-
लङ्कारभूषितां एव कन्यां लभते ॥ ४ ॥ इमए स्तनमि-
ति नद्याः नदीगतोदकमवगाह्ययुतं जप्त्वाऽष्टसह-
स्रं जुहुयाद्ग्रामं लभते घृतधारयाऽर्कपुष्पाणि वा सुप्र-
तिष्ठ अयुतं जुहुयादुदुम्बरपलाशानां सवत्सां गां लभ-
ते जपेद्धेनुं लभते घृतं मिमिक्ष इत्यग्नादग्निराज्या-
हुतिसहस्रं जुहुयाद्दस्यु प्रविश्य जाड्योभयं न भवति
वाजस्येति सप्तभिः पावमानैराज्यं जुहुयात्पशु अपिद-
न्निरोगा नश्यति पशु नामश्चैवं ब्रीहयश्चेति सर्वब्रीही-
ण्पयसा शतसहस्रं जुहुयादृद्धाश्चब्रीहयोऽक्षय्या भव-

न्ति च पुष्णाति ॥ ५ ॥ विश्वेऽग्रद्येति महाव्याहृ-
तिवत्कर्म त्राणो नऽइति त्रिभिर्होऽजुहुयाद्याचितं
न धनमाप्नोति सस्मेति पयोदधिमधुघृतमिश्रान्सर्व-
षोहोऽजुहुयाद्वर्षति ॥ ६ ॥ ऋतावाडिति षड्वेना-
ज्याहुतिसहस्रं जुहुयाद्वर्षति स नो भुवनस्येति गृह-
वास्तुभ्यऽआज्याहुतिसहस्रं जुहुयाद्वास्तुदोषैर्न लिप्य-
ते यास्तऽइति सौभाग्यकामो जपेद्वटमरोहसकिङ्कि:
पुत्रकामो दिवो मूर्द्धेति महाव्याहृतिवत्कर्म मूर्द्धान्नि-
त्यात्वहोरात्रं प्रविश्य जपेदहोरात्रं वर्षतोदठं० हविरि-
त्यात्मनस्त्वोत्रोत्रलहृद्धे पयसा होमऽइन्द्रियविकलो ज-
पेत्पूर्णेन्द्रियो दीर्घायुः प्रजावांश्च स्यादग्नऽआयूंषी-
त्याज्यं हुत्वा शत्रुगृहे प्रविश्य जपेन्मित्रमित्रोपपद्यते-
ऽग्नेर्जनेनेति जयकामो लाजाञ्जुहुयादाज्यं वा यो
भूतानां चातारमिति च महाव्याहृतिवत्कर्म महो-
मृषु हवेन नावमारोहेत्क्षेमेण तरति ॥ ७ ॥ हि-
रण्यपाणिमूतयऽइत्यर्कसमिद्भिरयुतं जुहुयात्सुवर्णमु-
त्पद्यतेऽजीजनऽइति रहस्यो मन्त्रऽएतेन नागा वश-
मुपयान्ति लौहं त्रिशूलं० सहस्राभिमन्त्रितं कृत्वा
दक्षिणपादेनाक्रम्य पयोदधिमधुघृतैरयुतं हुत्वा विकृ-
तरूपास्त्रियऽउत्तिष्ठन्ति किमस्माभिः कर्तव्यमिति ब्रु-
वन्त्योऽभिरुचिकामेन ताऽआज्ञापयेत्तृनमोऽस्तु सर्पेभ्य-

ऽइति तिसृभिरर्घ्यं दद्यादग्न्यागारे गोमयलिङ्गं प्रति-
ष्ठाप्य पञ्चगव्येन संस्नाप्य दक्षिणतः शूलं निखनेत्पु-
नः सहस्रं जपेत्सुवर्णशतं लभेत्तमिदं कर्मेत्याचक्षते इ-
ष्टौ शिखण्डानतसीपुष्पाणि वा युञ्जतीति महारण्ये
जलेऽभयं भवति सर्वकर्मसु मध्ये कृच्छ्रेण गायत्र्या शत-
सहस्रं जपेत्पूर्वमेवैतत् ॥ ८ ॥ गणानां त्वेत्यौदुम्बर-
तिलयवापामार्गधान्यादिहोमार्थं प्रदद्याच्चतुष्पथे वैरहमी-
करणे पिचुमन्दपत्रैर्हुत्वा त्र्यम्बकप्रतिकृतिं वल्मीकस्थ-
दा कृत्वाऽर्घ्यं न्माठं समाषोदनमपूपतिलपिष्टकपरः
माल्यफलपुष्पादिभिर्बलिमुपहरेद्धनुषस्त्वेतानि का-
र्याणि भवन्ति एवं नक्षत्रः स्याद्गायत्री त्रिष्टुबिति पञ्च-
भिः शङ्खेनाज्याहुतिसहस्रं होमात्सिद्धिः ॥ महाना-
म्न्यऽइति खादिरस्रुचा तिलतैलं निष्क्रम्याऽष्टसह-
स्रं जुहुयाद्बन्धनान्मुच्यते वैकङ्कतकाष्ठककटुतैल-
विषरुधिराक्तानां द्विगुणं शतसहस्रं हुत्वा सगणं
राजानमुत्सादयति ॥ ९ ॥ अथ वशीकर्तुमिच्छन्नृषिखां
परिजप्य बिल्वकाष्ठकान्हुत्वा राज्ञो मन्त्रभेदं जनये-
त्सर्वत्र मध्यमकृच्छ्रो गायत्र्या लक्षं वेन्द्रस्य क्रोडऽइत्यु-
दरमभिमन्त्र्य रात्रौ स्वपेदुदरविकारो न स्याद्बृह-
तिमित्याज्याष्टसहस्रं भूमिलाभाय जुहुयाज्जुम्ब-
कायेति वरुणकृदपोमन्त्रोऽश्वमेधावभृथेयुक्तो मन्त्राह-

स्यायाः प्रमुच्यो मन्द्र इत्यञ्जलौ जपः संवत्सरकाले स्तेय-
संतिष्ठन्त्याना भद्र इत्यनुवाकं० सततं जपेदायुष्य-
कामो भद्रं कर्णेभिरिति जपेत्पूर्णेन्द्रो दीर्घायुष्य
यद्वध्यमिति जप्त्वा नावसीदति नावसीदति । १० ॥
इति यज्ञविज्ञाने चतुर्थोऽध्यायः ॥ ४ ॥ अग्निस्त्वेत्यव-
श्यं जपेत्स्वगानयति सकारानिति परेण व्यवहारे
जपेन्नृनिन्दिहीनानयोः तुल्यौ ॥ यशोभागिमिति चि-
त्रं कर्मा स्यो सिद्धिः प्रियो देवानामिति महाव्याहृ-
तिस्तत्कर्म ॥ बृहस्पतेऽअतीति धनाय जपेदक्लिष्टे
पिरिति तिलान्जुहुयात् सुवेणोदकस्य गार्हस्थ्यं न
क्षीयते धान्यमक्षय्यं स्यात्समास्त्वेति नवकेन पादकाञ्जु-
तोनामयं जुहुयाद् छमध्येऽग्निमुपसमाधाय गो-
मयेनाद्दीप्य यावतीमिच्छति तावतीं हुत्वा मथितपिता
धेनुर्लभते ॥ १ ॥ समास्त्वेत्यन्वहं ज्वलितमग्निमर्कस्तृ-
पमसिद्धं ततोऽन्यत्रापि स्त्रावो निर्दूवन्ति सञ्चेति वैक-
ङ्कतीभिर्यशोदधिमधुघृतैः सौभाग्यं त्वासम्नऽइति तुपका-
राटकै अन्नानामन्नमाज्येन जपऽइद्वेत्यन्नाज्येन हु-
त्वा श्रियं विन्दति सेनेति जयाद्याज्यं हुत्वा ना-
सग्राहमतिनिहऽइत्यग्निमुपस्तापर्षिः परैरवहद्धोऽन-
वरुद्धः स्यादनाथ्यऽइत्यग्निं प्रज्वाल्योदकमण्डलं ब-
ध्वा भयं नाशयति बृहस्पते सवितरिति दधिमधुघृतै-

हुत्वा सुभगः स्यात्कन्यादानसमये१००००जपेद्यावज्जी-
वं सौभाग्यं भवत्यऽमुत्रभूयादित्यायुः कामो दूर्वाभ-
भिग्रस्ततुषाऽऽजुहुयात् ॥ २ ॥ ऊर्ध्वाऽस्यस्येति वैकङ्क-
ताभिः शत्रुभयं नश्यति जातीकण्टकैर्वंचनविधेयश्च तनू-
नपादसुरऽइति न्यग्रोधमूलेऽग्निमुपसमाधायाशोकपु-
ष्पाणां घृताक्तानाएं शतसहस्रं हुत्वाऽसुरकन्यां पश्यति
दृष्ट्वाऽनुवाकशेषं न दद्यादग्निमुखे दिव्यर्ट॰सुवर्णं प्र-
यच्छति नचेत्तूष्णीमनुगच्छेद्यान्निवर्तते बिलप्रवेशन-
काले पाणौ गृहीत्वा प्रविशति त्रिरात्रोषितस्तत्स्वा-
मी भवति राये न्वित्यनुवाकशेषं निवाते जपेद्वातो वा-
त्येकया च तिसृभिर्घृतं जुहुयाद्वातरोगान्मुच्यते ॥ ३ ॥
अभित्वेत्यहोरात्रं जपेद्धर्षेति कया नऽइति माषो-
दनं तिलमिश्राणामन्नानां त्रिकटुकेनाभ्यज्य चतुष्प-
थे शून्यायतनेऽग्निमुपसमाधाय शतसहस्रं जुहुया-
द्धोमान्ते चित्राङ्गदो विद्याधरराजो दिव्यर्ट॰सुवर्ण-
राशिं ददाति ॥ ४ ॥ ऊर्ज्जोनपातमिति दधिमधुघृतैरा-
पन्ह्यो मुच्यते ॥ संवत्सरोऽसीत्याज्यमष्टसहस्रं हु-
त्वा यावज्जीवमारोग्यं स्यात्प्रेत्याऽइति मधुतिलाक्तल-
सहस्रं जुहुयात्सुवर्णमुत्पद्यते न च कश्चिदभिहन्ता
भवति ॥ ५ ॥ केतुं कृण्वन्नित्यनुवाकेन रथं शस्त्रमा-
युधमात्मानं चाभिमन्त्र्य सङ्ग्रामे प्रविश्य जयेज्जयो भ-

वति धन्वनागेति धनुर्वेदमन्त्रः स्वाध्यायाद्यावद्रणादी-
क्षितः क्षत्रियो भवति सा च दीक्षा त्रिविधा गोब्रा-
ह्मणदेवस्वाम्यात्मनां हितायेत्यात्मानं सन्नह्यतऽइ-
ति मर्माणितऽइति कवचं परिधत्ते धन्वनेति धनुर्यो-
जयेत्ते ऽआचरन्ती इति विस्फुरणं वक्ष्यन्ती वेदिति
ज्याभिमर्शनमहिरिवेति हस्तवेष्टनमभिमन्त्रयते ब-
ह्वीनां पितेति तूणं कलापमभिमन्त्र्य परिधत्ते सुपर्णमि-
ति नैर्ऋत्यां दिश्येकमिषुं क्षिपेदप ऽउपस्पृश्य वनस्पते
वीड्वङ्गऽइति रथमालभ्य युञ्जन्तीत्यश्वयोजनमसि यम-
ऽइति वक्ष्यमाणः शिशानऽइत्यनुवाकेनालभ्य विष्णोः
क्रमऽइत्याक्रम्यागन्नित्यश्वताडनमक्रान्ददित्युत्सर्जमा-
ने जपेद्याः सेनाऽइति परसैन्याभिमुखं॰ रथं
वाहयेद्रथे तिष्ठन्नित्यवस्थापयेत्सदुन्दुभऽइति दुन्दुभि-
स्ताडनमहिरिवेतीषुं गृह्णाति यत्र बाणाऽइति दिक्षु
नयेयुरक्रान्दऽइति रथं वाहयेत्तदेवमाविद्धाविध्य आ-
क्रान्तायां चात्मनैव युध्यमानेऽपराजितो भवति आक्रा-
न्तापि युध्येत् ॥ ६ ॥ धीन दत्तामित्यश्वानभिमन्त्रयेत्क्रा-
न्तान्पुनस्त्वोशितऽइत्यश्वग्रन्थीन्मोचयेन्महाँ २ऽ ॥ इन्द्रऽ-
इत्यासनमिन्द्रो छत्रमिति रथं कुतस्त्वमिति योधात्सह-
सामभिभाषयेत्तान्प्रतिजपेत्सुसमिद्धायेत्याहवनीये स-
मिधमादधाति न तद्रक्षाꣳसीत्याज्याहुतीनामयुतं जु-

हुत्वा भ्रातृव्याणां च नाशाय गतायुरपि दीर्घायुर्भवति शं नो देवीरित्युपस्थाय प्रविशेद्देवा रणादीनां आश्व-यो ऽपि प्राणसंशये प्रत्तमाददीत यमेन दत्तमित्यश्वं सकृदाज्याहुतीनामयुतं जुहुयाच्चतुरश्वयुक्तं रथं लभतेऽसियमऽइति मधुतिलाञ्जुहुयाद्देवमनुलेपना-दिभिरर्चयेद्दुष्पापो भवति ब्रह्मघ्नमपि लक्षहोमेन तारयेत्समिद्धोऽअग्नऽइति होमकाले देवतानामाह्वान-मग्नये गायत्र्येति सार्वकामिकं चरुं कुर्यात् ॥ ७ ॥

विश्वानि देवेति महाव्याहृतिवदादित्यमुदयऽउपति-ष्ठेद्विपापो भवत्युदकसक्त्वाहारो मासमेकमन्वहं स-हस्रं जपेद्ब्रह्महत्यादेरपि मुच्यते विभक्तारमिति सप्त-म्यां कुशपुष्पगात्रां कृत्वौदुम्बरसमिधो यावच्छुष्यति रा-त्रपुष्पारायार्द्रकेशस्य साहस्रिकं कर्म महानर्थो जायते गोशफेनाज्याहुतिहोमो गोकामाय मध्याह्नान्न-पिण्डं तद्दस्राभिमन्त्रितं निवेद्येदध्यमन्नं स्वादने बुभु-क्षित आदित्याभिमुखो जपेत्सर्वतो भोजनं लभते ॥ ८ ॥

सहस्रशीर्षेति महाव्याहृतिवद्दशाहमित्यासु प्रविश्या-क्षौरान्नं जपेदामध्याह्नाद्वर्षति यो देवेभ्यऽइति रु-चमिति रोचनाऽन्या महाव्याहृतिवच्छ्रीश्चेति कुमुद-सौगन्धिकोत्पलान्युप्य हुत्वा श्रीमान्भवत्युत्तरनाराय-णेनादित्योपस्थानं कामं नामग्रहणं च यथेष्टं कामं

सर्वत्र सिद्धं कर्म सदसस्पतिमिति चन्द्रग्रहे निराहारो
वचां ब्राह्मीं वा सहस्राभिमन्त्रितां पिबेत्परममेधावि
स्यादग्निर्माविति जपेदिदं मऽइति च स्त्रीकामो नि
त्यम् ॥ ९ ॥ अस्याजरासऽइत्यग्निमुपतिष्ठेद्वरदो भ
वति तेजस्वोन्न द्वयोर्महाव्याहृतिवत् त्रीणि शताऽग्ने
शर्द्धेति त्रिमधुरैः सौभाग्यं भवो मह्येऽइति भूमिका
मस्तिलतण्डुलैरिन्द्रो वृत्रमित्यन्नपुष्ट्याऽआयुषऽआ
ध्यनाज्ज्ञऽइत्यौदुम्बरीभिर्धनकामो विभ्राडित्यनुवा
कं सततं जपेत्प्राकामस्तेजस्वी निकजस्वानऽइडा
भिरित्यौदुम्बरीभिः पशुकामो यद्देवेति पायसादि
भिर्वशीकरणं तिलकेन तस्यूयस्येति चक्षुष्मान्भवति
परामस्थानिति महाव्याहृतिवच्छ्रायन्ऽइवेति तिला
न्पुष्पाणि वा हुत्वा वास्तुपे शतपुष्पीं वा सुभगः स्या
त् ॥ १० ॥ आकृष्णेनेति महाव्याहृतिवत्कर्म करवी
रपुष्पाणि १००००० हुत्वा तप्त सुवर्णं लभेद्दारिद्र
य्सेन्द्रवायूऽइन्द्राग्नी मित्रावरुणेति देवताह्वानं सिद्ध
येऽग्नऽइन्द्राग्नी रुद्राऽइति वारुण्यां गच्छेत्क्षेमं भवत्य
वीश्चऽइति घृतेन सर्वभयनाशनं मित्रठं० हुवऽइति
घृतठं० हुत्वा शिवं पिबन्मेधावी स्यादद्भिरिति
लाजाभिर्हिरण्यं गावऽउपमेति दूर्वामधुघृतैः पशुपुत्र
सम्बन्धिकामऽउपनोऽनुत्तमेति चेमाऽउ त्वेति पावका-

य प्रतिक्रमीस्याशरासऽइत्यध्यायेन सर्वदेवताराधनं कुर्यात्प्रतिदिनं काममेकैकं लभतेऽध्ययनेन मासात् ॥ ११ ॥ यज्जाग्रतः षड्भिः शिवसङ्कल्पेन मानससमाधिः पितुरिन्वति मधुनामग्राभ्यामभिचाराणि जुहुयात्कर्म घटकं सिद्धान्स्मियते यत्र नद्यऽइति पद्मपुष्पाणि रक्तचन्दनघृताक्तानि लक्षं हुत्वा साक्षात्पद्ममालिनीं पश्यति यावज्जीवं धनं प्रयच्छतीष्टसन्ततिं च सिनीवालीति प्रजाकामोऽन्नं जुहुयात्प्रान्वहित्य युञ्ज वटारोहौदुम्बरदूर्वास्त्र त्यन्नऽइति पुनःपशुरक्षार्थमाज्यं जुहुयादुत नाम वेति सद्योजातमात्रवत्साव लीढामां वा जिह्वां उपस्पृशन्गावऽघ्न्या भवन्ति । इडायास्त्वेति गोशफेनाज्याहुतिसहस्रं जुहुयात्धेनुशतं लभते । त्वमग्ने प्रथमऽइति नित्यमग्निं स्तुनुयात्सर्वसस्त्रष्टो भवति प्रवो महऽइति षड्चेन पितॄनर्च्चयेत्प्रजाकामऽआहुतिसहस्रं जुहुयात्गोशतं लभते देवेनेति यद्धनमिच्छेत्तावन्ति समीधोज्जुहुयात्प्रभुत्वं लभते सोमो धेनुमिति सोमचन्द्रग्रहेऽनुदितसुपतिष्ठेत्तन्मासे क्षेममौदुम्बरीभिर्जुह्वा हिरण्यपाणिः स्यादष्टौ वीति महाव्याहृति वहिरण्यपाणिरिति चाभिचारवर्ज्जमादित्योपस्थानं हिरण्यहस्तऽइति सर्पानभिमन्त्र्य रक्षार्थी भवति

ये ते पन्थाः क्षेमेण गच्छति क्षेमकारिण्युभा पिबतमि-
ति रूपकामोऽश्विनौ स्तुयादुषस्तदिति प्रातर्दिवा
स्वस्त्ययनमनाद्यं च पुत्रार्थी द्रव्यहोमस्तदर्थं महाव्याहृ-
तिवत्प्रातर्जितमिति च यदा बध्नन्निति हिरण्यठं॰ स-
हस्राभिमन्त्रितं दक्षिणहस्ते बध्नीयात्सर्वेषां पापचक्षुषां
दृष्टिदोषमपोहति न च राजाविरुद्धमाचरेत्प्रियदर्शनो
भवति ॥ १२ ॥ इति यजुर्विधाने पञ्चमोऽध्यायः ॥ ५ ॥
परं मृत्यविति बालानां गुर्विणीनाᳩ हस्ते सूत्रबन्धो भू-
तप्रेतादि नाशयति जपहोमौ च प्रौढगर्भे गर्भस्रावे
बन्ध्यात्वे च मृतवत्साम्रतौ माठं॰सपलाशपूपजाङ्गलि-
कारण्यमांसपयोदधिमधुघृताक्तमन्नं निवेद्य सर्वका-
मिकमन्नठं॰ भुक्त्वा शेषमुपजप्त्वा मैथुनमुपेयाद्गर्भ-
स्तिष्ठति प्रथमे पतिते आवाहनं द्वितीये पोषणं तृ-
तीये तर्पणं पञ्चमे गर्भस्तिष्ठत्यमोघं कर्मापाघमित्य-
पामार्गहोमः सर्वदुरितदुःस्वप्ननाशनऽआयुष्मानित्या-
ज्यमायुषे रक्षायाऽइमं जीवेभ्यऽइति सीतालोष्ट-
ठं॰ सहस्राभिमन्त्रितं चतुर्दिक्षु क्षिपेद्दुष्टभयं न
स्यात्परीमऽइति शिखाबन्धो मंडलबन्धश्चात्मरक्षार्थीय
वशीकरणे तुषहोमो महाभये जपेदभयं भवति रा-
जानमीत्य जपेद्वश्यो भवति हन्तुमागच्छन्तं दृष्ट्वा ज-
पेत्प्रणमति भक्ष्यपुष्पफलादीनि दद्याद्वश्यार्थे च स्तोना

पृथिवीति महाव्याहृतिवत्कर्म ॥ १ ॥ ऋचं वाचमि-
तीन्द्रियत्रिकलो जपेत्पूर्णेन्द्रियो भवति यन्मऽइति-
कर्मसमाप्तौ दोषपरिहारार्थञ्जपेत् इन्द्रो विश्वस्येति
द्विपदश्चतुष्पदां शान्तिः क्षीरहोमाच्छान्तिर्भवति शन्नो
मित्रऽइति जनमरणे चोपसर्गाभिचारेषु ज्वरादिरो-
गे स्वाध्यायसमाप्तौ व्रीहिहोमः शान्त्ये विषमग्रहे त
त्समिद्धोमः द्यौः शान्तिरित्यभिचारवर्ज्जं सर्वकर्मसि-
द्धियतो यतऽइति जपेदभयकारिणीं सुमित्रिया
नऽइतिजलमञ्जलिनादाय दुर्मित्रियाऽइति द्वेष्यं प्रति-
निक्षिपेत्तमुत्सादयति तच्चक्षुरिति जपेदारोग्याय
पुष्ट्यै ॥ १२ ॥ यमाय त्वा जपेदन्वहं सर्वसङ्कटो
त्रिदितश्च स्यात् ॥ २ ॥ अनाधृष्टेति पञ्चचतुर्भिः
पयोदधिघृतमधुतिलैर्जुहुयाद्यथासङ्ख्यमायुः प्रजापु-
ष्टिधनतेजस्कामो विश्वऽइति निमित्ते जपेद्धर्त्ता दिव-
ऽइति बुद्धिभ्रंशनाशनो हृदे त्वेति मतो ग्लानौ क
र्मसमृद्धिः पिता नऽइतिमहाव्याहृतिवत् ॥ ३ ॥ इड-
ऽएहीति यामेव धेनुमिच्छेत्तस्या नाम परिजप्य गोस्ता-
मीति शब्दं वदेत्तस्यैवापतति गोमयेन गोः प्रति-
कृतिं कृत्वा तन्नाम्ना बध्वा सव्येन गृहीत्वा पयोद-
धिमधुघृतं जुहुयात्तामेव धेनुं लभते यस्ते स्तनऽइति
सर्वकर्माणि सिद्ध्यन्ति स्वाहा सूर्यस्येति दृष्टिकामः

पयो जुहुयात्सद्यो वर्षति समुद्रायेति वातनामानि जपेद्वातो वाति द्विविधाऽङ्गुति दधिसहस्रं हुत्वा-सविता प्रसीदति ब्रीह्यादिभिः पुष्टिश्रीगौरं ष्टिर्वि-तसगुडक्षीरैस्तैलाक्ताभिः सहस्रं जुहुयात्स्वाहा रुद्रायेति रहस्यो मन्त्रः गवेधुकतण्डुलान्जुहुयाद्धन-कामः ॥ ४ ॥ स्वाहा प्राणेभ्यऽइति महाव्याहृतिव-त्कर्म तं ग्रामे कुर्यान्मनसः काममिति श्रीनाम्ना सर्वा-भ्युदयसिद्धः फलति गोघृतेनाज्यहो १००० मेन गो-लाभो गोमयहोमेन सिद्धिकग्रस्येति विमुखाख्यो मन्त्रः सर्वकामप्रदो गोपशुमणो गोष्टे वैकङ्क १०००० घतौ-र्हुत्वा शान्तिः कयंलोहितेनेत्येकादशयजुर्भिर्द्रव्यका-मवर्ज्जं महाव्याहृतिवत्प्रतिदिनमेकादशसहस्रप्रतिम-न्त्रं निर्वपेदेकादशैव धनवऽउत्पद्यन्ताऽएवमन्येष्वपि कामेषु हुत्वाऽध्यायशेषेणादित्यमुपतिष्ठते नास्य का-मेषां फलमाप्नोत्यग्नेनयेति नमस्कारोक्तिरग्निस्तुति-रात्मनो वा कर्मसमाप्तौ समाप्तौ च हिरण्मयेनादि-त्योपस्थानमोमित्येकाक्षरस्य परब्रह्मणो नामधेयं वेदा-रम्भे समाप्तौ च जपहोमादिषु शान्तिपुष्टिकर्म चै-तत्प्रयुज्यतऽएतद्विदित्वा सर्वविद्भवत्येतदुपास्य रवि-सिद्धिभाग्भवति कल्याणतरो भवत्येतत्कर्मफलप्रति-पादकं पूर्वकर्मफलाभावाद्भावकातस्य कर्मणः स वेद-

फलसंयुक्तस्य कर्मणो नास्ति नैव फलमिति तच्छ्रुत्यपेक्षयाऽमुष्मिंल्लोके कृतस्य कर्मणः फलᳪं हि संपत्तिः प्रत्ययं च न च विद्याधरपादप्रसारितघनानां अनपूर्वसर्वोरसेषु नास्ति यजुर्विरोधित्वादित्यनेनैव प्रकारेण सर्वे मन्त्राः प्रकीर्तिता ये नोक्तास्ते च सर्वे यथास्थाराऽऽख्य वा सर्वमन्त्राणां विस्तरेण पृथग्विधानं विस्तरेण पृथग्विधानमिति ॥ ५ ॥ इति श्रीयजुर्वेदवाजसनेयसंहितायजुर्विधाने षष्ठोऽध्यायः ॥ ६ ॥ समाप्तोऽयम् ॥

अथ स्वराष्टकशिक्षा ॥

ओं हरिः ॥ ओमृसाम्ब ॥ अऽइऽउऽऋऽऌऽएऽऐऽओऽऔऽइत्यष्टौ स्वराः ॥ पदान्तपदाद्योः सन्धिः ॥ पदान्तपदाद्योर्य्यऽएकः प्राणयोगः स सन्धिसञ्ज्ञः स्यात् ॥ न परकालः पूर्व्वकाले ॥ पुनः पूर्वकालसन्धिः विधाने परकालसन्धिं न प्राप्नोति ॥ एकम् ॥ १ ॥ अऽआमपरे ॥ तव अयम् ॥ तवायम् ॥ २ ॥ एकारमिवर्णे ॥ तव इदम् ॥ तवेदम् ॥ ३ ॥ ओकारमुवर्णे ॥ तवऽउदकम् ॥ तवोदकम् ॥ ४ ॥ सा ऽऋकारे ॥ स्वाहाऽऋषभम् ॥ स्वाहर्षभम् ॥ ५ ॥ ऐकारमे ऐपरत्वे ॥ तवऽएतत् ॥ तवैतत् ॥ तवऽऐश्वर्य्यम् ॥ तवैश्वर्य्यम् ॥ ६ ॥ औकारमोऽऔपरत्वे ॥ तवऽओजः ॥ तवौजः ॥ प्रऽओजन् ॥ प्रौजन् ॥ ७ ॥ इय्यं स्वरे ॥ वाजीऽअर्व्वन् ॥ वाज्यर्वन् ॥ विऽऊर्णुष्व ॥ व्यूर्णुष्व ॥ असिऽऋतस्य ॥ असृतस्य ॥ ८ ॥ इरिमिवर्णे ॥ विऽइत ॥ वीत ॥ ९ ॥ उर्व्वं स्वरे ॥ नुऽइन्द्र ॥ न्विन्द्र ॥ १० ॥ उरुमुवर्णे ॥ अनुऽउत् ॥ अनूत् ॥ ११ ॥ ऋकारो रेफं स्वरे ॥ धातृऽअपसः ॥ धात्रपसः ॥ १२ ॥

ऋग्वर्ण्ऽऋकारऋवर्णौ ॥ होतृऽऋकारः ॥ होतृकारः ॥ १३ ॥ एकारोऽयथ स्वरे ॥ ॥ अग्नेऽ आयाहि ॥ अग्नऽआयाहि ॥ १४ ॥ ओकारोऽव-थ स्वरे ॥ विष्णोऽएते ॥ विष्णवेते ॥ १५ ॥ ऐरावथ स्वरे ॥ भूम्यैऽआवन् ॥ भूम्याऽआवन् ॥ १६ ॥ एओ-रावथ स्वरे । उभौऽइन्द्रौ ॥ उभाविन्द्रौ ॥ १७ ॥ ओपरा-कारा लोपम् ॥ अद्धायोऽअगीतम ॥ अद्धायेऽगीत-म ॥ १८ ॥ तत्राद्यलक्षणम् ॥ एपराकारो लोपम् ॥ तेऽअव-न्तु ॥ तेवन्तु ॥ १९ ॥ वो लोपमुऽओओषु । उभौऽउ ॥ उभाऽउ ॥ उऽओऽओष्विति किम् ॥ पत्न्यावष्टोरा-त्रे । २ । इत्यनन्ताकृताच्सन्धिः ॥ अथ स्वरप्रकरणम् ॥ उदात्तानुदात्तस्वरितप्रचयाः स्वराः ॥ १ ॥ अताम्न-उदात्तः ॥ २ ॥ यथा ॥ शम् ॥ प्र ॥ नु ॥ द्वितीयस्य यथा ॥ अधो रक्तोऽनुदात्तः ॥ रुद्रऽईडे ॥ ३ ॥ तृती-यस्य च यथा ॥ उपरि रक्तस्तिर्य्यग्रक्तो वा स्वरितः ॥ स्वः ॥ स्वः ॥ स्वः ॥ ४ ॥ न्युब्जपराऽअताम्नाऽउदा-त्ताः ॥ स्वाहा ॥ स्वर्षाकः ॥ ५ ॥ चतुर्थस्य च यथा ॥ स्वरितपराऽअताम्नः प्रचयाः । त्र्यम्बकँय्यजामहे । ६ । स्वरितः पञ्चधा ॥ जात्याभिनिहितक्षैप्रप्रश्लि-ष्टभेदात् ॥ एकपदे नीचपूर्व्वऽसर्व्वो वा यथा-

न्यतरयुक्तो जात्यः ॥ धान्यम् । स्वः ॥ ७ ॥ उदात्ताद्
घोरत्वोऽभिनिहितस्वरितो भवत्यकारलोपे सति ॥ ते-
ऽवन्तु । तेऽवन्तु ॥ वेदः असि ॥ वेदोऽसि ॥ ८ ॥ उदात्त-
ऽऽउस्थाने यवयोः परोऽनुदात्तः क्षैप्रः ॥ युञ्जोद्यम-
त् ॥ नुऽइन्द्र ॥ न्विन्द्र ॥ ९ ॥ उदात्तानुदात्तयोर्ह्रस्व-
योः स्थाने इकारः प्रश्लिष्टः ॥ वि ऽइत ॥ वीत ॥ १० ॥
अनुदात्तपूर्वजात्यादयस्स्वारः पितृदानवद्धक्ताम् ॥
व्यायच्छेऽः ॥ भुवः स्वः । तेऽवन्तु ॥ वेदोऽसि ॥ अ-
भ्यभि ॥ योजान्विन्द्र ॥ द्विगीत ॥ ११ ॥ अनुदात्तपू-
र्वजात्यादयस्स्वारो मनुष्यदानवद्दात्त ॥ भूर्भु-
वः स्वर्द्यौः ॥ सहन्यमिति ॥ कद्रुभ्यो येऽन्तरिक्षे ॥ स्व-
र्णोस्पूर्णम् ॥ युञ्जोद्यमत् ॥ अप्स्वन्तः ॥ दिवीवेति ॥ १२ ॥
अनुदात्तऽउदात्तस्वरितयोः ॥ येभि ॥ स्वर्गा येऽभि ॥ सोऽ
हम् । युवं वरित्तम् । वीदम् ॥ संस्तभितम् संभितम्
स्वः स्वस्तभितम् ॥ १३ ॥ अननुदात्तपूर्वजात्यादयस्स्वा-
रः कार्यमूले ऽउदात्तस्वरितपरत्वाऽभावे ॥ न्यङ् ॥ स्वः ॥
तेऽवन्तु ॥ सोऽसि ॥ त्र्यम्बकम् ॥ न्विन्द्र ॥ वीत ॥
१४ ॥ उदात्तात्परानुदात्तः स्वरितम् ॥ इषे त्वा ॥
१५ ॥ नोदात्तस्वरितपरत्वे ॥ इषे त्वोर्ज्जे ॥ ईशा वा-
स्यम् ॥ स्वरितादनुदात्तानां प्रचयः ॥ व्यायच्छ्य ॥ १६ ॥

नोदात्तस्वरितपरत्वे ॥ आयवस्थ देवः ॥ आप्यमिद-
म् ॥ १७ ॥ उदात्तस्थानेको ह्युदात्तः ॥ प्रऽअर्पयतु ॥
प्रार्पयतु ॥ १८ ॥ उदात्तान्निहितस्वारः स्वरितात्प्र-
चयो भवेत् ॥ उदात्तात्स्वरितात्पूर्वो नान्यऽआपद्यते-
स्वरः । इति स्वराङ्कुशः ॥ कुचैलिनं दन्तमलापहा-
रिणामनल्पाशिनं निष्ठुरवाक्यभाषिणम् ॥ सूर्योदये चा-
स्तमये च शायिनञ्जहाति लक्ष्मीरपि चक्रधारिणम् ॥
अथ हस्तप्रयत्नलक्षणम् ॥ अनुदात्तो हृदि ज्ञे-
यो मूर्ध्न्युदात्तऽउदाहृतः ॥ स्वरितः कर्णमूले स्या-
न्नासाग्रे प्रचयस्मृतः ॥ ३ ॥ इषे त्वा ॥ आयवस्थ ॥
उदात्तादनुदात्ते तु यात्रायां भुवऽआरभेत् ॥ इषे
त्वोर्जे ॥ उदात्तात्स्वरिते चैव क्रमाद्धस्तगतो न्यसे-
त् ॥ ४ ॥ इषे त्वा ॥ इत्यनन्तकृतं स्वराष्टकम् ॥ २ ॥
कटपा गडबानपि ॥ ऊर्क् ॥ असि ॥ ऊर्गसि ॥
सम्राट्ऽअसि ॥ सम्राडसि ॥ उत्वयम् ॥ उद्वयम् ॥
त्रिष्टुप् इति ॥ त्रिष्टुबिति ॥ १ ॥ कटतपा ङणनमाः प-
ञ्चमे । वाक् मनः ॥ वाङ्मनः ॥ षट् महान् ॥ षण्म-
हान् ॥ तत् मित्रस्य ॥ तन्मित्रस्य ॥ अनुष्टुम्माला ॥
१ ॥ तदन्ताश्च जञाः शचवर्गयोः ॥ तत् चित्रम् ॥ ता-
च्चित्रम् ॥ तत् जुषस्व ॥ तज्जुषस्व ॥ आदित्यादुक्ष-

ऋभिः ॥ आदित्या ऋभ्यॄभिः ॥ ३ ॥ तौ लँल्लि ॥ परिचित् । लोकम् ॥ परिचिल्लोकम् ॥ ४ ॥ अनुनासिकलँल्लि ॥ तान्लोकान् ॥ ताँल्लोकान् ॥ ५ ॥ ह्रस्वपरङ्णौ द्विर्भावꣳ स्वरे ॥ दध्यङ् ऋषिः ॥ दध्यङ्ङृषिः ॥ अश्मन् । ऊर्जम् ॥ ६ ॥ नः प्रत्यच्छयोः पूर्वस्यानुनासिकम् ॥ अग्नीन् च ॥ अग्नीँश्च ॥ ७ ॥ नः सन्तथयोः पूर्वस्यानुनासिकम् । तान् । त्वम् । ताँस्त्वम् ॥ ८ ॥ मः परपञ्चमꣳ स्पर्शे ॥ व्रतङ्करिष्यामि ॥ व्रतञ्चरिष्यामि ॥ अनामकेनेन ॥ ९ ॥ ङ्णौ काभ्याꣳ सकारे ॥ ङ्णौ कागमतागमौ प्राप्नुतः सकारे ॥ प्राङ्सोमः ॥ प्राङ्क्सोमः ॥ चीन्समुद्रान् ॥ चीन्त्समुद्रान् ॥ १० ॥ मोऽनुनासिकयवलान्यवलेषु ॥ सम् । यौमि ॥ संय्यौमि ॥ तम् व्ऽः ॥ तंव्वः ॥ तम् । लोकम् ॥ तँल्लोकम् ॥ ११ ॥ मः एकारꣳ श्षसहरेफेषु ॥ सꣳशितम् ॥ हवीꣳष्या ॥ सꣳशिशाधि ॥ सꣳसः ॥ अपाꣳ रेताꣳसि ॥ १२ ॥ ऊष्मः परः प्रथमं शसि ॥ तत् । शुक्रम् ॥ तच्छुक्रम् ॥ १३ ॥ प्रथमः परो हः चतुर्थम् ॥ भिषक् । होमः ॥ भिषग्घोमः ॥ तत् । हविः ॥ तद्धविः ॥ सम्राट् होमः ॥ सम्राड्ढोमः ॥ १४ ॥ स्वरपरसँयोगादिर्द्विः ॥ इषे त्वा ॥ इषेत्त्वा ॥ १५ ॥ रहाभ्याम्

भ्य: ॥ व्वायवस्थ ॥ व्वायवस्त्थ ॥ १७ ॥ इत्यनन्तकृतो हलसन्धिः ॥ अपरविसर्गऽउऽअहशोः । शिव÷ । असि ॥ शिवोऽसि ॥ देवेभ्य÷ । हविऽः । देवेभ्यो हविः ॥ १ ॥ आपरो लोपमऽआपरत्वे । देवाःऽ । अत्र । देवाऽअत्र । देवाःऽआशाऽः ॥ देवाऽआशाऽः ॥ २ ॥ अपरो लोपमा परत्वे ॥ देवाःऽआशाऽः । देवाऽआशाऽः ॥ ३ ॥ आपरो लोपठं० हशि ॥ देवाःऽ । हसन्ति ॥ देवा हसन्ति ॥ ४ ॥ अआपरो लोपमिचि ॥ देवाःऽ । इह । देवाऽइह ॥ अघ्न्याःऽ । इन्द्राय । अघ्न्याऽइन्द्राय ॥ ५ ॥ रेफतऽइच्यरस्य रेफमशि ॥ सवितःऽ जजान ॥ सवितर्जजान ॥ अग्निःऽ एकाक्षरेण । अग्निरेकाक्षरेण ॥ ६ ॥ रेफजेच्यरौ लोपठं० रेफे पूर्वस्य दीर्घम् ॥ प्रातःऽः रात्रिः ॥ प्राता रात्रि÷ ॥ कर्क÷रौद्रःऽ ॥ कर्करौद्रःऽ ॥ ७ ॥ स्यसऽएपविसर्गौ लोपठंव्यञ्जने ॥ एषः भ्यः । एषभ्यः ॥ स्यः राध्यः ॥ स्यराध्यः ॥ सः । नऽः सन÷ ॥ ८ ॥ सःते । सस्ते ॥ नम÷ ते ॥ नमस्ते ॥ ९ ॥ चच्छपरत्वे शम् ॥ व्वाज÷ च ॥ व्वाजश्च ॥ १० ॥ लोपङ्खर्पपरे शरि ॥ अन्वःऽ स्थ । अन्वस्त्थ ॥ ११ ॥ इतिविसर्गसन्धिः ॥ अऽइऽउण् ॥ १ ॥ ऋऌक् ॥ २ ॥

एओङ् ॥ ३ ॥ ऐऔच् ॥ ४ ॥ हयवरट् ॥ ५ ॥ लण् ॥ ६ ॥ ञमङणनम् ॥ ७ ॥ झभञ् ॥ ८ ॥ घढधष् ॥ ९ ॥ जबगडदश् ॥ १० ॥ खफछठथचटतव् ॥ ११ ॥ कपय् ॥ १२ ॥ शषसर् ॥ १३ ॥ हल् ॥ १४ ॥ अउभीनं परेषां संयोगोऽयम् ॥ इति स्वराष्टकं संपूर्णम् ॥

क्रमकारिकाशिक्षा ॥

श्रीगणेशाय नमः ॥

प्रणम्याद्यं दिनमणिं योगीश्वरशिरोमणिम् । सर्वज्ञं याज्ञवल्क्यं तच्छिष्यं कात्यायनम्मुनिम् ॥ १ ॥ सर्वं याजुषमन्त्राणां वेदे वाजसनेयके । क्रमावसानविषयां कारिकामारभामहे ॥ २ ॥ श्लोके विंशादिरङ्कितः प्रतीकेषु न दुःसहः ॥ प्रत्येकम् प्रथमा षष्ठी सप्तम्युक्ताश्च कल्पते ॥ ३ ॥ पदानामानुपूर्व्येण क्रमएषः प्रवर्तते । गणान्तानां क्रमो नास्ति इति कात्यायनोऽब्रवीत् ॥ ४ ॥ न वेष्ट्याश्च द्विवेष्ट्याश्च त्रिवेष्ट्याश्च तथा परे । चतुर्वेष्ट्यो मध्यवेष्ट्यः पञ्चवेष्ट्य इतीरितः ॥ ५ ॥ अवग्रहोऽनुवाकान्ते अर्द्धर्चान्ते ऋचां तथा ॥ यजुषां वाक्यावसानेष्विति साधारणो विधिः ॥ ६ ॥ प्रत्यक्षं याज्ञवल्क्यं श्रीशम्भुमिश्रविनिर्मिता ॥ क्रियतां क्रमितैः कण्ठैः कारिका रत्नमालिका ॥ ७ ॥ ह्रस्वपूर्वो ह्यनुस्वारो दीर्घोनुस्वारभाग्भवेत् ॥ द्विशः परश्चेन्न तथा क्रमकाले तु वाजिनाम् ॥ ८ ॥ ओ३म् ॥ इषेत्वेत्ययमध्यायो ह्यनुवाकान्तवेष्टनः ॥ गायत्रेण त्रिवेष्ट्योऽत्र पुरा क्रूरत्रिवेष्टनः ॥ ९ ॥ देव स-

वितस्थिरद्वयेकमेषा ते तु द्विवेष्टनः । एतन्ते द्वयेकता त्वग्नीषोमयोरनुवाकद्वत् ॥ १० ॥ अग्ने दव्याय्ऽएकत्व न्देवागातुविदे द्विवत् ॥ सम्बर्हीदिषट्कैकानुक विष्णो द्विवेष्टनः ॥ ११ ॥ ततोऽसिद्धे त्रिचतुष्कैकं संवर्त्तेति द्वि-वेष्टनः ॥ यज्ञसन्त्वेत्येकतान्तेऽग्नये कव्येति न वेष्टनः ॥ १२ ॥ ये रूपद्विष्टन्नमो हैकमाद्यन्तोऽञ्जरूपोद्विष्टत् । स-मिधाद्यष्टसु द्विष्टदग्निर्ज्ज्योतिः षडेकता ॥ १३ ॥ इन्द्रः पञ्चादिवेष्ट्यः स्यात्समिदं पञ्चवेष्टनः ॥ उपप्रषट्स्वपि द्विवत्तनूपात् सप्तकैकता ॥ १४ ॥ उपत्वा पञ्चसु द्विष्टदि-डऽएह्यन्तवेष्टनः ॥ सोमानाद्यष्टसु द्विष्टत् परिते दूडभ-स्त्विष्टत् ॥ १५ ॥ भूर्भुवः स्वोनुवाकैक्यं प्रवासीति द्विवे-ष्टनः ॥ यद्ग्रामेत्यन्तवेष्ट्यः स्यान्मो पूर्णेति द्वयोर्द्विवत् ॥ १६ ॥ अवभृथेत्यन्तवेष्ट्यः पूर्णाद्व्यर्थष्टसु द्विष्टत् ॥ एष-तैका त्र्यम्बकयोर्द्वयोर्द्विष्टत्परोऽन्त्यष्टत् ॥ १७ ॥ वाग्नि-नीत्वाग्नो द्विवेष्ट्यो वाज्यश्व्यञ्चकैकता ॥ एदमादित्रिषु द्विष्टन्महीनां युगलैकता ॥ १८ ॥ आपो द्विवेष्टनः स्वाहा यज्ञमित्यन्तवेष्टनः ॥ आकूत्यै प्रयुजे त्रिष्टद्वि-श्वो देवस्य तु द्विष्टत् ॥ १९ ॥ ऋक्सामयोस्तुष्कैक्यं व्रतं कृणु सप्तैकता ॥ त्वमग्नेव्रतपाद्विष्टद्रास्वे पञ्चा-न्तवेष्टनः ॥ २० ॥ एषा ते पञ्चकैकत्वं वस्व्यादिस्तु-रैकता ॥ एष ते युगलैकत्वमित्यन्ताद्विवेष्टनः ॥

२१ ॥ प्रजाभ्यस्त्वाऽन्त इन्द्रप्रथमाद्धर्षान्तवेष्टनः ॥ सम मेऽर्धं मुक्त्वा पसस्तन्न्याद्विचतुरेकता ॥ २२ ॥ प्रतिपन्त्यादिद्विवेष्टयः स्यादद्दित्यात्त्वक् द्विवेष्टनः ॥ वनेषु युगयोर्द्विष्टदुक्तायेतं युगैकता ॥ २३ ॥ नमो मित्रस्य तु द्विष्टद्दक्षस्य त्रिष्टुप्परः ॥ अग्नेस्तनूर्युगैकत्वं भवतन्नो द्वयोर्द्विष्टत् ॥ २४ ॥ आपतये त्वेन्द्रघोषस्त्वाऽनुवाकान्तवेष्टनः ॥ युञ्जतीति त्रिषु द्विष्टद्देवश्रुतयुगैकता ॥ २५ ॥ विष्णोरादि त्रिषु द्विष्टद्विष्णोरराटमन्त्यष्टत् ॥ आददे पञ्चकैकत्वं यवोऽसि चतुरेकता ॥ २६ ॥ परित्वा गिर्वणो द्विष्टदिन्द्रस्य स्यूरस्यान्त्यष्टत् ॥ विभूरस्यानुवाकैक्यं ज्योतिर्वैष्टचतुष्कवान् ॥ २७ ॥ अग्ने नय द्वयोर्द्विष्टद्देव सवितस्त्वयैकता ॥ अत्यन्यान्त्रितयैकत्वमयं द्विता द्विवेष्टनः ॥ २८ ॥ अधीषोमस्तद्वा ते त्रिषु द्विष्टत्परोऽन्त्यष्टत् ॥ उपावीरस्य मनसे यत्ते त्वेत्यनुवाकष्टत् ॥ २९ ॥ समुद्रादिचतुष्कैक्यमिद्मापो द्वयोर्द्विष्टत् ॥ अग्नेर्वस्तनूवेष्ट्यः स्यादमुष्यास्तु द्विवेष्टनः ॥ ३० ॥ हृदे त्वा युगलैकत्वं हृदयात्वग्निमर्द्धिवेष्टनः ॥ देवीरापस्त्वैकत्वं यमग्ने पृथिवीति द्विष्टत् ॥ ३१ ॥ आददे सप्तकैकत्वं त्वमङ्गेति त्रिवेष्टनः ॥ वाचस्त्वैक्यं चोपयाम द्वैक्यमावाग्रो च द्विष्टत् ॥ ३२ ॥ इन्द्रवायू अयं वां च रायाधावां त्रिवेष्टनः । तम्प्रत्नाद्युद्वयोर्द्विष्टत्वन्तमुक्रोपतेऽन्त-

ष्टत् ॥ ३३ ॥ अच्छिन्नस्य चतुर्षु द्विष्टद्यं वेनस्त्वमध्यमः ॥
एष तेऽत्यन्तवेष्ट्यः स्याद्ये देवासो द्विवेष्टनः ॥ ३४ ॥ आ-
ग्नेयत्रैक्यमिन्द्राय द्वैक्यं मूर्द्धा द्विवेष्टनः ॥ उपांश्वोरन्त-
वेष्ट्यः स्यादपो देवा द्विवेष्टनः ॥ ३५ ॥ इष्णाऽऊर्म्मिस्त्वये-
कत्वं सविता त्वानुवाकष्टत् । सोमस्य त्विषिर्य्यमैक्यं सध
मादो द्विवेष्टनः ॥ ३६ ॥ नक्तयोरत्वं च्यैक्यं अवेष्ठास्ततु-
ष्कान्तवेष्टनः ॥ ऊर्द्धमारोह चाद्यर्द्धवर्ज्जं विद्याद्द्विवेष्ट-
न ॥ ३७ ॥ द्विष्टत्सोमस्य त्विषिर्हिरण्यरूपौ त्रिवेष्टनः ॥
सोमस्य त्वाऽन्तवेष्ट्यः प्रपर्वतस्य त्रिवेष्टनः ॥ ३८ ॥ प्रजाप-
तयेति द्विवेष्ट्यो रुद्र यत्त्वन्तवेष्टनः । इन्द्रस्य त्वान्तष्टन्मा
ते द्विवृद्ग्नयऽअन्तष्टत् ॥ ३९ ॥ हंसो द्विष्टन्नेयदसि स्यो-
नासि चान्तवेष्टनः । निषसाद द्विवेष्ट्योऽभिभूरादिच-
तुरैकता ॥ ४० ॥ सविचा द्वैष्ट्यमश्विभ्यां शुभ्मंशुभ्मं त्रिष्ट-
द्द्विष्टत् । युञ्जानः सप्तसु द्विष्टदादद्दे युगलैकता ॥ ४१ ॥
हस्तादिचतुर्षु द्विवृत्सतूर्वं युगलैकता ॥ अन्चान्ये-
कादशा नद्विष्टत्पृथिव्याः सधस्थात्त्रिष्टत् ॥ ४२ ॥ अपां
पृष्ठन्द्वयोर्द्धि वृत्संवसाथां त्रिवेष्टनः ॥ त्वामग्ने पञ्च-
दशसु द्विष्टत्त्रिवृद्वृषाग्निते ॥ ४३ ॥ ओषध्येकादशाना-
न्द्विष्टन्मखस्य शिरोन्ततः । कृत्वाय सा द्विवेष्ट्यः स्याद्व-
सवस्त्वाऽन्तवेष्टनः ॥ ४४ ॥ अदितिष्ट्वा युगैकत्वमित्रस्य
युगलन्द्विष्टत् ॥ उत्थाय बृहतीति द्वावाकृतिन्त्वन्त-

ष्टनः ॥ ४५ ॥ मा स्वादिषु च सर्व्वेषु द्विष्टद्नपते त्रिवृ-
त् ॥ द्विवृद्दृष्टमानोऽध्यायद्विसुपर्णो सि नवैकता ॥ ४६ ॥
चिदसीत्यन्तवृदन्ते सञ्ज्ञानञ्च त्रिवेष्टनम् ॥ द्विष्ट-
न्मयि ह्यनुवाको ध्रुवासि चतुरैकता ॥ ४६ ॥ काण्डा-
दिति चतुर्ष्वु द्विवृद्विराडज्योतिस्त्रयैकता ॥ अषाढाद्या-
स्तथैकोनविंशतिस्युर्द्विवेष्टनः ॥ ४८ ॥ इमम्मा स्यात्रिवृदे-
कशफं पशुमिति द्विवृत् ॥ सहस्रमृग्गायुमतो ह्यन्तव-
र्ज्जं द्विवेष्टनः ॥ ४६ ॥ त्वं यविष्ठ द्विवेष्ट्यः स्यादपा न्त्वे-
त्यन्तवेष्टनः ॥ नवायं पुरो न वेष्ट्यो ह्यन्त्याभ्यर्धं विना
द्विवृत् ॥ ५० ॥ ध्रुवक्षितिश्चतुर्ष्वु द्विवृद्दिव्यास्त्वा त्रिवे
ष्टनः । सजूर्मूर्द्धा वयश्चेति ह्यनुवाकान्तवेष्टनः ॥ ५१ ॥
इन्द्राग्नी स्याद्विवृद्विश्वकर्म्मा त्वा युगलैकता ॥ आद्य
मूर्द्धाऽशुरश्चेषाग्गैकयेत्यनुवाकवृत् ॥ ५२ ॥ अग्ने जातां
द्विवृत्त्रिवत्सहनाऽनेः पुरीषन्द्विवृत् । एवादिरश्मि-
ना राज्ञो चायमग्रश्चानुवाकष्टत् ॥ ५३ ॥ अग्निर्मूर्द्धाऽ
नुवाको द्विवेष्ट्योऽन्तात्त्रिवेष्टनः । येन ऽऋषयोऽनुवाको
द्विवृत्पञ्चान्तवेष्टनः ॥ ५४ ॥ प्रोथद्विवृच्चान्तवर्जमाग्ने द्वि
द्विपरोऽन्तवृत् ॥ नमस्ते चानुवाकेषु सप्तस्वाद्यो द्विवेष्ट-
नः ॥ ५५ ॥ अनुवाकान्तवृत्षट्सु द्रापेऽन्त्याष्टसु द्विष्टत् ॥
दशास्मिन्महतीत्याद्याः सर्वे चैवान्तवेष्टनाः ॥ ५६ ॥ अ-
श्मन्नूर्ज्जं गिरन्नृद्विवृदिमा मेति नवैकता ॥ समुद्रसप्तसु

द्विवृन्नमस्ते हरसे त्रिवृत् ॥ ५७॥ ये देवादिषु च
द्विवृदाजुह्वानोऽन्तवेष्टनः। ताए सवितुः पञ्चसु द्विवृत्तु
शुक्रज्योत्यनुवाकवृत् ॥ ५८॥ द्विवृदिम एतानुवाकाऽए-
ताऽर्षंति तत्त्रिवृत् ॥ वाजादयोऽनुवाकाः स्युरनुवा-
कान्तवेष्टनाः ॥ ५९ ॥ द्विवृद्वाजस्यानुवाकः पयः पृथि-
व्यान्तु त्रिवृत् ॥ ऋताषाडेकैकं वचन्तो द्वयोर्द्विवृत्पवेतान्त-
वृत् ॥ ६० ॥ त्रिषु स्याऽग्निं युनज्म्यादिष्वनुवाकेषु च द्वि-
वृत्। स्वाहोन्त्रिवृत्परीतो द्विव्यवोम्लि दिः पुनाति ते ॥
६१ ॥ त्रिब्रह्मपचन्नाना द्विगाद्यहर्दुन्तवृदाम्रेनम् ॥ मो-
दार्हयुक्तान्तेजोऽन्तवृदा व्याघ्रादिषु द्विवृत् ॥६२॥ पञ्चविं-
शतिषु मन्त्रेषु स्यात्पित्र्यः स्वधान्तवृत् ॥ अदब्धादश्च सु
द्विवृदिमर्ङं० हविरिति त्रिवृत् ॥६३ ॥ उदीरतामिह पु
द्विवृत् आमस्यैव तु वेष्टनम् । त्वया त्रिवृत्स्यः प्रथ-
मा द्वन्द्वैकं लोमानि च द्विवृत् । ६४ ॥ ऋद्धर्यावञ्चं स्य ह्रे-
वाध्यायः सर्वार्धवेष्टनः ॥ स च मूर्द्धन्यमन्त्रः स्यादस्य त्रिव्य-
हादे द्विवृत् ॥ ६५ ॥ इसमं त्यादिषु द्विवृत्प्रोता यज्ञ त्सु
चान्तवृत् । त्रिवृत्पूर्वाश्विनौ छागाद्यन्तवृत्तादनन्तरम् ॥
६६ ॥ त्रिवृत्पराश्विनौ छागौ वनस्पत्यग्निचान्तवृत् ।
देवस्त्वस्यादिषु द्विवृद्देवो स्यात्यन्तवेष्टनः ॥ ६७ ॥
अग्निनद्यु च रूपस्या त्वामद्येति त्रयैकता ॥ तेजोन्त-
वृदिमा द्विवृदभिषा युगलैकता ॥ ६८ ॥ तद्विवृद्धो अन्वी-

न्यथेऽ न्यादिङ्कारानुवाकवृत् ॥ हिरण्मयपाण्यादिन-
वाभीजनस्य द्विवेष्टनः ॥ ६९ ॥ कायादयोऽनुवाकस्यानु-
वाका स्युरन्तवेष्टनः ॥ हिरण्यगर्भेत्यध्याये प्रजापतयऽअन्त-
वृत् ॥ ७० ॥ यः प्राणतो द्विवृच्चन्द्रमास्तदत्यन्तवेष्टनः ॥
युञ्जन्तीति त्रिषु द्विवृद्भवो युगलैकता ॥ ७१ ॥ स्विष्टतुर्षु
वायुष्वा पञ्चसु स्याद्द्विवेष्टनः ॥ अग्निः पशुरासीध्य-
वञ्जं नु द्विवृद्वाव्ययैकता ॥ ७२ ॥ उत्सक्थ्याद्यनुवाकेषु
पञ्चसु स्याद्द्विवेष्टनः ॥ अम्बस्त्वारभ्य चत्वारः सोमा-
यर्थानभेकता ॥ ७३ ॥ रोहिताद्द्वसमायुक्तः श्वितिर-
न्ध्रोऽन्तवेष्टनः ॥ शुद्धवालस्य प्रष्टत्यवदित्याद्यन्तभेकता ॥
७४ ॥ वृद्धयन्तापन्तशादि द्वैक्यं शिल्पास्तथान्तवृत् ॥ स-
प्तमूर्ध्नानुवाकेषु मन्त्राणामन्तवेष्टनम् ॥ ७५ ॥ शादं चैवा-
नुवाकानामन्तकं चानुवाकवृत् ॥ पञ्चमूर्ध्नानुवाकेषु
द्विवृदिमानुकं त्रिवृत् ॥ ७६ ॥ अग्निश्चेति त्रिवृद्द्विवृद-
न्तरेषु त्रिषु त्रिवृत् ॥ वैश्वानरं चैव विद्यादग्नि-
कथेन चान्तवृत् ॥ ७७ ॥ वैश्वानरस्य सुमतावादयः ष-
ड्द्विवेष्टनः ॥ द्विवृत्समास्त्वेत्यऽध्याय स्वापश्विदन्त्यवेष्टनः ॥
७८ ॥ संवत्सरोऽसि द्विवृदित्यन्वाकोऽनुवाकवृत् ॥ होता
यक्षदेकादशपूर्वश्चैवापरो द्विरत् ॥ ७९ ॥ देवं बर्हिरप-
रो द्विव ऋचिमुष्णिाहमात्रिका ॥ ऊर्ध्वंत ऽइंगणांतेषु त-
न्तुमन्त्राणतान्तवृत् ॥ ८० ॥ द्विवेष्टमिन्द्राय वयोधसऽइ-

त्यन्तयोर्द्वयोः ॥ समिद्धोऽअञ्जन्नध्याये मन्त्राःसर्वे द्वि-
वेष्टनाः॥ ८१ ॥ अन्त्यानामनुवाकानां त्रयाणामनुवाकवृ-
त् । द्विवृदश्वाजराध्यायौ बृहन्निदिति चान्तवृत् ॥
८२ ॥ द्विवृद्यज्ञायतोऽध्यायो द्युभिरक्तुभिरन्तवृत् । वि-
स्वानि च विभक्तारं द्विवृदन्ये तु वेष्टनाः ॥ ८३ ॥ सहस्र-
शीर्षमन्त्रेषु चतुर्विंशतिषु द्विवृत् । न तस्य त्रिवृद्देषो ह
येनद्यौर्दग्रस्तु द्विवृत् ॥ ८४ ॥ त्रिवृद्द्युभिरह्नोभिस्तु द्विवृ-
द्वायुः पुनाति च । सविता त्रिवृदन्ये द्विवृत्स्योना पृथिवी त्रि-
वृत् ॥ ८५ ॥ ऋचँवाचन्त्रिवृदन्तोऽन्ताईर्वऽऊर्जं द्विवेष्टनः ॥
ऊतिभिः सहितः कया त्वमादिचतुर्ष्षु द्विष्टत् ॥
८६ ॥ अहानिशान्त्रिष्टद्वीरभिष्टयऽइति द्विष्टत् ॥
द्यौः शान्तिरन्तवेष्ट्यः स्याद्दृते दृंह त्रिवेष्टनः ॥
८७ ॥ ज्योक्तेऽन्तष्टन्नमस्तेऽस्तु यतस्त्वचतुष्क द्विष्टत् ।
आददे देविदेव्यश्चेतीन्द्रैक्यं प्रेत्विति द्विष्टत् ॥ ८८ ॥
मखस्याम्बस्य नवै क्यं यमाय त्रितयैकता ॥ द्विष्टत्ग-
र्भोऽनुवाकस्तु विश्वासान्त्यं विनात्रिवृत् ॥ ८९ ॥ आददे-
चतुष्कैकं यस्ते द्विवृत्परोऽन्तवृत् । समुद्राय तद्द्वित्रैक्यं य-
मायेति द्विवेष्टनः ॥ ९० ॥ विश्वाऽआशाः पञ्चैक्यं स्वा-
हा पूर्णोऽनुवाकवृत् ॥ अभीमन्तु द्विवृद्याते चतुष्कैक्यमृचि-
द्विवृत् ॥ ९१ ॥ यावतीत्यनुवाकैश्यन्त्विषः सँवृगथान्तवृत् ॥
स्वाहा प्राणानुवाकानामष्टानामनुवाकवृत् ॥ ९२ ॥ आ-

यासायं युगैकत्वं यमायेत्यन्तवेष्टनः ॥ ६२ ॥ ईशावास्य-
मिदं सर्व्वं द्विवेध्यं सर्व्वसम्मतम् । ४ ॥ इति क्रमकारि-
का शिक्षा समाप्ता ॥

पाणिनीयशिक्षा ॥

श्रीगणेशायनमः ॥

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ॥ शास्त्रानु-
पूर्वं तद्विद्याद्यथोक्तं लोकवेदयोऽः ॥ १ ॥ प्रसिद्धमपि श-
ब्दार्थमविज्ञातमबुद्धिभिः ॥ पुनर्व्यक्ती करिष्यामि वा-
चऽउच्चारणे विधिम् ॥ २ ॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाऽः
शम्भुमते (१) मताऽः॥ प्राकृते संस्कृते चापि स्वयं प्रोक्ताऽः
स्वयम्भुवा ॥ ३ ॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंश-
तिः ॥ यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमा स्मृताः ॥ ४ ॥
अनुस्वारो विसर्गश्च ᳲकᳳपौ चापि पराश्रितौ॥ दुःस्पृष्टश्चे-
ति विज्ञेयो लृकारः प्लुतएव च ॥ ५ ॥ १ ॥ आत्मा बुद्ध्या
(२) समेत्यार्थान्मनो युङ्क्ते विवक्षया ॥ मनः कायाग्नि-
माहन्ति स प्रेरयति मारुतम् ॥ ६ ॥ मारुतस्तूरसि चरन्म-
न्द्रं जनयति स्वरम् ॥ प्रातःऽसवनयोगं तञ्छन्दो गायत्र-
माश्रितम् ॥ ७ ॥ कण्ठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुग-

---

१ सम्भवतो मतः । इति "क" पुस्तकपाठः ।

(२) समतध्यार्थान् (२) इति "ख" पुस्तकपाठः ॥

म्॥ तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्॥८॥ सो-
दीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः॥ वर्णाञ्जनय-
ते तेषां विभागः पञ्चधा स्मृतः॥९॥ स्वरतः कालतः
स्थानात्प्रयत्नानुप्रदानतः॥ इति वर्णविदः प्राहुर्निपु-
णं तं निबोधत॥१०॥२॥ उदात्तश्चानुदात्तश्च स्वरित-
श्च स्वरास्त्रयः॥ ह्रस्वो दीर्घः प्लुत इति कालतो नियमा-
ऽचि॥११॥ उदात्ते निषादगान्धारावनुदात्तऽऋषभ-
धैवतौ॥ स्वरितः प्रभवा ह्येते षड्मध्यमपञ्चमाः॥१२॥
अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा॥ जिह्वामू-
लं च दन्ताश्च नासिकोष्ठौ च तालु च॥१३॥ ओभावश्च
विवृत्तिश्च शषसा रेफ एव च॥ जिह्वामूलमुपध्मा च ग-
तिरष्टविधोष्मणः॥१४॥ यद्योभावप्रसन्धानमुकारादि प-
रं पदम्॥ स्वरांतं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः॥१५॥३॥
हकारं पञ्चमैर्युक्तमंतस्थाभिश्च संयुतम्॥ औरस्यं तं वि-
जानीयात्कण्ठ्यमाहुरसंयुतम्॥१६॥ कंठ्यावहाविचुयशा-
स्तालव्या ओष्ठजावुपू॥ स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतु-
लसाः स्मृताः॥१७॥ जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो
वः स्मृतो बुधैः॥ एऐ तु कंठतालव्या ओऔ कण्ठोष्ठजौ
स्मृतौ॥१८॥ अर्धमात्रा तु कण्ठ्यस्य ह्येकारैकारयोर्भ-

वेत् ॥ ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ॥ घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ २० ॥ ४ ॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ॥ तेभ्योऽपि विवृता वेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥ अनुस्वारयमाणां च नासिकास्थानमुच्यते ॥ अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥ अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वरानुगः ॥ अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३ ॥ अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ॥ द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥ २४ ॥ व्याघ्री यथा हरेत्पुत्रां दंष्ट्राभ्यां न च पीडयेत् ॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ २५ ॥ ५ ॥ यथा सौराष्ट्रिका नारी तक्राँ ऽइत्यभिभाषते ॥ एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥ २६ ॥ रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत्पूर्वमक्षरम् ॥ दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥ २७ ॥ हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि ॥ नासिकायां तथार्धं च रङ्गस्यैवं द्विमात्रता ॥ २८ ॥ हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन् ॥ मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनम् ॥ २९ ॥ मध्ये तु कंपयेत्कंपमुभौ पार्श्वौ समौ भवेत् ॥ स रंगं कंपयेत्कंपं रथीवेति निदर्शनम् ॥ ३० ॥ एवं

वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ॥ सम्यग्व-
र्णप्रयोगेण ब्रह्मलोके महीयते ॥३१॥६॥ गीती शी-
घ्री शिरःकम्पी तथा लिखितपाठकः ॥ अनर्थज्ञोऽल्पकं-
ठश्च षडेते पाठकाधमाः ॥ ३२ ॥ माधुर्यमक्षरव्यक्तिः
पदच्छेदस्तु सुस्वरः ॥ धैर्यं लयसमर्थं च षडेते पा-
ठका गुणाः ॥ ३३ ॥ शङ्कितम्भीतमुद्घुष्टमव्यक्तमनुना-
सिकम् ॥ काकस्वरं शिरसि गन्तथा स्थानविवर्जित-
म् ॥ ३४ ॥ उपांशु दष्टं त्वरितं निरस्तं विलम्बित-
ङ्गद्गदितं प्रगीतम् ॥ निष्पीडितं ग्रस्तपदाक्षरञ्च
वदेन्न दीनं न तु सानुनास्यम् ॥ ३५ ॥ प्रातः पठेन्नि-
त्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ॥ मध्यंदिने
कण्ठगतेन चैव चक्राह्वसङ्कूजितसंनिभेन ॥ ३६ ॥
तारन्तु विद्यात्सवनं तृतीयं शिरोगतन्तच्च सदा प्रयो-
ज्यम् ॥ मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरः-
स्थितेन ॥३७॥७॥ अचोऽस्पृष्टा यणस्त्वीषन्नेमिस्पृष्टाः
शरः स्मृताः ॥ शेषाः स्पृष्टा हलः प्रोक्ता निबो-
धानुप्रदानतः ॥ ३८ ॥ यमोऽनुनासिका न ह्रो-
नादिनो हझषः स्मृताः ॥ ईषन्नादा यणो जशश्च श्वासिनस्तु
खफादयः ॥ ३९ ॥ ईषच्छ्वासांश्चरो विद्याद्गोर्धामै-
तत्प्रचक्षते ॥ दाक्षीपुत्रः पाणिनिना येनेदं व्यापितम्भु-

वि ॥४०॥८॥ छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ॥ ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥४१॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥ तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥८॥ उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा ॥ उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥४३॥ उदात्तप्रदेशिनीं विद्यात्प्रचयं मध्यतोंगुलिम् । निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥४४॥ अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ॥ मध्योदात्तं स्वरितं द्व्युदात्तमिति नवपदशय्या ॥ ४५ ॥ अग्निः सोम प्र वो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती ॥ अग्निरित्यन्तोदात्तं सोमइत्याद्युदात्तं प्रेत्युदात्तं वइत्यनुदात्तं [illegible] नीचस्वरितम् ॥ ४६ ॥ हविषां मध्योदात्तं स्वरिति स्वरितम् ॥ बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥४७॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्तउदाहृतः ॥ स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥४८॥९॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः(१) ॥ शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥४९॥ कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् ॥ न त-

---

(१) द्विमात्रं वायसोऽब्रवीत् इति "ख" पुस्तकपाठः ॥

स्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥ सु-
तीर्थादागतं व्यक्तं स्वाध्यायं सुव्यवस्थितम् ॥ सुस्वरेण
सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥५१॥ मन्त्रो हीनः स्वरतो
वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यज-
मानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ५२ ॥
अवक्षरं ह्यनायुष्यं विस्वरं व्याधिपीडितम् ॥ अ-
क्षताः शस्त्ररूपेण वज्रं पतन्ति मस्तके ॥ ५३ ॥
हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम् ॥ ऋग्यजुःसा
मभिर्दग्धो वियोनिमधिगच्छति ॥ ५४ ॥ हस्तेन वेदं
योऽधीते स्वरवर्णार्थसंयुतम् ॥ ऋग्यजुःसामभिः पूतो ब्र-
ह्मलोके महीयते ॥ ५५ ॥ ११ ॥ शङ्करः शाङ्करीं प्रादाद्दा-
क्षीपुत्राय धीमते ॥ वाङ्मयेभ्यः समाहृत्य देवीं वाच-
मिति स्थितिः ॥५६॥ येनाक्षरसमाम्नायमधिगम्य महे-
श्वरात् ॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
५७॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ॥ त-
मश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८ ॥ अज्ञा-
नान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितं
येन तस्मै पाणिनये नमः ॥ ५९ ॥ त्रिनयनमभिमुखनिः
सृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः ॥ स भवति ध-
नधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति

वीति ॥ श्लोकः ॥ ६० ॥ अथ षिद्धामात्मो

अ ह्कारं स्वराणां यथा गौत्यचोऽस्पष्टोदात्तं चाषस्

रएकादश ॥ इतिवेदाङ्गनासिकाशिक्षा समाप्त